ISSN No. 2277-680X

# उशती
# UŚATĪ

पञ्चदशाङ्कः ( Vol. XV ) 2015 वर्षम्

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्यउशती सुवासाः ॥-ऋ.१०/७१/४

राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथझापरिसरः, इलाहाबाद

2018

ISSN No.: 2277–680X

# उशती
# UŚATĪ
## (THE JOURNAL OF SANSKRIT STUDIES)

**पञ्चदशाङ्कः** (Vol. XV) **2015 वर्षम्**

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।

उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥

ऋ० १०।७१।४

**प्रधानसम्पादकः**
एन्.आर्. कण्णन्

**सम्पादकाः**
ललितकुमारत्रिपाठी
अपराजिता मिश्रा
शैलजा पाण्डेय

**राष्ट्रियसंस्कृतसंस्थानम्**

गङ्गानाथझापरिसरः, इलाहाबाद

2018

# उशती

**पुनरीक्षणसमितिः**

**प्रो. शैलकुमारी मिश्रा** (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, इलाहाबाद

**प्रो. विश्वम्भरनाथगिरिः** (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, इलाहाबाद

**प्रो. भारत भूषण त्रिपाठी** (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः, लखनऊ

**प्रकाशकः**

**प्राचार्यः**,
राष्ट्रियसंस्कृतसंस्थानम्,
**गङ्गानाथझापरिसरः**,
चन्द्रशेखर-आजादोद्यानम्,
इलाहाबाद, उ. प्र. — २११ ००२

**प्रकाशनवर्षम्** २०१८

**अङ्कस्य शुल्कम्**

भारतीयम् ₹१५०
वैदेशिकम् $३५

© **प्रकाशकः**

**मुद्रकः**

एकेडमी प्रेस
दारागंज, इलाहाबाद -२११ ००२

ISSN No.: 2277–680X

# उशती
# UŚATĪ
## (THE JOURNAL OF SANSKRIT STUDIES)

**पञ्चदशाङ्कः (Vol. XV)** **2015 वर्षम्**

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।

उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥

ऋ० १०।७१।४

**Chief Editor**
N.R. Kannan

**Editors**
Lalit Kumar Tripathi
Aprajita Mishra
Shailaja Pandey

**Rashtriya Sanskrit Sansthan**

Ganganatha Jha Campus, Allahabad

2018

# UŚATĪ

**Review Committee**

**Prof. Shail Kumari Mishra** (Dept. of Sahitya)
Rashtriya Sanskrit Sansthan, Ganganatha Jha Campus, Allahabad
**Prof. Vishwambhar Nath Giri** (Dept. of Sahitya)
Rashtriya Sanskrit Sansthan, Ganganatha Jha Campus, Allahabad
**Prof. Bharat Bhushan Tripathi** (Dept. of Vyakarana)
Rashtriya Sanskrit Sansthan, Lucknow Campus, Lucknow

**Published by**

**Principal**,
Rashtriya Sanskrit Sansthan,
**Ganganatha Jha Campus**,
Chandrasekhar Azad Park,
Allahabad, U. P. — 211 002

**Year** 2018

**Individual Copy**

Indian ₹150
Foreign $35

© PUBLISHER

**Printed at**

Academy Press
Daraganj, Allahabad - 211 002

# प्रधानसम्पादकीयम्

---

संस्कृतभाषाया माहात्म्यं वैशिष्ट्यञ्च सर्वैरेव विद्वद्भिर्ज्ञायते एव। भाषेयं यथा पुरातनी सनातनी तथैव अधुनातनी अपि वरीवर्तते। राष्ट्रियसंस्कृतसंस्थानं समग्रे देशे संस्कृतभाषायाः संस्कृतविद्यायाश्च प्रचारप्रसारादिषु कृतसङ्कल्पं प्रयतमानं चकास्ति। अस्य राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरः उशत्याः पञ्चदशम् अङ्कं प्रकाशयतीति प्रमोदस्य विषयः। शोधपत्रिकायाम् अस्यां विविधा विद्वत्तापूर्णाः शोधनिबन्धाः प्रकाश्यन्ते। अस्मिन्नङ्के येऽपि विद्वांसः शोधलेखं प्रदत्तवन्तस्तेभ्यः पत्रिकायाः सम्पादकेभ्यश्च अभिनन्दनानि व्याहरामि।

**विदुषामाश्रवः**

**डॉ. एन्. आर्. कण्णन्**
**प्राचार्यः**

# विषयानुक्रमणी


**1. प्रमाणैरर्थपरीक्षणं न्यायः**
किशोरनाथझा ............................................ 1

**2. वैशेषिकसूत्र "लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः" पाठ की उच्चतर पाठालोचना एवं व्याख्यान समीक्षा**
ललित कुमार त्रिपाठी .................................. 18

**3. वैशेषिकसूत्र 'सामान्यं विशेष इति बुद्ध्यपेक्षम्' तथा 'भाव' पर व्याख्यानत्रयी की समीक्षा**
ललित कुमार त्रिपाठी .................................. 26

**4. वाजसनेयि प्रातिशाख्य की दीपिका टीका - परिचय एवं विशेषताएँ**
पङ्कज कुमार शर्मा एवं ललित कुमार त्रिपाठी ................ 36

**5. अभिनवकाव्यशास्त्र के प्रमुख नूतन तत्त्व**
अपराजिता मिश्रा ....................................... 46

**6. सरस्वतीकण्ठाभरण के यमक और चित्रबन्ध प्रकरण का अध्ययन - दुष्करचित्र-प्रकाशिका टीका के विशेष आलोक में**
अपराजिता मिश्रा ....................................... 59

**7. संज्ञापरिभाषासूत्राणां कार्यकालपक्षयथोद्देशपक्षविषयको विमर्शः**
विनोद कुमार झा ........................................ 71

**8. वैदिकसाहित्ये व्याकरणविद्या**
भगवत्शरण शुक्ल ........................................ 81

**9. श्रीराघवोल्लासमहाकाव्यस्य प्रतिपाद्यविषयाः**
मनीष कुमार त्रिपाठी ................................... 89

**10. Contributors** ........................................ 159

# प्रमाणैरर्थपरीक्षणं न्यायः

किशोरनाथझा

भारतवर्षं पुरातनकालादेव विविधविद्यानां प्रशस्तमायतनं विद्यते। यासां किल -

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश॥

इति याज्ञवल्क्यसंहितायां समासतः समुद्देशः। अत्र च न्यायविस्तरपदेन गौतमीयन्यायस्यैव ग्रहणं, न तु बौद्धजैनादिन्यायानाम्। तेषामवैदिकत्वात्। वेदसाहचर्येण वैदिकशास्त्राणां परिग्रहस्यैव सर्वथौचित्यम्। किञ्च बौद्धादिन्यायानामुपजीव्यमपि गौतमीयमेव न्यायशास्त्रं विद्यते निर्विवादम्। नागार्जुनस्य वैदल्यसूत्रे गौतमीयन्यायसूत्राणां प्रभावः सुस्पष्टमवलोक्यते।

विद्यामात्रं हि साक्षात्परम्परया वा परमपुरुषार्थं मोक्षं समुपलक्ष्य प्रवर्तते। अस्य चाधिकारिणस्त एव पुरुषधौरेयाः ये सर्वमेव संसारसुखं दुःखानुविद्धं बुद्ध्यमानाः सन्ति निर्विण्णाः विचिन्वन्ति च निरन्तरं तमुपायं येन निखिलदुःखजातस्योपरतिर्भविता। भगवती श्रुतिरपि "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चे"ति व्याहरन्ती तमेवोपायं प्रदर्शयति। अत्र च -

श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः॥

इति स्फुटमभिहितं विद्यते।

उपपत्त्या भवति मननं तच्च मुख्यतयानुमानात्मकमेव। उदयनाचार्यः कथयति कुसुमाञ्जल्यारम्भे -

न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरागता॥[1]
न्यायचर्चानुमानं वा मननस्यैव प्रायः पर्यायः।

अस्य माहात्म्यमधिकृत्य म.म. गङ्गानाथझा संलपति यत् प्रामाणिकोऽपि विषयः केवलशब्दप्रमाणसिद्धस्तादृशीं विश्वासभूमिं नाधिरोहति यादृश्या कल्याणसिद्धिः स्यात्। अत एव भवति प्रयोजनं युक्त्यात्मकस्य न्यायस्येति।

[1] इति खद्योतव्याख्या भूमिका. पृ. 2

न्यायपदस्य व्युत्पत्त्यवसरे न्यायभाष्यकारः कथयति 'प्रमाणैरर्थपरीक्षणं न्यायः' इति अत्र स्वतो जागर्ति जिज्ञासा – किं प्रमाणं, कोऽर्थः, का च तत्परीक्षेति। एतज्जिज्ञासायाः शान्त्यर्थमेव न्यायशास्त्रसम्मतानां षोडशपदार्थानामुपयोगः। न्यायशास्त्रे षोडशपदार्थानां परिगणनं न्यायोपयोगित्वदृष्ट्यैव। पदार्थास्तु अपरिसङ्ख्येया इहाभ्युगता भवितुमर्हन्ति भवन्ति च। अत एवानियतपदार्थवादी नैयायिक इति प्रवादः प्रसिद्धिर्वा।

तथा हि न्यायदृष्ट्या पदार्थतत्त्वज्ञानं निःश्रेयसस्यैहिकाभ्युदयस्यामुष्मिकापवर्गस्य च साधनमिति तद्वित्सु विदितम्, तच्च प्रमाणमन्तरा निर्धारयितुं न शक्यमिति प्राधान्यं प्रमाणस्य। ''प्रमाणतो ह्यर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणमि''ति न्यायभाष्यस्यारम्भिकी पङ्क्तिः ममोक्तिं पुष्णाति।

तत्त्वज्ञानं च प्रमितिस्तदधिकरणं प्रमाता तद्विषयः प्रमेयः तत्साधकं प्रमाणमिति चत्वार्येतानि अर्थपदेनानुगम्यन्ते। 'चतसृष्वेवंविधासु अर्थतत्त्वं परिसमाप्यते' इति भाष्यपङ्क्तेरयमेवाभिप्रायः। यतो हि प्रमाणमाधारीकृत्यैव प्रमातुः प्रमेयविषयिणी प्रमितिः सञ्जायते तस्मात् प्रधानं प्रमाणम्। प्राधान्येन हि व्यपदेशाः भवन्तीति प्रमाणशास्त्रतयाप्यस्य दृश्यते व्यवहारः।

'यावदुक्तोपपन्न इति नैयायिका' इति कुसुमाञ्जलिः। तदर्थस्तु यावतीभिर्युक्तिप्रतिपादिकाभिरुक्तिभिः विवक्षितार्थस्य सिद्धिर्भवति तावतीरुक्तीस्तादृशीः व्याहरन्ति नैयायिकाः इति एतदेव परीक्षा नाम।कस्याप्यर्थस्य सिद्धये साधकप्रमाणं प्रदर्श्य बाधकप्रमाणाभावं प्रदर्शयति। नैयायिकस्तथाप्यसन्तुष्टस्तर्कं प्रयुङ्क्ते इत्यनुपदमस्माभिर्दर्शयिष्यते।

एवं सामान्यतोऽवगते प्रमाणार्थपरीक्षाणां विषये सम्प्रति प्रसङ्ग-सङ्गत्या संक्षेपेण न्यायशास्त्रसम्मतानां षोडशपदार्थानां परिचयेन सहोपयोगोऽभिधास्यते। 'प्रमाणैरर्थपरीक्षणं न्यायः' इति भाष्यवाक्यव्याख्यायां वाचस्पतिमिश्रचरणास्तात्पर्यटीकायामभिदधति 'प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः प्रमाणानि। तैरर्थस्य लक्षणस्य परीक्षणं परीक्षेति। न साक्षात् प्रतिज्ञादयोऽवयवा अर्थपरीक्षायामुपयुज्यन्ते, अपि तु स्वकारणतत्प्रमाणसंसूचनेन। तस्मात् प्रमाणानामवान्तरव्यापाराः प्रतिज्ञादय इत्युपपन्नं प्रमाणैरर्थपरीक्षणम्।' एतावता परार्थानुमानं प्रमाणैरर्थपरीक्षणस्याभिप्रायः। तदेतं न्यायः।

इयमत्र प्रक्रिया। अनुमानं द्विविधं स्वार्थं परार्थं च। स्वार्थनुमाने पञ्चावयवात्मकस्य न्यायस्य उपयोगो भवति परमभिधानं नावश्यमपेक्ष्यते मानसबोधेनापि कार्यमुपपद्यते। परार्थानुमाने परप्रत्यायनाय तदभिधानमवश्यमपेक्षितं भवति। अत्रैव च न्यायशास्त्रीयपदार्थानामुपयोगः। तथा हि कथा त्रिविधा भवति जिज्ञासोः विजी-

गिषोः वैतण्डिकस्य च। वादजल्पवितण्डानामभिः क्रमशस्ताः परिचिताः। कथासु सर्वत्र संशयो भवति प्रयोजकः। जिज्ञासा ज्ञानस्य जननी विना संशयेन नोदेति। अज्ञाते, विशेषेण च ज्ञाते विषये न भवति संशयः, न जायते जिज्ञासा, न वा प्रवर्तते न्यायः। स च संशयः कदाचित् वादकथायां शिष्यस्य, जल्पादौ तु मध्यस्थस्य न्यायहेतुः। वादिप्रतिवादिनौ आत्मसिद्धान्तमधिकृत्य निःसन्दिग्धौ विपरीतं पारस्पारिकं मतमुपस्थाप्य मध्यस्थस्य हृदये संशयं जनयतः। स च विरुद्धकोटिद्वयावगाही भवति।

स्थाणुर्वा पुरुषो वेत्याकारकः विधिकोटिद्वयावगाही स्थाणुत्वस्थाणुत्वाभावबोधकः स्थाणुर्न वा इत्याकारकः विधिनिषेधकोटिद्वयावगाही स्थाणुर्न वा पुरुषो न वेत्याकारकः विधिनिषेधात्मा चतुष्कोट्यवगाही च संशयः नैयायिकैः परम्पराभेदेनाभ्युपगतः। प्राचीननैयायिकास्तु विधिकोटिद्वयावगाहिनि अनेकविधिकोट्यवगाहिनि च संशये सम्मताः न तु विधिनिषेधकोटिद्वयावगाहिनीति प्रत्येमि। अत एव प्रसिद्धिमनुसरन् महाकविः कालिदासोऽभिज्ञानशाकुन्तलेऽभिलपति-

'स्वप्नो नु माया नु मतिभ्रमो नु' इति 'किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखम्' इति च। अस्य च विशेषविचारः गदाधरभट्टाचार्येण केवलान्वयिदीधितिव्याख्यायां विहितः वैशद्येनेति ततोऽवसेयः।

कारणभेदात् कार्यभेदसिद्धान्तं स्वीकृत्य न्यायभाष्यकाराः संशयस्य पाञ्चविध्यं स्वीकुर्वन्ति। साधारणधर्मविशिष्ट-धर्मिज्ञानात्, असाधारणधर्मविशिष्टधर्मिज्ञानात्, विप्रतिपत्तेः, उपलब्धेरव्यवस्थातोऽनुपलब्धेर-व्यवस्थातश्च संशयो भवतीति भाष्यकारः। स्थाणुर्वा पुरुषो वा ? शब्दः नित्योऽनित्यो वा शब्दत्वात् इति विरुद्धयोः पदार्थयोः प्रतिपादकं वाक्यं हि विप्रतिपत्तिः।

न्यायवार्तिककारस्तु कारणभेदात् कार्यभेदसिद्धान्तं स्वीकुर्वन्नपि संशयस्य त्रैविध्यमेव मनुते। उपलब्धेरव्यवस्थया एकपक्षस्य साधकप्रमाणाभावः अनुपलब्धेरव्यवस्थया तस्यैव बाधकप्रमाणाभावः परिगृह्येते। उभौ च संशयमात्रं प्रति कारणतां भजतः। अत एव पार्थक्येन संशयकारणता तत्र नास्ति। येन प्रकारभेदस्तस्य भवेदिति। परवर्तिनस्तु नैयायिकाः वार्त्तिककारमनुगच्छन्ति। संशयसूत्रं तु समानानेकधर्मोपपत्तेः विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः इति।

न्यायप्रवृत्तिहेतुतया प्रयोजनमपेक्ष्यते। अत एवास्य पदार्थताभ्युपगन्तव्या। 'प्रयोजनमनुद्दिश्य न हि मन्दोऽपि प्रवर्तते' इत्यभियुक्तोक्तेः व्यवहारदर्शनाच्च। वादकथायां ज्ञानमन्यत्र जयः प्रयोजनं भवितुमर्हति। तस्मात् न्यायस्य पूर्वाङ्गतया अस्याभ्युपगमः तदाश्रयश्च प्रवर्तते न्यायः, इति भाष्यकृदभिलपत्यत्र। यं पदार्थं हेयमु-

पादेयं वावगत्य हातुमुपादातुं वा प्रवृत्तिस्तत्प्रयोजनं भवति। यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनमितिसूत्रस्यात्रैव तात्पर्यम्। गौणमुख्यभेदेनास्य द्वैविध्यं स्वीकृतम्। सुखं दुःखनिवृत्तिश्च मुख्यं प्रयोजनमनयोरुपायश्च गौणं तदित्यवधेयम्।

प्रतिबोध्यप्रतिबोधकयोः समानतया स्वीकृतो विषयः दृष्टान्तो भवति। इयमेव भिन्नमतयोस्तयोः सिद्धान्तिनोः विप्रतिपन्नस्य च साधरणी भूमिः। यामनुसृत्य विप्रतिपत्तिः निराक्रियते सिद्धान्तश्च प्रतिपाद्यते। अत एवैते संशयप्रयोजनदृष्टान्ताः न्यायस्य पूर्वाङ्गतया सन्ति स्वीकृताः। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति सूत्रे लौकिकपदेन शास्त्रानुशीलनरहितस्य ग्रहणम्। दृष्टान्तज्ञानेन विना उदाहरणवाक्यस्य न्याये प्रवृत्तिः प्रस्तुतिर्वा नैव सम्भवति। अतः महत्त्वमस्याकलनीयम्। अस्य च प्रकारद्वयं साधर्म्यभेदेनाभ्युपगत विद्यते।

न्यायस्याश्रयः सिद्धान्तः। स चात्र चतुर्विधोऽभिहितः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमभेदात्। न्यायपरिगृहीतः सर्वतन्त्रेषु स्वीकृतः सिद्धान्तः प्रथमः। यथा घ्राणादीनामिन्द्रियत्वमात्मनो नित्यत्वं, पृथिव्यादीनां च भूतत्वम्। समानतन्त्रसिद्धोऽपि परतन्त्रासिद्धः द्वितीयः। यथा न्यायवैशेषिकयोः शब्दस्यानित्यत्वं मीमांसायां तस्य नित्यत्वं प्रतितन्त्रसिद्धान्तः। एकवस्तुसिद्ध्यनुसारिणी तावदपरवस्तुसिद्धिस्तृतीयः। तद्द्व्यणुकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमित्या सृष्ट्यारम्भकद्रव्ये द्व्यणुके कर्तृजन्यत्वसिद्ध्या तत्कर्तुः सर्वज्ञत्वस्य सिद्धिः।

अयमभिप्रायः तद्द्व्यणुकस्योपादानकारणं परमाणुरतीन्द्रियः, तदीयप्रत्यक्षेण विना द्व्यणुकोत्पत्तिर्न सम्भवति। अत एव द्व्यणुकस्य प्रत्यक्षकर्ता पुरुषः अतीन्द्रियमपि वस्तु पश्यतीति सर्वद्रष्टृत्वं सर्वज्ञत्वं चायाति ईश्वरे। एषा च सर्वज्ञत्वसिद्धिरधिकरणसिद्धान्तः।

विना विचारेण विरोधिमतं स्वीकृत्य तत्रानुपपत्तिप्रदर्शनं चतुर्थोऽस्य प्रभेदः। यथा शब्दो द्रव्यं नित्यश्चेति मीमांसकाः। तत्र शब्दो द्रव्यं भवतु न वा भवतु इति नैव विचारयन्तो नैयायिकाः शब्दस्य नित्यतां निराकर्तुं प्रयतन्ते। अत एव शब्दस्य द्रव्यत्वं नैयायिकस्याभ्युपगमसिद्धान्तः, न तु मौलिकमतम्।

न्यायस्यास्य पञ्चावयवता प्रसिद्धा। इह चतुर्णां न्यायशास्त्रसिद्धानां प्रमाणानां समावेशोऽथ च तेषामेकार्थप्रतिपत्तौ नियोजनं सञ्जायते। तथा हि प्रतिज्ञायामागमस्य, हेतौ अनुमानस्य, उदाहरणे प्रत्यक्षस्य, उपनये उपमानस्य समावेशः। लौहशलाकाकल्पानां परस्परं विश्लिष्टानां चतुर्णामेकार्थप्रतिपत्तौ नियोजननिगमनस्य कृत्यम्। एते पञ्चैव प्रतिज्ञादयोऽर्थसाधकाः। तस्मादेतेषां न्यायस्यावयवत्वेन स्वीकृतिः सूत्रकारदृष्ट्या। न्यायभाष्ये जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनं, संशयव्युदासश्चेति पञ्चातिरिक्ता अपि अवयवाः मतान्तररूपेणोल्लिखिताः सन्ति किन्तु

नैते परप्रतिपादनायोपयुज्यन्ते अनुमानं तु परप्रतिपादनायैव भवति अत एवोक्तम्-अर्थोपकारकत्वेऽपि तेष्वर्थसाधकत्वं नास्तीत्युपेक्षितम्।

तत्त्वज्ञानस्य फलं भवति हानोपादानोपेक्षाबुद्धिस्तदर्थं सञ्जायते जिज्ञासा। सा च परस्यावबोधनार्थं नैवोपयुज्यते। तस्मात् परप्रतिपादकता तस्य नास्तीति निःसन्देहं वक्तुं शक्यम्। विरुद्धयोः धर्मयोरेक एव धर्मस्तत्त्वं भवितुमर्हतीति संशयोऽपि नार्थस्य कस्यचित्साधकः। प्रमाणेषु प्रमेयबोधजननशक्तिः शक्यप्राप्तिः सा च प्रमातुः प्रमेयबोधार्थानि प्रमाणानि सफलयति न तु परप्रतिपादिका भवति। **प्रयोजनमर्थसाधकवाक्यस्य फलं, न तु साधकवाक्यस्यैकदेशः**।

संशयव्युदासः प्रतिपक्षे हेतोरभावनिर्णयः। स च प्रमाणस्य प्रामाण्यसाधने समुपकरोति, न तु परप्रतिपादकतां बिभर्ति। तस्मादेषु नास्ति न्यायवाक्यावयवतेति अवधार्यते इति न्यायभाष्यकारस्याशयः।

यथा सावयवद्रव्यस्य सकलाः अवयवाः यथायथं मिलित्वा द्रव्यमुत्पादयन्ति तत्स्वरूपं निर्धारयन्ति च तथैव यथाक्रमं प्रतिज्ञादयो पञ्चावयवा मिलित्वा न्यायस्वरूपं महावाक्यं भवत् वक्तुर्विवक्षितमर्थं प्रतिपादयन्ति। तस्मात् यथाक्रममुच्चरिता प्रतिज्ञादिपञ्चावयवात्मिका वाक्यसमष्टिरेव न्याय इति पर्यवस्यति।

अत्र प्रतिज्ञावाक्ये साध्यस्य निर्देशो भवति। उदाहरणस्य साधर्म्यं वैधर्म्यं वादाय साध्यस्य साधनं हेतुर्भवति। साध्यसाधर्म्ययोगी साध्यवैधर्म्ययोगी वा दृष्टान्तः उदाहरणं भवति।

एकत्र सामान्येन दृष्टान्त उपयुज्यते न्यायपूर्वाङ्गतया अपरत्र विशेषेण दृष्टान्तवाचकवाक्यस्योपयोगः उदाहरणतया न्यायस्वरूपतया वेति नात्र पिष्टपेषणता उद्भावनीया।

उदाहरणानुरूपः साध्यसाधर्म्यस्य तद्वैधर्म्यस्य वा समुपस्थापकः उपनयो भवति। हेतुकथनपूर्वकं प्रतिज्ञावाक्यस्य पुनः कथनं निगमनं भवति। फलतः साधर्म्यं वैधर्म्यं चादाय हेतुदाहरणोपनयानां द्वैविध्यं प्रतिज्ञानिगमनयोस्तु एकविधतैव।

अस्यैव परमन्यायस्योत्तराङ्गतया तर्कनिर्णयौ समागच्छतः। अयं च तर्कः प्रमाणस्य सहकारी मानसज्ञानविशेषात्मकः। न्यायप्रयोगेण तत्त्वनिर्णयावसरे तर्क उपयुज्यते। अत एवोत्तराङ्गतास्य सिध्यति।

सामान्यतः ज्ञाते विशेषतोऽज्ञाते विषये सन्दिग्धयोर्द्वयोः धर्मयोः विद्यमानत्वे कारणोपपत्त्यार्थात् युक्त्या अन्यतरस्मिन् धर्मे प्रमाणसद्भावनिर्णयः अस्मिन्नेव धर्मे प्रमाणसद्भावः सम्भवति नापरस्मिन्निति मानसज्ञानविशेषात्मक ऊह एव तर्क इति महर्षिगौतमस्य तर्कसूत्रमभिलपति। **अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञा-**

**र्थमूतहस्तर्कः इति तत्सूत्रम्।**

यथात्मनो नित्यत्वं यत्र यथार्थतो निश्चितं नास्ति तत्रात्मतत्त्वमधिकृत्य सञ्जातायां जिज्ञासायां केनापि कारणेन तन्नित्यत्वे संशये समुपस्थिते सति आत्मनित्यतासाधकप्रमाणाभावे तत्त्वजिज्ञासुर्मनसि तर्कयति आत्मा चेदनित्यः अर्थादुत्पादविनाशशीलः स्यात् तदा कस्यापि संसारापवर्गौ न स्याताम्। तस्मात्तस्योत्पत्तिविनाशशून्यत्वरूपे नित्यत्वे प्रमाणं सम्भवति। इत्थं तर्कसाहाय्येनात्मनो नित्यत्वसंशयनिवर्तनं तर्कस्य भवति प्रयोजनम्। ईदृशेनानुकूलतर्काभिधेन विषयपरिशोधकाभिधेन च तर्केणात्मनित्यत्वसाधकं प्रमाणं सबलं सत् तन्नित्यत्वसाधनक्षमं भवतीति तर्के प्रमाणानामनुग्राहकता समायाति अत्र प्रामाणिके विषये आत्मनित्यत्वे याथार्थ्यनिश्चायकता विद्यते इति विषयपरिशोधकता।

सामान्यतस्तर्कस्यास्य द्वैविध्यमभ्युपगतम् - साक्षात् व्यभिचारशङ्कानिवर्तकः परम्परया व्यभिचारशङ्कानिवर्तकश्च। प्रथमस्तावत् व्याप्तिग्राहको भवति द्वितीयस्तु विषयपरिशोधकः।

धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति साक्षात् व्यभिचारशङ्कानिवर्तकः सन् व्याप्तिग्राहको भवति। धूमस्य वह्निजन्यत्वाभावे स्वीकृते सति धूमोत्पादनार्थं नियमेन वह्नेरुत्पादने लोको न प्रवर्तेत। एवं पर्वते वह्निजन्यत्वाभावस्यारोपेण धूमे साक्षादेव वह्निव्यभिचारशङ्का निवर्तते। अतः व्याप्तिग्राहकता तर्केऽस्मिन् समायाति।

धूमो वह्निव्यभिचारी न वेति व्यभिचारशङ्कानिवृत्तये धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति तर्कोपस्थापने सति तर्कमाध्यमेन वह्निजन्यत्वाभावरूपेण हेतुना वह्निव्यभिचारित्वाभावस्यानुमानं जायते अर्थात् धूमो न वह्निव्यभिचारी यतो हि वह्निजन्यत्वं तस्येत्यनुमीयते। तस्माज्ज्ञायते यत् तर्कद्वारा व्यभिचारशङ्कानिवृत्तौ तर्कस्य व्यक्तिसापेक्षत्वं वर्तते। पुनश्च तर्कस्य मूलभूते अनुमानसाधके वह्निजन्यत्वहेतौ यदि व्यभिचारशङ्का तदा तन्निरासाय पुनः तर्कान्तरापेक्षेति रीत्याऽनवस्थापातात् कदापि व्यभिचारशङ्कानिवृत्तिर्न स्यादिति जायमानायां शङ्कायाम् -

उदयनाचार्यस्तदनुसारिणश्च समादधति - आशङ्केयं सर्वथा निर्मूला। तर्कञ्च व्यभिचारशङ्कानिवर्तकमभ्युपगच्छन्ति। कस्मिन्नपि क्षेत्रे सततं संशयः भवितुं नार्हति। ईदृशोऽपि समयः स्यात् यदा संशयो न भवेदिति। संशयस्तावदेव भवितुमर्हति यावत्कालं संशयिनो जनस्य प्रवृत्तौ व्याघातो न जायते। व्याघातपातानन्तरं कोऽपि ज्ञातुं प्रभवेत् यत् कोऽपि संशयोऽत्र नास्ति। व्याघातो हि संशयावधिरर्थात् मर्यादा विद्यते। धूमवह्नी यदि परस्परं कार्यकारणभावसम्बन्धे आबद्धे विद्येते तदा लोकः धूमार्थं प्रवृत्तः वह्नेरुत्पादने प्रवर्तते। धूमवह्न्योः कार्यकारणभावे संशये सति

धूमार्थिनः वह्न्युत्पादने प्रवृत्तिर्न स्यात् तत्र प्रवृत्तौ व्याघात उपस्थितः भवेत्। यं विषयमधिकृत्य सन्दिग्धस्य प्रवृत्तौ व्याघातोऽर्थात् हानिः सञ्जायते तथाविधं संशय नैव करोति कश्चिदपि। अस्यास्वीकारे सत्यस्यापलापो भवेदिति। तस्मात्सततं संशयो नैव भवितुमर्हति। व्याघातावधिराशङ्केति न्यायकुसुमाञ्जलिरिममेवाभिप्रायं प्रकाशयति।

गङ्गेशोपाध्यायोऽपि अत्राभिलपति – स एव पदार्थः सन्देहस्य विषयो भवति यत्र सन्देहे सति सन्दिग्धव्यक्तेः प्रवृत्तौ व्याघातः न भवति। भोजनं क्षुधानिवर्तकमिति क्षुधार्तः भोजने प्रवर्तते इत्यनुभवसिद्धम्। अतः भोजनं क्षुधानिवर्तकं न वेति कस्यापि सन्देहो न भवति। अन्यथा भोजने निर्विचिकित्सं प्रवृत्तिर्न स्यात्। फलतः सर्वत्र सन्देहो भवेदेवेति नैव वक्तुं शक्यम्। यावदाशङ्कं तर्कानुसरणात् इति चिन्तामणिपङ्क्तिः तर्कः शङ्कावधिर्मतः इति कुसुमाञ्जलिपङ्क्तिश्चामुमाशयं विद्योतयतः।

स्वकर्मणः व्याघातवशात् यदा न भवति संशयस्तदा तत्र तर्कोऽपेक्ष्यते। अतोऽनवस्थायाः सम्भावना निर्मूलिकैव विद्यते।

अस्य च पञ्च प्रभेदाः उदयनाचार्येणाभिहिताः आत्माश्रयोऽन्योन्याश्रयश्चक्रकोऽनवस्था प्रमाणबाधितार्थप्रसङ्गश्च।

स्वस्य स्वापेक्षापादकप्रसङ्ग आत्माश्रयः। कस्यापि वस्तुनः उत्पत्तौ स्थितौ ज्ञप्तौ वा आत्मापेक्षा यदि भवति तदा आत्माश्रयो भवति। रूपवति रूपं तिष्ठति इति रीत्या रूपज्ञाने रूपापेक्षा भवतीत्यात्माश्रयः।

स्वापेक्षितापेक्षित्वमन्योन्याश्रयः। अयं घटो यदि एतद्घटजन्यजन्यः स्यात् तर्हि एतत् घटभिन्नः स्यादिति तदुदाहरणम्।

एतद्घटजन्यं रूपादि तज्जन्यो यदि एतद्घटः स्यात् तर्हि अस्माद् घटाद् भिन्न एव भवेत्। घटस्य रूपादि घटमपेक्षते घटोऽपि स्वोत्पत्तौ यदि स्वगतरूपमपेक्षेत तर्हि परस्पराश्रयता स्फुटैव।

चक्रकस्तु स्वापेक्षणीयापेक्षितापेक्षितत्वम्। अयं घटो यदि एतद्घटजन्यजन्यजन्यः स्यात् तर्हि एतद्घटभिन्नः स्यात्। एतद्घटजन्यं घटगतरूपादि तज्जन्यं घटरूपप्रत्यक्षं तज्जन्यं स्यात् तर्हि घटभिन्न एव भवेत्।

अनवस्था तु सातत्येनारोपजनितानिष्टप्रसङ्गः। यथा प्रागिहोदाहरणं प्रस्तूयाचार्योदयनस्य समाधानं 'व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मत' इति अभिहितम्। अथवा जातिमधिकृत्य जातिकल्पना पुनस्तत्रापरजातिकल्पना पुनस्तत्रजातिकल्पनेति रीत्या सीमाहीना कल्पनैवानवस्था। एभ्यश्चतुर्भ्यः भिन्नोऽनिष्टप्रसङ्गः प्रमाणबाधितार्थप्रसङ्गो भवति।

यद्यपि सर्वदर्शनसङ्ग्रहे व्याघातं, प्रतिबन्दिकल्पना, कल्पनालाघवं, कल्पनागौरवं उत्सर्गापवादवैजात्यानि स्वीकृत्य बाधितार्थप्रसङ्गञ्च सामान्यतर्कस्वरूपमङ्गीकृत्यैकादशविधास्तर्काः प्रपञ्चिताः सन्ति, किन्तु उदयनाचार्येण सम्प्रदाये पञ्चविधा एव तर्का अभ्युपगताः विद्यन्ते। केषाञ्चिन्मते तर्क इव तेऽपि प्रमाणानामनुग्राहका इति तर्कसमकक्षाः भवन्ति न तु तर्कप्रभेदाः इति।

अयञ्च तर्कः अङ्गपञ्चकसम्पन्नः सन् कार्यकरो भवतीति वरदराजाचार्यः सम्प्रदायस्वीकृते तार्किकरक्षाग्रन्थे प्रत्यपादयत्। **अङ्गपञ्चकः सम्पन्नस्तत्त्वज्ञानाय कल्पते** इति हि तत्पङ्क्तिः। तानि चाङ्गानि।

1. व्याप्तिरर्थात् आपादकपदार्थैः सह आपाद्यस्य साहचर्यनियमः।

2. तर्काप्रतिहतिरर्थात् प्रतिकूलतर्केणाप्रतिरोधः।

3. विपर्यये अवसानम् अर्थात् आपाद्यपदार्थस्याभावे पर्यवसानम्।

4. अनिष्टत्वम् अर्थात् आपाद्यपदार्थस्यानभिप्रेतत्वम्।

5. अनुकूलत्वमर्थात् आपत्तेरसाधकत्वमिति। एतेषां विशेषपरिचयः तार्किकरक्षाग्रन्थतोऽवसेयः।

व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये।
अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम्॥[2]

यथा हेतोः पञ्चरूपतायामेकैकस्याभावे हेत्वाभास आपद्यते तथैव तर्कस्यैषु पञ्चस्वङ्गेषु एकैकस्याभावे तर्काभासता प्रतिपद्यते। तस्मात् तर्कतर्काभासयोर्भेदकान्येतान्यङ्गानीति ज्ञेयम्।

अत्रापाद्यः व्यापकः, यस्यापादानं क्रियते। येन आपादनं क्रियते असौ व्याप्यः आपादकः। किन्तु आपादकाभावो व्यापको भवति आपाद्याभावश्च व्याप्य इति वस्तुस्वभावः। धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात् इत्यत्र धूम आपादकः वह्निश्चापाद्यो भवतीति ध्येयम्। शास्त्रेषु या तर्कस्य तार्किकस्य निन्दोपलभ्यते सा तर्काभासविषयिणी, न तु सत्तर्कविषयिणीति मन्तव्यम्।

[2] इति हि तत्रत्या कारिका

अनन्तरं निर्णयो नामापरं न्यायोत्तराङ्गं विचारणीयम्। तत्त्वस्यावधारणं निर्णयः। अयं च निर्णयः न्यायतर्काभ्यां साध्यते, न्याये तु अन्तर्भूतानि सन्त्येव प्रमाणानि। वादिनः प्रतिवादिनश्चात्मसिद्धान्तमधिकृत्य निर्णयः स्वाभाविकः किन्तु मध्यस्थो यदि विपरीतं परस्परविरुद्धं ताभ्यां शृणोति तर्हि तस्य हृदये संशयो जागर्ति। तदपनोदनाय च शास्त्रार्थारम्भः। यस्य युक्त्या मध्यस्थस्य संशयापनोदः स एव वादी प्रतिवादी वा विजयी भवति तस्यैव मतस्यानुमोदनं मध्यस्थेन क्रियते।

अत एव 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' इति न्यायसूत्रं सङ्गच्छते। वादकथायां तु संशयापनोदनं शिष्यस्येति विशेषः।

वादकथायां चत्वारि प्रमाणानि तर्कश्च सिद्धान्तोपेतस्य साधनस्योपालम्भस्य च हेतवो भवन्ति। वादिनोश्च पञ्चावयवैः पक्ष-प्रतिपक्षपरिग्रहः। जल्पकथायां साधनोपालम्भयोर्वा छलजातिनिग्रहस्थानानां स्वीकृतिः प्रयोगो वा जायते इत्यस्य जल्पस्य वादतो विशेषः। वितण्डायां तु पुनर्जल्पस्य सर्वे विशेषास्तिष्ठन्ति केवलमिहात्मपक्षस्थापनं न क्रियते वैतण्डिकेन।

अत्रैव न्यायप्रयोगे सम्भवन्ति दोषास्तेषामपि परिज्ञानमावश्यकम्। अन्यथा स्वयं वादी दोषपङ्कमग्नः वादे विजितो भवेत् प्रतिवादी वापरं वञ्चयेत्। अतः हेत्वाभासच्छलजातिनिग्रहस्थानानामिह परिचयोऽपेक्ष्यते।

अनुमानस्य तर्कस्य च दोषजातम् छलजातिनिग्रहस्थानेषु साधु विद्यते विवृतम्, तथापि हेतुदोषा अपि निर्देष्टव्यतां यान्ति।

अवयवानां प्रत्येकशः दोषसम्भवे सत्यपि गौतमदृष्ट्या सर्वेषां हेतुदोषे पर्यवसानात् हेत्वाभासाः एवेह निर्दिष्टाः। अन्ये अवयवाभासास्तत्रैव परम्परया गतार्थाः भवन्ति। पक्षे पक्षधर्मतायां व्याप्तौ चानुमानस्य प्रधानवाक्यात्मकेषु आश्रयसिद्धिः स्वरूपासिद्धिः सव्यभिचारादिर्वा भवितुमर्हन्ति।

यतो हि पक्षतायां सन्दिग्धसाध्यवत्त्वे पक्षधर्मतायां पक्षे हेतुसत्तायां व्याप्तौ च यदि दोषो भवेत् तर्हि तस्य स्वरूपमुनिर्दिष्टमेव भवेत्। तथा चोक्तम् -

अत एव शास्त्रेऽस्मिन् मुनिना तत्त्वदर्शिना।
पक्षाभासादयो नोक्ता हेत्वाभासास्तु दर्शिताः॥

ते च सव्यभिचारविरुद्धासिद्धसत्प्रतिपक्षबाधिताभिधानाः सन्ति प्रसिद्धाः। पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षासत्त्वमसत्प्रतिपक्षितत्वमबाधितत्वम् चेति पञ्चरूपता अन्वयव्यतिरेकिणः, चतूरूपता च केवलव्यतिरेकिणः केवलान्वयिनश्च सपक्षासत्त्वात् विपक्षसत्त्वाभावाच्च हेतोर्निर्धारिता। तत्रैकैकस्याभावे पक्षासत्त्वे असिद्धिः, सपक्ष-

सत्त्वाभावे विरुद्धः, विपक्षासत्त्वाभावे सव्यभिचारः असत्प्रतिपक्षात्वाभावे सत्प्रतिपक्षत्वम् अबाधिताभावे बाधश्च भवति।

अनुमाने साध्यसाधनार्थं सद्धेतोर्यथापेक्षा तथा वर्जनार्थमसद्धेतोरपि ज्ञानमावश्यकम्। प्रतिवादिना यदि असद्धेतुः प्रयुज्यते तदा तमुद्धाट्य तदपकर्षः प्रकाशनीयः। फलतः सद्धेतोः स्वरूपज्ञानमिवासद्धेतोरपि स्वरूपज्ञानमावश्यकम्।

व्युत्पत्त्या हेत्वाभासशब्दस्यार्थद्वयं लभ्यते। आभासन्ते इति आभासाः। हेतोराभासाः हेत्वाभासाः, हेतुदोषास्तदर्थः। हेतुवदाभासन्ते इति व्युत्पत्त्या तु स दुष्टं हेतुं बोधयति। हेतुरिव प्रतीयमानो वास्तवतया न हेतुधर्मविशिष्टः इत्यर्थः। न्यायभाष्यकारोऽत्र व्युत्पत्तिलभ्यं द्वितीयमर्थं समर्थयति। तथा च तदुक्तिः 'हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः'।

साध्याभाववद् वृत्तिर्हेतुः साधारणानैकान्तिको भवति। पर्वतो वह्निमान् प्रमेयत्वादिति तदुदाहरणम्। यतो हि प्रमेयत्वं पक्षे तु वर्तते सपक्षे महानसे तथा विपक्षे ह्रदे च सन्तिष्ठत इति विदितम्। सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणो भवति। यथा शब्दोऽनित्यः शब्दत्वात्। शब्दत्वमिह पक्षमात्रे वर्तते। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी भवति यथा सर्वमनित्यं प्रमेयत्वादिति त्रैविध्यं व्यभिचारस्य।

साध्यधर्मव्याघातकस्तदभावसाधकश्च हेतुर्विरुद्धो भवति। यथा शब्दः नित्यः उत्पत्तिमत्त्वात् इति।

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षो भवति। यथा शब्दो नित्यः शब्दत्वात् श्रावणत्ववत्। शब्दः अनित्यः कार्यत्वात् घटवदिति।

असिद्धस्त्रिविधः - आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्च। यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव अत्राश्रय एव न सिद्धिमेति। शब्दोऽनित्यः चाक्षुषत्वात् रूपवदिति। अत्र पक्षे शब्दे चाक्षुषत्वं नास्ति। स्वरूपतः हेतुरसिद्धः। अत एव पक्षे हेतुत्वबाधकः स्वरूपेणासिद्धः सङ्गच्छते। सोपाधिको हेतुर्व्याप्यत्वासिद्धो भवति। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। यथा पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोगः। यत्र धूमस्तत्रार्द्रेन्धनसंयोगो वर्तते इति साध्यव्यापकत्वम्। यत्र वह्निरयोगोलके तत्रार्द्रेन्धनसंयोगो नास्ति इति साधनाव्यापकत्वम्।

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णः द्रव्यत्वात् अत्रानुष्णत्वं साध्यस्तदभावः उष्णत्वं स्पार्शनप्रत्यक्षेण वह्नौ गृह्यते इति बाधितत्वम्।

वादिप्रयुक्ते शब्देऽभीप्सितादर्थाद् विपरीतस्यार्थस्य स्वीकारेणार्थदोषप्रदर्शनं छलम्। यथा नेपालादागतोऽयं नवकम्बलवत्त्वात् अत्र नूतनाभिप्रायकं वादिप्रयुक्तं नवपदं प्रतिवादी नवसङ्ख्यापरं परिकल्प्य यदि कथयति कुतोऽस्य नव कम्बला एक एव तु कम्बलस्तर्हि वाक्छलं सञ्जायते। अस्य च त्रैविध्यमिहोपवर्णितम्। वाक्छलसामान्यच्छलोपचारच्छलभेदात्।

सम्भवति ब्राह्मणे विद्याचरणसम्पदित्युक्तौ कश्चिदाह तर्हि व्रात्ये वटौ च ब्राह्मणजन्यतया विद्याचरणसम्पत् न दृश्यते इति सामान्यच्छलम्। मञ्चाः क्रोशन्तीति उक्तौ यदि कश्चिदभिलपति चैतन्यरहितः मञ्चः सचेतनक्रियां क्रोशनं कथं कुर्यादिति। उपचारच्छलम्। मञ्चपदस्य मञ्चस्थपुरुषेषु लक्षणा।

जातिरिह पारिभाषिकमसदुत्तरवाचकम्। वादी न्यायं प्रयुङ्क्ते तत्र प्रतिवादी यदि केवलं साधर्म्यं वैधर्म्यं वादाय साध्यधर्मस्याभावमापादयन् वादिनः पक्षं खण्डयति तदा प्रतिवादिनः उत्तरं जात्युत्तरतां भजते। यथा शब्दोऽनित्यः कार्यत्वात् घटवदिति वाद्युक्तिः। अत्र प्रतिवादी कथयति घटसाधर्म्यं जन्यत्वं यदि शब्देऽस्ति तर्हि आकाशसाधर्म्यस्यामूर्तत्वस्यावस्थित्या नित्येन शब्देन भवितव्यमिति उत्तरं जातिः। अत्रैव यदि प्रतिवादी ब्रूयात् घटसाधर्म्यं यथा जन्यत्वं तथा तद्वैधर्म्यममूर्तत्वं शब्दे विद्यते इति नित्येनैव तेन भवितव्यमिति वैधर्म्येण प्रत्यवस्थानं प्रतिवादिनः जात्युत्तरम्। "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" इति न्यायसूत्रस्य संक्षेपेणैष एवाभिप्रायः। अस्याश्चतुर्विंशतिः प्रभेदाः सन्ति वर्णिताः।

अस्याश्चासदुत्तरत्वमेवमवधातव्यम्। शब्दे आकाशसाधर्म्यं घटवैधर्म्यं चामूर्तत्वमुपलभ्यते परं तेन सह नित्यत्वधर्मस्य नास्ति व्याप्तिरविनाभावो वा सम्बन्धः। यतो हि रूपाद्यनित्येष्वपि पदार्थेषु अमूर्तत्वमुपलभ्यते। तस्मादयममूर्तत्वधर्मः नित्यत्वव्यभिचारी भवति। अविनाभावसम्बन्धमविचार्यैव प्रतिवादी साधर्म्यरूपेण वैधर्म्यरूपेण वा अमूर्तत्वमादाय नित्यत्वं शब्दे साधयितुं प्रवृत्तः इति पारिभाषिकीं जातिमिह प्रयुङ्क्ते।

वादी यदि ब्रूयात् भवदुक्त्या दोषो न जायते मम मते प्रत्युत अदूषकवचनसाधर्म्येण भवदुक्तेरेव व्याघातकमेतद्वचनम् भवतामिति। तर्हि मौनावलम्बनं विना कोऽन्यः प्रतिकारः प्रतिवादिनः स्यादेवमेव स्वमतव्याघातकत्वमेव जातिलक्षणतयाभिहितमाचार्योदयनेन। पराजयः खलीकारो विवक्षितार्थप्रतिपादकत्वरूपः वा निग्रहः तस्य स्थानमर्थात् कारणं निग्रहस्थानपदेन विवक्षितं सूत्रकारस्य। वादिनः प्रतिवादिनो वा विपरीतज्ञानमज्ञानं वा निग्रहस्थानस्य हेतुः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति न्यायसूत्रस्यैतदेव तात्पर्यम्। अस्य च द्वाविंशतिः प्रभेदाः प्रतिज्ञाहान्यादयः सन्ति वर्णिताः।

प्रतिसन्धानपरयोर्जल्पवितण्डयोस्तदुपकारकाणां च छलजातिनिग्रहस्थानानां व्यवहारे स्ववाक्येषु परिवर्जनं परवाक्येषु चोद्भावनं प्रयोजनमित्येतेषां परिज्ञानमावश्यकम्। तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षाणार्थं कण्टकशाखावरणवदिति न्यायसूत्रमेतदेव प्रतिपादयति।

एवं च वादजल्पवितण्डात्मिकाः कथाः न्यायस्य भूमिः संशयप्रयोजनदृष्टान्तास्तत्पूर्वाङ्गं, सिद्धान्त आश्रयः, अवयवसमष्टिः शरीरं स्वरूपं वा, तर्कनिर्णयौ उत्तराङ्गं, हेत्वाभासच्छलजातिनिग्रहस्थानानि न्यायस्य परिशोधकानि प्रमाणमात्मस्थानीयमिति प्रमेयातिरिक्तानां पञ्चदशपदार्थानां न्यायदर्शनसम्मतानां न्यायप्रयोगेऽस्मिन्नुपयोगः इत्यवलोकितस्माभिः विहङ्गमदृष्ट्या। प्रमेयमधिकृत्यैव यतो विचारोऽतः विषयतया परीक्ष्यस्य तस्याप्यत्र समावेशः। अन्यथा आलम्बनाभावे कथं प्रवर्तेत न्यायः।

इदानीं स्वातन्त्र्येण प्रमाणप्रमेययोः परिचयः मधुरेण समापयेदिति न्यायात्। प्रमाणानि चात्र चत्वारीति विदितं प्रत्यक्षमनुमानमुपमानं शब्दश्च। येन यद्विषयकं यथार्थज्ञानं साध्यते स तत्र प्रमाणं भवति। यथार्थानुभवकरणत्वं हि प्रमाणसामान्यलक्षणम्।

प्रत्यक्षज्ञानमिन्द्रियार्थसन्निकर्षेण जन्यते अतः सः सन्निकर्षः एव प्रत्यक्षप्रमाणम्। प्रयोजकं तत्रेन्द्रियमतस्तत्रापि प्रत्यक्षप्रमाणतया औपचारिको व्यवहारः। हानोपादानोपेक्षाबुद्धेस्तु मुख्यं कारणम् इन्द्रियार्थसन्निकर्षेण जनितं प्रमात्मकं प्रत्यक्षज्ञानमत एव तस्यापि प्रमाणतया व्यवहारो भवति। हानादिबुद्धिरेव प्रमाणस्य चरमफलतया स्वीकारात्।

नव्यास्तु व्यापारवत्कारणं करणमिति मन्यमानाः इन्द्रियमेव प्रत्यक्षप्रमाणमिति कथयन्ति सन्निकर्षस्य व्यापारतया व्यापारवत्त्वाभावात्।

अनुमितौ हेतुसाध्ययोः सम्बन्धस्य प्रत्यक्षं ज्ञानमपेक्षते पुनश्च हेतोः प्रत्यक्षं पश्चात् तत्सम्बन्धविशिष्टस्य हेतोः स्मरणं पुनरनुमितिरिति प्रक्रिया। हेतुर्व्याप्यो भवति साध्यं च व्यापकं भवति। तथा वह्निमान् धूमादित्यनुमितौ प्रथमतः महानसे वह्निधूमयोः सम्बन्धस्य प्रत्यक्षात्मकं ज्ञानमभवत् पुनः पर्वतेऽविच्छिन्नमूलां धूमरेखां वीक्ष्य यत्र धूमस्तत्र वह्निरिति सम्बन्धविशिष्टस्य धूमस्य स्मरणेनानुमितिर्जायते। व्याप्तिविशिष्टस्य पक्षधर्मताज्ञानस्यार्थात् परामर्शस्य साक्षात् कारणता यत्र धूमस्तत्र वह्निरिति अविनाभावविशिष्टस्य धूमस्य पर्वतवृत्तिता पर्वते वह्निमनुमापयति। अत एव परामर्शः अनुमितेः साक्षात् हेतुतया चरमकारणतया च अनुमानात्मकं प्रमाणम्। तज्जन्यं च पर्वतो वह्निमानिति अनुमित्यात्मकं ज्ञानम्। सम्बन्धश्चात्र व्याप्तिरिति प्राचीनतम्। नव्यास्तु व्याप्तिज्ञानमनुमितेः करणम्। अत एव तदेवानुमानं व्यापारवत्कारणस्यैव

करणत्वात्। परामर्शस्तु स्वयं व्यापारात्मकः कथं व्यापारवान् भवेत्।

प्रत्यक्षज्ञानवदत्रापि हानोपादानोपेक्षाबुद्धिजातं प्रति करणतया अनुमितिरपि प्रमाणपदवीं लब्धुमर्हति।

पूर्वतः प्रसिद्धस्य पदार्थस्य साधर्म्यात् साध्यस्य अप्रसिद्धपदार्थस्य साधनमुपमानं भवतीति गौतमः। ज्ञातः प्रसिद्धस्तस्य साधर्म्यात् अज्ञातस्य साधनं भवति। यथा गवये गोरसाधरणो धर्मः गलकम्बलादिर्नास्ति किन्तु तस्य बहु साधर्म्यं तत्र विद्यते। गोसदृशो गवयः इत्यारण्यकेनाभिहितं वचनं श्रुत्वा मनसि तदाशयं धार्यमाणः नागरिकः अरण्ये गवयं वीक्ष्य गोसादृश्यं च तत्र प्रत्यक्षीकृत्य पूर्वश्रुतस्य आरण्यकवाक्यस्यार्थं स्मरति अनन्तरं च गवयपशौ गवयशब्दवाच्यत्वनिश्चयः भवितुमर्हतीति उपमानप्रमाणस्यावश्यकता।

प्रसिद्धेन गवा सादृश्यात् संज्ञासंज्ञिलक्षणसम्बन्धस्य गवये ज्ञापनमुपमानमिति भाष्यकारभिप्रायः। प्रसिद्धं साधर्म्यं यस्य प्रसिद्धेन साधर्म्यं यस्येति वा व्युत्पत्तिं स्वीकृत्य प्रसिद्धसाधर्म्यात् गवयात् समाख्यासम्बन्धप्रतिपत्तिरूपमानमिति उद्योतकराचार्याभिप्रायः।

अत्र यथा गौस्तथा गवय इति पूर्वश्रुतं तत्स्मरणं वा वाक्यमुपमानं प्रमाणमुपमितिकरणत्वात्। उक्तवाक्यश्रवणानन्तरमपि यावद् वने गवये पूर्वदृष्टस्य गोः सादृश्यं न प्रत्यक्षीक्रियते तावत् न तत्र गवयशब्दवाच्यत्वबोधो भवितुमर्हति। अतस्तस्याप्तवाक्यत्वेऽपि एतस्मिन्विषये तत् शब्दात्मकं प्रमाणं न भवति, अपि तु स्वतन्त्रम् उपमानं स्वीकर्तव्यम्।

वार्त्तिककारस्तु उक्तवाक्यार्थस्मरणसहकृतं तत्सादृश्यप्रत्यक्षमुपमितिकरणतया मनुते अतस्तदेवोपमानं प्रमाणम्। वाक्यार्थस्मरणं चात्र व्यापारतया स्वीकार्यम्। भाष्यकारस्तु व्यापाररूपचरमकारणमेव मुख्यं कारणमतस्तदेव मुख्यतयोपमानं नाम प्रमाणमिति कथयति। हानोपादनोपेक्षाबुद्धिजातं प्रति तु उपमित्यात्मकं ज्ञानमपि करणमिति तत्राप्युपमानप्रमाणप्रयोगः।

प्राभाकरमीमांसकस्तु नैयायिकेन सह मतद्वैधं प्रदर्शयति। अत एव दृष्टगोः पुरुषस्य तत्सदृशं गवयं पश्यतो यद्गोविषयकं गवयगतसादृश्यज्ञानं तदुपमानमित्याह। यथा गवयदर्शनं गोस्मरणस्येति शाबरभाष्यसन्दर्भोऽत्रानुकूलतां भजते। गोः स्मरणं यस्येति व्युत्पत्त्या गां स्मरतीति व्युत्पत्त्या वा गोस्मरणस्येति गोः स्मरणकर्तुः पुरुषस्येत्यर्थः।

सादृश्यात् दृश्यमानात् यत्प्रतियोगिनि।
जायते सादृश्यविषयं ज्ञानमुपमानं तदुच्यते॥

इति ऋजुविमलापञ्चिकायां शालिकनाथाचार्यः तस्मान्नैयायिकमीमांसकयोरुपमानस्वरूपे भेदः सम्यगवगन्तव्यः।

शब्दो द्विविधः लौकिकः वैदिकश्च। दृष्टार्थको लौकिकोऽदृष्टार्थको वैदिकश्च। आप्तोक्ततयास्य प्रामाण्यम्। यो हि जनो यं विषयं तत्त्वतो जानाति स तस्मिन्विषये आप्तः। आर्यम्लेच्छादिसाधारणत्वमाप्तत्वं नैयायिकानामनुमतम्। न तु रागादिवशादपि नान्यथावादी आप्त इहाभिप्रेतः। अन्यत्र मिथ्याभाषणशीलोऽपि जिज्ञासितार्थविवक्षितार्थयोरुपदेशावसरे योऽन्यथा न वक्ति स एवेह आप्तः। अतो यथा शास्त्रजिज्ञासायां यथा गुरुचरणस्याप्तता यथा धूमयानारोहणावसरे कुलीपदवाच्योऽप्याप्तस्तद्विषयाभिज्ञताया उभयत्र तुल्यत्वात्।

अत्र च शब्दप्रमितेः करणं पदज्ञानं, व्यापारश्च वाक्यार्थस्मरणं, शाब्दबोधः फलं वृत्तिज्ञानमाकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानि च सहकारीणि इति नव्याः।

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥

अस्मिन्मते व्यापारवत्कारणस्यैव करणत्वमिति। प्राचीनानां मते तु ज्ञायमानं पदं करणं चरमकारणस्य करणत्वनियममङ्गीकृत्य। किन्तु मौनिश्लोकादौ पदानां मानसज्ञानसत्वेऽपि पदाभावात् न तत्र शाब्दबोधः स्यादिति ज्ञायमानं पदं वाक्यं वा न करणं भवितुमर्हतीति नवीनानामभिप्रायः।

एतानि चत्वार्यपि प्रमाणानि न्यायस्यात्मस्थानीयानि अर्थात् प्रधानानि इत्युक्तं पूर्वम्। दर्शनान्तरेषु यद्यपि एतेभ्यः अधिकानि न्यूनानि च प्रमाणानि सन्ति स्वीकृतानि तथापि तेषां विचारस्य नात्र स्थानं मन्ये।

मुमुक्षूणां प्रधान्येन ज्ञेयो हि विषयः प्रमित्यालम्बनं प्रमेयतया व्यवह्रियते। प्रकृष्टं सर्वश्रेष्ठं प्रमेयं विषयविधया ज्ञेयमिति तद्व्युत्पत्त्यर्थः। महर्षिगौतमदृष्ट्या चैतद् द्वादशविधम् "आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेय"मिति प्रमेयप्रतिपादकं सूत्रम्। एतेषां तत्त्वज्ञानं निःश्रेयसहेतुः।

यद्यपि वस्तुमात्रं यत्प्रमाणेन साध्यते तत्प्रमेयमिति न्यायदर्शनस्य सिद्धान्तः। अत एवैतच्छास्त्रमनियतपदार्थवादितया प्रसिद्धम्। अत्र च साङ्ख्यशास्त्रस्यापि विद्यते सहमतिः। "प्रमेयसिद्धिः प्रमाणाद्धि" इतीश्वरकृष्णकारिकांशाभिप्रायदर्शनात्। 'प्रमेया च तुला प्रामाण्यवदिति' न्यायसूत्रेण प्रमाणस्यापि प्रमेयता भवत्यभ्युपगता। तस्मादनियतपदार्थता सिद्ध्यत्येतच्छास्त्रस्य। न्यायभाष्यकारोऽपि कथयति "अस्त्यन्यदपि प्रमेयं द्रव्यगुणकर्मसामान्यविशेषसमवायाः। तद्भेदेन चापरिसङ्ख्येय-

मिति।"

किन्तु द्वादशविधानामेतेषां प्रमेयाणां साक्षात्कारेण सकलपदार्थविषयकमिथ्याज्ञानस्य निरासोऽथ चापवर्गस्य सिद्धिर्भवतीत्येतदर्थमिहैतेषां निर्देशः। तस्मान्मुक्तिसाधकतत्त्वज्ञानविषयतया पारिभाषिकं प्रमेयं द्वादशविधं स्वीकृतम्।

एतेष्वपि प्रथमचरमौ आत्मापवर्गौ उपादेयौ। शरीरादि दुःखान्तानि यानि मध्यपतितानि तानि दश हेयानि। आत्मोच्छेदः कस्यचिदपि काम्यो न भवति न चासौ भवितुमर्हत्यपि अपवर्गस्य च लाभाय दर्शनमात्रस्यायं महानारम्भः।

स चास्मिन् शास्त्रे आत्यन्तिकदुःखनिवृत्तिरूपः। आत्यन्तिकता चापुनर्भवता। दुःखविमुक्तिश्च सर्वत्र तुल्यतया दर्शनेषु भवति काम्या तदतिरिक्तस्य नित्यसुखस्यानन्दस्य वा तत्रास्तित्वे भवतु नाम विवादः।

यद्यपि सुखं दुःखनिवृत्तिश्चेत्युभयमपि भवति पुरुषस्य काम्यं तथापि विरक्ता दुःखनिवृत्तये यतन्तेऽधिकप्रियत्वात् न सुखोपभोगाय तत्र बहुविधदुःखभोगस्य नान्तरीयकता न तिरोहिता तेषु। अत एव दुःसहेभ्यः दुःखेभ्यस्त्राणाय सुखमपि दुःखानुषङ्गं परिहातुमिच्छन्ति।

अस्य च प्राप्त्युपायप्रकारः न्यायदर्शनस्य द्वितीये सूत्रेऽभिहितोऽस्ति "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति तत्त्वज्ञानेन मिथ्याज्ञानं नश्यति तदभावे दोषनाशस्तदभावे प्रवृत्त्यभावः, प्रवृत्त्यभावे च जन्माभाव तदभावे च दुःखाभाव इति तत्र क्रमः। अनात्मनि आत्मबुद्धिर्विपरीतमसद् वा ज्ञानं मिथ्या भवति। रागद्वेषमोहाश्च दोषाः। शुभाशुभं वा कर्म प्रवृत्तिरिह तु धर्माधर्मौ प्रवृत्तिपदेन ग्राह्यौ। कर्मजन्याभ्यां धर्माधर्माभ्यामनादिकालतो जीवस्य जायते शरीरपरिग्रहात्मकं जन्मेति विदितम्। सति जन्मनि दुःखमवश्यं भवतीति तन्निवृत्त्युपायार्थं शास्त्रारम्भः समुचित एव। "छिन्ने मूले नैव पत्रं न शाखेति" न्यायेन कारणापगमे कार्याभावः स्वाभाविकः इति तत्त्वज्ञानेन दुःखकारणानां विगमे सति कथं दुःखं सन्तिष्ठेत। एतत् तत्त्वज्ञानमहङ्कारनिवृत्त्या सञ्जायते। अहङ्कारनिवृत्तिश्चात्मसंस्कारेण स चात्मविध्युपायैः। तदुपायेषु यमाः नियमाः ध्यानं धारणा समाधिरीश्वरप्रणिधानं चेति पातञ्जलयोगनिर्दिष्टाः प्रतिगृह्यन्त इति महर्षिर्गौतमः। तथा हि-

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः (4/2/9) समाधिविशेषाभ्यासात् (4/2/38) तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः (4/2/9) इति न्यायसूत्राणि कण्ठतस्तमभिप्रायं प्रतिपादयन्ति। योगशास्त्रेऽपि नियमादिषु प्रधानमीश्वरप्राणिधानम् ईश्वरे सर्वकर्मणामर्पणं भक्तिविशेषाचरणं चेति ताभ्यामीश्व-

रानुग्रहो लब्धुं शक्यते।

इदमिहावधेयम्। नापवर्गमात्रमामुष्मिकं फलं परमपुरुषार्थ एव न्यायशास्त्रेण साध्यते अपि तु ऐहिकं फलं लौकिकाभ्युदयोऽपि इति शास्त्रान्तरापेक्षयाधिकमहत्त्वमस्य आकलनीयम्। लोके शास्त्रे च विचारपरिपाटी न्यायशास्त्ररीतिमनुगच्छति अत एव सरसतापादकं साहित्यं भवतु जटिलतमं वा वेदान्तादिदर्शनं भवतु सर्वत्र न्यायशास्त्ररीत्यैव विचाराणां दृश्यते परिपाटी। लोकव्यवहारोऽपि न्यायविद्यापरिशोधितप्रमाणादिभिरेव सर्वविद्याप्रतिपाद्यानि कर्माण्यादाय प्रचलति। अन्यथाऽपाटवेन तत्र वञ्चितो भवति। तदुक्तं न्यायभाष्यकारेण - 'इमास्तु चतस्रो विद्याः पृथक्प्रधानाः प्राणभृतामनुग्रहायोपदिश्यन्ते। यासां चतुर्थीयमान्वीक्षिकी। तस्याः पृथक्प्रस्थानाः संशयादयः। तेषां पृथग्वचनमन्तरेण अध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः'।

तस्मात् न्यायः संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते इति। अत्र चतसृषु विद्यासु वार्ताशास्त्रं कृषिवाणिज्यादिप्रतिपादकं, दण्डनीतिः राजधर्मसाधिका, त्रयी वेदः आन्वीक्षिकी चेयं परिगण्यन्ते।

न केवलं न्यायभाष्यं न्यायवार्त्तिकमपि दृष्टादृष्टभेदेन निःश्रेयसः द्वैविध्यं प्रतिपाद्यापवर्गेण सह लौकिकमभ्युदयं दृष्टनिःश्रेयसतया परिगृह्णाति।

तस्मान्मुक्तिप्रतिपादकत्वेनाध्यात्मविद्या लोकोपकारकारितया च लोकविद्येयं न्यायविद्येति सकलविद्यापेक्षया अस्याः समुत्कर्षः आकलनीयो भवति। अत एव च कौटिल्येनार्थशास्त्रे प्रथमतया, न्यायभाष्ये च वात्स्यायनेन पश्चात् पद्येनानेन प्रशंसितेयं न्यायविद्या -

प्रदीपः सर्वशास्त्राणामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शाश्वदान्वीक्षिकी मता॥

भारतवर्षेऽस्मिन् आचारविचारयोः प्राधान्यं ज्ञाननिधिभूतस्य वेदस्य काण्डद्वयमेतयोराचारविचारयोः आधारभित्तौ सन्तिष्ठते। कर्मकाण्डमाचारं बोधयति ज्ञानकाण्डं च विचारम्। इदानीं 'रिलीजन एण्ड फिलासाफी' सर्वदर्शने उच्येते। तयोरप्यत्रैव तात्पर्यम्। ज्येष्ठशुक्लदशम्यां गङ्गास्नानेन दशविधपापक्षयो भवति इति दशहरा दशमी तन्नामेति पुराणनिर्णीतिः। देवीपदाम्भोजयुगार्चकानां भुक्तिश्च मुक्तिश्च करस्थितैवेति आगमनिश्चयः देव्यर्चने देवार्चने वा प्रवर्तयति। स्वर्गकामोऽश्वमेधेन यजेत इति विधिः मा हिंस्यात् सर्वभूतानि इति निषेधश्च श्रुतिकथा तथाचरणे प्रवर्तयति इति वेदपुराणागमेषु त्रिस्कन्धेषु धर्मवृक्षेषु भारतीयोऽयं सनातनो धर्मोऽवतिष्ठते आचरणात्मकः।

विचारेण विनार्थात् इष्टसाधनतायाः कृतिसाध्यतायाश्च ज्ञानेन विना कथं कुत्रापि प्रवृत्तिरिति विचारोऽपेक्ष्यते। अयमेव विचारः दर्शनशास्त्रम्। दर्शनेन विना इष्टसाधनतायाः कृतिसाध्यतायाश्च ज्ञानं नैवार्हति भवितुम् इत्युभयोः परस्परपरिपूरकताऽवसेया। तत्रापि परस्मिन् आत्मविचारस्य सङ्क्रान्तिः कथं कार्येत्यत्र न्यायस्योपयोगः, विचारपरिपाटी एव न्यायः। अत एव सर्वविद्यायाः प्रदीप इवैतच्छास्त्रं प्रकाशकमुपायश्च सर्वकर्मणामाचारात्मकानामाश्रयश्च विचाराचारप्रकाशकोपायतया धर्माणामिति श्लोकार्थस्य चरितार्थता बोद्धव्या।

किमपि दर्शनं विचारकोटौ समागच्छति तत्र चाचारः सहैवातिष्ठते चार्वाकदर्शनस्यापि आचारः पृथक् योगशास्त्रे आसीदिति श्रूयते।

भगवद्गीतायामुक्तम् - 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' अत्र शास्त्रं सामान्येन दर्शनम्। यमनियमधारणाध्यानसमाधिभिराचरणजातैरीश्वरप्रणिधानेन वात्मसंस्कारः कार्यः इति महर्षिगौतमवचनमाचारं व्यपदिशतीत्युभयत्रोभयोः समन्वय एव भारतीयदर्शनस्य वैशिष्ट्यमवगन्तव्यम्।

कोऽयं ललाटतटनेत्रपुटस्य गर्वात्
खर्वीकरोति जगदित्यभिधाय शम्भौ।
यः साभ्यसूयमकरोच्चरणेऽक्षिलक्ष्मीं
जीयात्स गौतममुनिर्मुनिवृन्दवन्द्यः॥

श्रीजगन्नाथार्पणमस्तु

# वैशेषिकसूत्र "लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः" पाठ की उच्चतर पाठालोचना एवं व्याख्यान समीक्षा

ललित कुमार त्रिपाठी

आचार्य अनन्तलाल ठक्कुर द्वारा सम्पादित एवं मिथिलाशोधसंस्थान द्वारा प्रकाशित अविज्ञातकर्तृक व्याख्या, जिसे प्रकृत लेख में मिथिलावृत्ति के नाम से उल्लिखित किया जा रहा है, में वैशेषिक सूत्रों के पाठ, चन्द्रानन्द द्वारा रचित वृत्ति एवं शंकर मिश्र के उपस्कार में प्राप्त सूत्रपाठ से बहुत स्थलों में भिन्न रूप में प्राप्त होते हैं।[1] प्रकृत लेख मिथलावृत्ति में प्राप्त सूत्रपाठ "लिङ्गाविशेषाद् विशेषलिङ्गा-भावाच्चैको भावः" की उच्चतर पाठालोचना के आधार पर प्रामाणिकता प्रस्तुत करता है। सम्पादक ने मिथलावृत्ति का सम्पादन एकल पाण्डुलिपि, जो मूलतः मलयालम् लिपि में लिखी थी, के लिप्यन्तरण के आधार पर किया है।[2] सम्पादक के अनुसार हस्तलेख में ग्रन्थ एवं लेखक के नाम का कोई उल्लेख नहीं है, अतः सम्पादक ने इसे 'व्याख्या' नाम दिया है।[3] मिथिलाशोधसंस्थान से प्रकाशित होने के कारण चन्द्रानन्दवृत्ति के सम्पादक ने इसे मिथिलावृत्ति के नाम से उल्लिखित किया है।[4] प्रकृत लेख में भी इसे मिथिलावृत्ति का ही नाम दिया गया है। प्रकृत सूत्र की उच्चतर पाठालोचना के आधार पर उक्त पाठ की प्रामाणिकता सिद्ध होने से वैशेषिक सूत्रों पर उपलब्ध वृत्तियों के प्रकृत स्थल के व्याख्यानों की अप्रमा-णिकता सिद्ध होती है। साथ ही वैशेषिक सूत्रों के यथासूत्र व्याख्यान की दिशा में मूल वैशेषिक सिद्धान्त, जो अभी भी अपव्याख्यानों से ग्रस्त होने के कारण यथावत् रूप में प्रचलित नहीं हो सके हैं, उनके भी प्रामाणिक रूप से प्रस्तुत करने का मार्ग

[1] च. वृ. प्रथमं परिशिष्टम् एवं द्वितीयं परिशिष्टम्

[2] The commentary on the Vaiśeṣikasūtras of Kaṇāda, presented in the following pages, is based npon a transcript from a single Malayalam manuscript prepared and supplied to us by the late lamented scholar, V. A. Ramaswami Śāstrin, Professor of Sanskrit, Travancore University (Retired) and lately of the Dictionary Department, Deccan College, Poona, The manuscript was first described in the Journal of the Oriental Institute, Baroda, Vol. I. 1952, pp. 225-7, by Mahopādhyāya Paṇḍita V. Venkatarama Sharma, Vidyābhuṣaṇa, Department of Sanskrit, Travancore University. (मि.वृ. Intro. p. 7)

[3] The name of the author or of the commentary does not appear anywhere. We have called it the Vyākhyā for the sake of convenience. (मि.वृ. Intro. p. 7)

[4] च. वृ., सम्पादनोपयुक्तग्रन्थसूचिः सङ्केतविवरणं च, पृ. 15

प्रशस्त होता है। वैशेषिक सूत्रों के यथासूत्र व्याख्यान प्रचलित न होने का प्रमुख कारण है - वैशेषिक सूत्रों का अतिप्राचीन होना[5] तथा इसकी प्राचीनतम वृत्ति, व्याख्या तथा भाष्यादि ग्रन्थों की उपलब्धता न होने के कारण इसमें आए पाठभ्रंश का होना है।[6]

वैशेषिक सूत्रों पर प्रशस्तपाद से पूर्ववर्ती वैशेषिकसूत्र व्याख्यान या भाष्य सम्प्रति उपलब्ध नहीं है। विभिन्न प्रमाणों से यह ज्ञात होता है कि वैशेषिक सूत्र बुद्ध से पूर्ववर्ती रचना है।[7] प्रशस्तपाद के 'पदार्थधर्मसंग्रह' की व्याख्याओं से यह ज्ञात होता है कि प्रशस्तपाद ने अपने समय में प्रचलित विभिन्न वैशेषिक सिद्धान्तों के विस्तार को संक्षिप्त कर संगृहीत किया था[8], जिससे यह अनुमान लगाया जा सकता है कि प्रशस्तपाद के समय तक वैशेषिक दर्शन में पर्याप्त लेखन किया जा चुका था। प्रशस्तपाद से पूर्व चन्द्रमति की 'दशपदार्थी' जिसका मूल संस्कृत ग्रन्थ वर्तमान में उपलब्ध नहीं है, किन्तु चाइनीज़ अनुवाद के आधार पर आधुनिक विद्वानों ने आंग्ल अनुवाद एवं अध्ययन प्रस्तुत किया है[9], के अध्ययन तथा प्रशस्तपाद के पदार्थधर्मसंग्रह के तुलनात्मक अध्ययन से यह स्पष्ट प्रतीत होता है कि इन दोंनो ग्रन्थों में वैशेषिक दर्शन के सिद्धान्त प्रतिपादन में पर्याप्त मतभेद है। इससे यह सिद्ध होता है कि प्रशस्तपाद के समय तक वैशेषिक दर्शन में विभिन्न व्याख्यान परम्पराएँ भी विकसित हो चुकी थीं। ये दोनों आचार्य वैशेषिक दर्शन की दो भिन्न परम्पराओं का अनुसरण कर रहे थे। वैशेषिक दर्शन में अनेक प्रकार के सिद्धान्तभेद होने के प्रमुख कारणों में व्याख्यानकर्ताओं के द्वारा समानपाठ वाले सूत्रों पर भी भिन्न व्याख्यान किया जाना तो है ही, किन्तु साथ ही अति प्राचीन काल से ही वैशेषिक सूत्रों में आए पाठभेद भी एक कारण है।

वैशेषिक सूत्रों पर प्रशस्तपाद के पश्चाद्वर्ती एवं ऐतिहासिक दृष्टि से महत्त्वपूर्ण प्रमुख तीन व्याख्याएँ सम्प्रति प्रकाशित रूप में उपलब्ध हैं - १. चन्द्रानन्दवृत्ति २.

---

5 The Vaiśeṣika philosophy is supposed to be pre-Buddhistic. (मि.वृ. Intro. p. 7)

6 च.वृ. प्रस्ता. पृ. 5-10

7 टिप्पणी – 5

8 च. वृ. प्रस्ता. टिप्पणी – 2

9 इसका सर्वप्रथम आङ्ग्ल अनुवाद एवं अध्ययन H. UI, के द्वारा किया गया जिसका नाम Vaiseshik Philosophy (daśapadarthasastra) है। इसके पश्चात् Keiichi Miyamoto द्वारा Metaphysics and Epistemology of the Early Vasisesikas, with an Appex Dasapadārthī of Chandramati नामक ग्रन्थ में दशपदार्थी का आङ्ग्लानुवाद समीक्षात्मक टिप्पणी तथा दशपदार्थी की संस्कृत पुनः रचना प्रस्तुत की गई।

मिथिलावृत्ति ३. उपस्कार। यद्यपि अनेक आधुनिक विद्वानों ने भी वैशेषिक सूत्रों पर व्याख्याएँ लिखी हैं[10], किन्तु पाठालोचन की दृष्टि से उक्त तीन व्याख्याएँ ही अधिक महत्त्वपूर्ण हैं।

उपर्युक्त तीनों व्याख्याओं में सर्वप्राचीन व्याख्या चन्द्रानन्दवृत्ति है।[11] चन्द्रानन्दवृत्ति के सम्पादक ने चन्द्रानन्दवृत्ति के सूत्रपाठ को अन्य उपलब्ध सूत्रपाठों की अपेक्षा अधिक प्रामाणिक माना है।[12]

यद्यपि मिथिलावृत्ति चन्द्रानन्दवृत्ति के बाद की रचना है[13], किन्तु इसके सूत्रपाठ की परम्परा का स्रोत चन्द्रानन्दवृत्ति के सूत्रपाठ की परम्परा से सर्वथा भिन्न है।[14] जैसा कि पूर्व में कहा जा चुका है कि मिथिलावृत्ति के सम्पादक ने एकल हस्तलेख के आधार पर इस व्याख्या ग्रन्थ का सम्पादन किया है। यहाँ यह भी अवधेय है कि सम्पादक के अनुसार उपलब्ध मातृका में सूत्रपाठ पृथक् रूप से पठित नहीं है। सम्पादक ने व्याख्या भाग के आधार पर या व्याख्या में मिले हुए सूत्रों को पृथक् कर उन्हें सूत्रपाठ के रूप में पृथक् रूप से व्याख्या भाग के पूर्व योजित किया है।[15]

इस स्थिति में मिथिलावृत्ति के सूत्रपाठ को सूत्रपाठ के रूप में स्वीकार किया जा सकता है या नहीं, यह विचारणीय प्रश्न है। चन्द्रानन्द वृत्ति के सम्पादक के अनुसार मिथिलावृत्ति का सूत्रपाठ प्रायः संदिग्ध है।[16] चन्द्रानन्द वृत्ति के सम्पादक ने मिथिलावृत्ति के सम्पादक द्वारा प्रस्तुत कतिपय सूत्रों के पाठ पर अपनी विमति भी प्रस्तुत की है।[17]

प्रकृत लेख में मिथिलावृत्ति में पठित सूत्र 'लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः'[18] के पाठ को उच्चतर समालोचना के आधार पर चन्द्रानन्दवृत्ति के पाठ 'सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः'[19] एवं उपस्कार में उ-

---

[10] द्र. M.E.A translation with text and notes.
[11] च. वृ., पृ. 12-13
[12] च. वृ., प्रस्ता., पृ. 12
[13] मि. वृ., intro., p. 8
[14] च. वृ., द्वितीयं परिशिष्टम्
[15] मि. वृ. intro., p. 9
[16] च. वृ., प्रस्ता., पृ. 12
[17] मि. वृ. द्वितीयं परिशिष्टम्, पृ. 101
[18] वै.सू. 1.2.16, मि. वृ.
[19] वै. सू. 1.2.18, च. वृ.

पलब्ध पाठ 'सदिति लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः'[20] की अपेक्षा प्रामाणिक पाठ माना गया है।

इस सूत्र की पाठालोचना करने से पूर्व व्याख्याकारों द्वारा इस सूत्र का जो व्याख्यान किया गया है उसे प्रस्तुत कर उसकी समीक्षा करना आवश्यक है। सभी व्याख्याकारों ने इस सूत्र में आए 'भाव' शब्द को सत्ता का पर्याय माना है। इन व्याख्याकारों के अनुसार इस सूत्र द्वारा भाव अर्थात् सत्ता के एकत्व का निरूपण किया गया है। यहां यह उल्लेख करना आवश्यक है कि यद्यपि मिथिला वृत्ति में प्राप्त उक्त सूत्रपाठ अन्य पाठों की अपेक्षा भिन्न है और उस पाठ से भिन्न तात्पर्य ही प्रकट होता है, जिसे आगे प्रस्तुत किया जाएगा, किन्तु मिथिलावृत्तिकार ने भी इस सूत्र का प्रतिपाद्य अन्य व्याख्याकारों की भांति सत्ता के एकत्व का निरूपण ही माना है। प्रकृत लेख में मिथिलावृत्ति के पाठ के आधार पर उक्त सूत्र में आए 'भाव' शब्द को सत्ता का पर्याय नहीं माना गया है, अपितु भाव शब्द को सत्तासहित द्रव्यत्वादि धर्मों का वाचक माना गया है। इस सूत्र द्वारा सत्ता एवं द्रव्यत्वादि सभी धर्मों के एकत्व का प्रतिपादन माना गया है। इस सन्दर्भ में यहां सर्वप्रथम चन्द्रानन्द वृत्ति तथा उपस्कार में उपलब्ध पाठ के आधार पर इस सूत्र का जो तात्पर्य प्राप्त होता है उसकी असङ्गति तथा मिथिलावृत्ति के सूत्रपाठ से जो तात्पर्य प्राप्त होता है, उसकी सङ्गति प्रदर्शित करना आवश्यक है, जिसके आधार पर मिथिलावृत्ति के पाठ की प्रामाणिकता सिद्ध होगी।

चन्द्रानन्दवृत्ति एवं उपस्कार के पाठ के अनुसार सद् इस प्रकार के लिङ्ग के अविशेष होने से तथा विशेष लिङ्ग के न होने से भाव एक ही है। यह सूत्र का शब्दार्थ सिद्ध होता है। सर्वप्रथम सूत्र के उक्त शब्दार्थ को चन्द्रानन्द के अनुसार प्रस्तुत करते हैं—

इस सूत्र में एक शब्द का अर्थ अभेद है, न कि एक सङ्ख्या। लिङ्ग शब्द का अर्थ यहाँ प्रत्यय अर्थात् ज्ञान है। जिस लिङ्ग से अर्थात् 'सत् सत्' इस प्रकार के प्रत्यय (ज्ञान) से सत्ता प्रतीत होती है वह (लिङ्ग अर्थात् 'सत् सत' इस प्रकार का प्रत्यय) सर्वत्र अविशिष्ट है, और विशिष्ट प्रत्यय का अभाव है अतः सत्ता अभिन्न है।[21]

इस सूत्र पर मिथिलावृत्ति की व्याख्या इस प्रकार है– 'लिङ्ग अर्थात् प्रमाण

---

[20] वै. सू. 1.2.17. उप.

[21] 'एक'शब्देन अभेदः कथ्यते, न तु सङ्ख्या। लिङ्ग्यतेऽनेनेति लिङ्गं प्रत्ययः, येन लिङ्गेन 'सत् सत्' इति प्रत्ययेन प्रतीयते सत्ता तस्य सर्वत्राविशिष्टत्वाद् विशिष्टस्य च प्रत्ययस्याभावादभिन्ना सत्ता। (वै. सू. 1.2.18, च. वृ.)

जो सद् इस प्रकार का अनुवृत्त प्रत्यक्ष है। वह सर्वत्र सभी आश्रयों में समान ही है। विशेष से यहाँ भेद अर्थ ग्राह्य है। प्रति व्यक्ति सत्ता के भेद का ज्ञापक कोई प्रमाण भी नहीं है। इसलिए सत्ता सभी व्यक्तियों में समवेत है, व्यक्ति सर्वगत और नित्य है।[22]

अब हम इस सूत्र पर उपस्कार के व्याख्यान को प्रस्तुत करते हैं - 'सद्' इस प्रकार का ज्ञान या 'सद्' इस प्रकार का शब्द प्रयोग सत्ता का लिङ्ग है। यह लिङ्ग द्रव्य, गुण एवं कर्म में समान है, अविशिष्ट है। अतः सूत्रोक्त भाव अर्थात् सत्ता द्रव्य, गुण एवं कर्म में एक ही है। अन्यथा द्रव्य, गुण एवं कर्म के तुल्य व्यक्ति (आधार) होने के कारण या सत्ता जाति नहीं स्वीकार्य होगी या तो द्रव्यत्व, गुणत्व तथा कर्मत्व जाति नहीं होगी। उक्त कथन का तात्पर्य यह है कि यदि द्रव्य में, गुण में तथा कर्म में तीन प्रकार की भिन्न सत्ता जाति मानी जाएगी तो द्रव्य में सत्ता भी और द्रव्यत्व भी, गुण में द्रव्याश्रित सत्ता से भिन्न सत्ता भी और गुणत्व भी इसी प्रकार कर्म में द्रव्याश्रित सत्ता तथा गुणाश्रित सत्ता से भिन्न सत्ता भी और कर्मत्व भी दोनों नहीं मान सकते हैं। क्योंकि द्रव्य रूप आश्रय द्रव्याश्रित सत्ता का तथा द्रव्यत्व का समान है इसी प्रकार गुण एवं कर्म का भी। अतः तुल्यव्यक्तिकतया तीनों में या तो भिन्न भिन्न सत्ता ही मान लिया जाए या क्रमशः द्रव्यत्व, गुणत्व कर्मत्व ही माने जाएं, किन्तु दोनों की जाति के रूप में स्वीकृति नहीं हो सकती, व्यक्ति के अभेद होने से तुल्यव्यक्तिकत्व रूप जातिबाधकता इन दोनों को जाति मानने की स्वीकृति नहीं देती है।[23]

प्रकृत सूत्र पर तीनों व्याख्यानों के द्वारा सत्ता के एकत्व का प्रतिपादन किया गया है। किन्तु यह प्रतिपादन प्रकृत वैशेषिक सूत्र का प्रतिपाद्य नहीं हो सकता है। इस सन्दर्भ में विचारार्थ इस सूत्र की व्याख्यानसमीक्षा तथा पाठसमीक्षा करना आवश्यक है।

1. सूत्रकार 'सदिति यत द्रव्यगुणकर्मसु सा सत्ता'[24] सूत्र में सत्ता के लिए

---

[22] लिङ्गं प्रमाणं सदित्यनुवृत्तप्रत्यक्षम्। तस्य सर्वत्राविशेषात् एकैक सर्वत्र सत्ता। विशेषो भेदः। प्रतिव्यक्ति सत्ताभेदग्राहिप्रमाणाभावाच्च। तदनेन सर्वव्यक्तिसप्तवेतत्वं व्यक्तिसर्वगतत्वं सर्वकालनिष्ठत्वं नित्यत्वं चोक्तमिति॥ (वै. सू. 1.2.16, मि. वृ.)

[23] सदित्याकारकं ज्ञानं शब्दप्रयोगो वा सत्ताया लिङ्गम्। तच्च द्रव्यगुणकर्मसु समानमविशिष्टम्। तेन भावः सत्ता एकैव तेषु वर्त्तते अन्यथा द्रव्यत्वादिभिस्तुल्यव्यक्तिकतया सत्ता वा न स्यात् तानि वा न स्युः। विशेषलिङ्गाभावाच्चेति। विशेषो भेदस्तत्र याल्लिङ्गमनुमानं तदभावाच्च न भेद इत्यर्थः। भवति हि स एवायं दीप इत्यनुगमस्तत्र यथा विशेषलिङ्गं दीर्घह्रस्वत्वादिपरिमाणभेदस्तथात्र विशेषलिङ्गं नास्तीति भावः॥ (वै. सू. 1.2.17, उप.)

[24] वै. सू. 1.2.7 उप.

"क्ङिति च" इति निषेधसूत्रे पर्युदासार्थकस्य नञोऽनुवृत्तौ नञः तद्भिन्नस्य तत्सदृशस्य च बोधकत्वात् निषेधसूत्रस्यास्य "सार्वधातुकाऽऽर्धधातुकयोः"[8] सूत्रेण सह पदैकवाक्यतायां भवति, अनन्तरं अस्य गुणविधायकस्य सूत्रस्य अर्थो भवति - किद्भिन्ने, गिद्भिन्ने ङिद्भिन्ने च प्रत्यये परे इगन्ताङ्गस्य गुणो भवति। एवम्प्रकारेण अत्र पर्युदासपक्षे निरूप्य-निरूपकभावापन्न-विषयताक-बोधद्वारा पदैकवाक्यता भवति। "क्ङिति च" इति निषेधसूत्रे प्रसज्यार्थकस्य नञोऽनुवृत्तौ नञ् निषेधकृद् भवति तथा च निषेधसूत्रस्यास्य स्वतन्त्रोऽर्थो भवति - किद्भिन्ने, गिद्भिन्ने ङिद्भिन्ने च प्रत्यये परे इगन्ताङ्गस्य गुणो न भवति। अयं वाक्यार्थबोधो गुणविधायकसूत्रस्य वाक्यार्थबोधस्य उपजीव्यो भवति। अतः अस्मिन् प्रसज्यपक्षे उपजीव्योपजीवकभावापन्नविषयताकबोधद्वारा वाक्यैकवाक्यता भवति।

## नागेशभट्टेन स्वीकृतं संज्ञासूत्राणां कार्यकालपक्षविषयकं मतम् -

नागेशभट्टस्य मतानुसारं संज्ञासूत्राणां कार्यकालपक्षे लक्ष्यसंस्कारकः साधुत्वप्रकारको बोधः पृथक्=स्वदेशे न भवति, किन्तु प्रदेशवाक्येन अर्थात् विधिसूत्रेण

8 अष्टा., 7/3/84

सहैव भवति। अतएव "अणोऽप्रगृह्यस्यानुनासिकः"[9] इति सूत्रेण सह एकवाक्यतापन्नम् "अदसो मात्"[10] सूत्रं प्रति मुत्वाद्यसिद्धं न भवति। अर्थात् 'अदस्'शब्दात् प्रथमाविभक्तेर्द्विवचने 'औ' प्रत्यये, 'औ' प्रत्ययस्य "विभक्तिश्च"[11] सूत्रेण विभक्तिसंज्ञा, "त्यदादीनामः"[12] सूत्रेण 'अदस्'शब्दस्य अकारान्तादेशे, "अतो गुणे"[13] सूत्रेण पररूपे, 'अद+औ' इत्यवस्थायां "वृद्धिरेचि"[14] सूत्रेण वृद्धौ सत्याम् 'अदौ' इति अवस्था भवति। 'अदौ' इत्यत्र "अदसोऽसेर्दादुदो मः"[15] इत्यनेन दकारस्य स्थाने मकारः तथा औकारस्य स्थाने ऊकारो भवति ततश्च 'अमू' इति रूपं सम्पन्नं भवति। एवमेव 'अदस्'शब्दात् प्रथमाविभक्तेर्बहुवचने 'जस्' प्रत्यये, तत्र अनुबन्धलोपे, "जसः शी"[16] इत्यनेन असः स्थाने 'शी' इत्यादेशे, तत्रापि अनुबन्धलोपे, 'अदस्+ई' इत्यवस्थायां विभक्तिसंज्ञाद्यभीष्टे कार्ये कृते 'अदे' इत्यवस्थायाम् "एत ईद् बहुवचने"[17] इत्यनेन दकारस्य स्थाने मकारे तथा एकारस्य स्थाने ईकारे कृते 'अमी' इति रूपं सम्पन्नं भवति। अत्र "अदसो मात्" इति सपादसप्ताध्यायीस्थस्य सूत्रस्य दृष्टौ त्रिपादीस्थयोः "अदसोऽसेर्दादुदो मः" तथा च "एत ईद् बहुवचने" सूत्रयोरसिद्धत्वाद् 'अमू', 'अमी' इत्यस्य स्थाने "अदसो मात्" सूत्रमिदं क्रमशः 'अदौ', 'अदे' इति पश्यति तथा च औकारस्य एकारस्य च 'प्रगृह्य'संज्ञां कर्तुं न पारयति। अस्यां परिस्थितौ "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रेण 'अमू', 'अमी' इत्यत्र अप्रगृह्यसंज्ञकस्य क्रमशः ऊकारस्य ईकारस्य च स्थाने अनुनासिकः ऊँकारः ईँकारश्च स्यादिति समस्यायां समागतायां नागेशभट्टस्य मतानुसारं संज्ञासूत्रस्य "अदसो मात्" इत्यस्य कार्यकालपक्षे लक्ष्यसंस्कारकः साधुत्वप्रकारको बोधः पृथक्=स्वदेशे न भवति, किन्तु प्रदेशवाक्येन अर्थात् विधिसूत्रेण सहैव भवति। अतः यदा "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रे 'अप्रगृह्य'शब्दे प्रतियोगिरूपेण समागतस्य 'प्रगृह्य'शब्दस्य ज्ञानापेक्षा भवति, तदा "अदसो मात्" इति संज्ञासूत्रम् "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रस्य देशे गच्छति। तत्र गमनानन्तरं तत्रैव "अदसो मात्" इति संज्ञासूत्रस्य लक्ष्यसंस्कारकः साधुत्वप्रकारको बोधो भवति। एवम्प्रकारेण "अदसो मात्" इति संज्ञासूत्रस्य "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रवत् त्रिपादीस्थत्वात् तस्य दृष्टौ "अदसोऽसे-

[9] अष्टा., 8/4/57
[10] अष्टा., 1/1/12
[11] अष्टा., 1/4/104
[12] अष्टा., 7/2/102
[13] अष्टा., 6/1/97
[14] अष्टा., 6/1/88
[15] अष्टा., 8/2/80
[16] अष्टा., 7/1/17
[17] अष्टा., 8/2/81

र्दादुदो मः" तथा च "एत ईद् बहुवचने" सूत्रयोः सिद्धत्वादेव "अदसो मात्" सूत्रमिदम् 'अमू', 'अमी' इत्यस्य स्थाने 'अमू', 'अमी' एव पश्यति तथा ऊकारस्य ईकारस्य च 'प्रगृह्य'संज्ञां करोति। येन 'अमू', 'अमी' इत्यत्र "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रेण अनुनासिकादेशो न भवति।

असिद्धत्वस्य कार्यार्थतया कार्यज्ञानोत्तरमेव सूत्रप्रवृत्तिर्भवति। कार्यस्य ज्ञानं प्रदेशदेशे (विधिदेशे) भवति। प्रकृतस्थले "अदसो मात्" सूत्रस्य "अदसोऽसेर्दादुदो मः" तथा च "एत ईद् बहुवचने" सूत्रयोर्दृष्टौ असिद्धत्वम् "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रेण प्राप्तस्य अनुनासिकादेशस्य अभावाय वर्तते तथा च कार्यस्य अनुनासिकादेशाभावस्य ज्ञानं "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रस्य देशे भवति। अतः कार्यज्ञानानन्तरं "अदसो मात्" सूत्रस्य प्रवृत्तिर्भवति, तस्मात् "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रस्य देशे गतस्य "अदसो मात्" सूत्रस्य वाक्यार्थबोधः तत्रैव "अणोऽप्रगृह्यस्यानुनासिकः" इति सूत्रस्य देशे तेनैव सह भवति। एवम्प्रकारेण "अणोऽप्रगृह्यस्यानुनासिकः" सूत्रस्य देशे गतस्य "अदसो मात्" इति सूत्रस्य तद्देशस्थत्वाद् अर्थात् त्रिपादीस्थत्वात् "पूर्वत्राऽसिद्धम्"[18] इति सूत्रे पठितेन पूर्वग्रहणेन (सपादसप्ताध्यायीस्थत्वेन) तस्य ग्रहणं न भवति। एवम्प्रकारेण तद्बोधोत्तरमेव अर्थात् विधिदेशे विधिसूत्रेण सह संज्ञासूत्रस्य वाक्यार्थ-बोधानन्तरमेव विरोधप्रतिसन्धानम्=सूत्राणां पारस्परिको विरोधविचारो भवति तथा विधिसूत्रदेशीयपरत्वमेव "विप्रतिषेधे परं कार्यम्"[19] सूत्रस्य प्रवृत्तौ बीजं भवति। अतएव कार्यकालपक्षे 'अयादिभ्यः परैव प्रगृह्यसंज्ञा' इति "अदसो मात्" सूत्रस्य भाष्य उक्ता पङ्क्तिः सङ्गतिं प्राप्नोति। अस्याः पङ्क्तेः तात्पर्यम् एवम्प्रकारेण ज्ञातव्यं यत् वस्तुतः अमी अत्र, अमी आसते, अमू अत्र, अमू आसाते इत्यादिषु "अदसो मात्" सूत्रेण दीर्घस्य ईकारस्य ऊकारस्य च प्रगृह्यसंज्ञा भवति, किन्तु मुत्वादिविधायकयोः "अदसोऽसेर्दादुदो मः" तथा "एत ईद् बहुवचने" सूत्रयोः "अदसो मात्" सूत्रस्य दृष्टौ असिद्धत्वात् यथा अमी अत्र, अमी आसते, अमू अत्र, अमू आसाते इत्यादीनां स्थाने अदे अत्र, अदे आसते, अदौ अत्र, अदौ आसाते "अदसो मात्" सूत्रेण दृश्यन्ते तथैव मुत्वादिविधायकस्य त्रिपादीस्थस्य पूर्वोक्तसूत्रद्वयस्य सपादसप्ताध्यायीस्थस्य "एचोऽयवायावः"[20] सूत्रस्य दृष्टौ असिद्धत्वाद् अदे अत्र, अदे आसते, अदौ अत्र, अदौ आसाते इत्यत्र अयादिसन्धिः कथं न भवतीति प्रश्ने सति तत्र भाष्यकारेण अयम् उपायः प्रदर्शितो यत् सपादसप्ताध्यायीस्थस्य प्रकृतिभावविधायकस्य "प्लु-

---

[18] अष्टा., 8/2/1
[19] अष्टा., 1/4/2
[20] अष्टा., 6/1/78

तप्रगृह्या अचि नित्यम्"[21] इति सूत्रस्य देशे "अदसो मात्" सूत्रस्य आगमनानन्तरम् अस्य वाक्यार्थबोधः **"प्लुतप्रगृह्या अचि नित्यम्"** सूत्रस्य देशे अनेन सह भवति तथा च "अदसो मात्" सूत्रमपि तद्देशस्थं भवति। अस्यां परिस्थितौ "अदसो मात्" सूत्रस्य "एचोऽयवायावः" सूत्रापेक्षया परत्वात् "विप्रतिषेधे परं कार्यम्" इति सूत्रानुरोधेन पूर्वम् अमी अत्र, अमी आसते, अमू अत्र, अमू आसाते इत्यवस्थायां प्रगृह्यसंज्ञा अनन्तरं "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृतिभावो भवति। येन अयादिसन्धिर्न भवति। अनेनेदं सिद्धं भवति यत् कार्यकालपक्षे संज्ञासूत्राणां वाक्यार्थबोधः स्वदेशे न भवति, अपि तु विधिसूत्रदेशे विधिसूत्रेण सह भवति।

**नागेशभट्टेन स्वीकृतम् आकडाराधिकारस्थभपदसंज्ञादिविषये यथोद्देशपक्षविषयकञ्च मतम् -**

किन्तु "आकडारादेका संज्ञा"[22] सूत्रस्य अधिकारे याः भ-पदादिसंज्ञाः आगच्छन्ति, तासां विषये यथोद्देशपक्ष एव स्वीक्रियते तथा च भ-पदादिसंज्ञासूत्राणाम् उपदेशदेशमेव स्वीकृत्य बाध्यबाधकव्यवस्था भवति। अत्र 'अपादानमुत्तराणि कारकाणि बाधन्ते' इति भाष्यं प्रमाणरूपेण अङ्गीक्रियते। एतद्भाष्यानुरोधेन "विप्रतिषेधे परं कार्यम्" इति सूत्रस्य नियमानुसारम् अपादानसंज्ञाविधायकम् "ध्रुवमपायेऽपादानम्"[23] पूर्वसूत्रम् उत्तरकारककर्मकारकसंज्ञाविधायकेन "कर्तुरीप्सिततमं कर्म"[24] सूत्रेण बाध्यते। अन्यथा अत्रापि कार्यकालपक्षस्वीकारे सति "ध्रुवमपायेऽपादानम्" इति सूत्रस्य "अपादाने पञ्चमी"[25] सूत्रस्य देशस्थत्वेन परत्वात् तथा "कर्तुरीप्सिततमं कर्म" इति सूत्रस्य "कर्मणि द्वितीया"[26] सूत्रस्य देशस्थत्वेन पूर्वत्वात् परसूत्रेण "ध्रुवमपायेऽपादानम्" इत्यनेन "कर्तुरीप्सिततमं कर्म" सूत्रस्य बाधः स्यात्। भ-पदादिसंज्ञाविषये स्वदेशे जातग्रहशक्तिद्वारा एव त्रिपाद्यामपि व्यवहारो भवति। अत्र अपि-शब्देन सपाद्याः ग्रहणं भवति। अर्थात् स्वदेशे जातग्रहशक्तिद्वारा सपाद्यां व्यवहारो भवति एव त्रिपाद्यामपि भवति। एषा उपर्युक्तव्यवस्था भ-पदादिसंज्ञासूत्राणां विषय एव अस्ति न तु परिभाषासूत्राणां विषये। अत एव “पूर्वत्राऽसिद्धम्” इति सूत्रे परिभाषासूत्राणां त्रिपाद्यामप्रवृत्तिमाशङ्क्य कार्यकालपक्षेण तस्य समाधानं कृतम्, न तु यथोद्देशपक्षेण। अयं यथोद्देशपक्षः प्रगृह्यसंज्ञाप्रकरणे भाष्ये उक्तो विद्यते, यथा

[21] अष्टा., 6/1/125
[22] अष्टा., 1/4/1
[23] अष्टा., 1/4/24
[24] अष्टा., 1/4/49
[25] अष्टा., 2/3/28
[26] अष्टा., 2/3/2

- 'आगच्छतम् अग्नी इति' अस्याम् अवस्थायां “दूराद्धूते च”[27] इत्यनेन प्लुतसंज्ञायां तथा च "ईदूदेद्द्विवचनं प्रगृह्यम्" इत्यनेन प्रगृह्यसंज्ञायां प्राप्तायां “पूर्वत्राऽसिद्धम्” इति नियमानुरोधेन त्रिपादिस्थां प्लुतसंज्ञां प्रबाध्य सपादसप्ताध्यायीस्था प्रगृह्यसंज्ञा भवति, येन “अणोऽप्रगृह्यस्यानुनासिकः” इत्यनेन अण् ईकारः अनुनासिको न भवति। अन्यथा कार्यकालपक्षे “ईदूदेद्द्विवचनं प्रगृह्यम्” सूत्रस्य “अणोऽप्रगृह्यस्यानुनासिकः” सूत्रस्य देशस्थत्वात् पूर्वत्रिपादिसूत्रस्य “दूराद्धूते च” इत्यस्य दृष्टौ परत्रिपादिसूत्रस्य “ईदूदेद्द्विवचनं प्रगृह्यम्” इत्यस्य असिद्धत्वात् प्रगृह्यसंज्ञाऽभावे “अणोऽप्रगृह्यस्यानुनासिकः” इत्यनेन ईकारोऽनुनासिकः स्यात्, किन्तु ईकार अनुनासिको न भवति अनेनेदं पुष्टं भवति यत् भ-पदसंज्ञादिविषये यथोद्देशपक्षो विद्यते।

इदानीं 'कार्यकालं संज्ञापरिभाषम्' इति द्वितीयायाः परिभाषायाः व्याख्यां कुर्वन् ग्रन्थकारः कथयति - कार्यकालशब्दस्य व्युत्पत्तिरेवम्प्रकारेण विद्यते, यथा - कार्य्येण (विधिसूत्रेण) काल्यते (स्वसन्निधिं प्राप्यते) परिभाषासूत्राणां यत्र, तत्र कार्यकालपक्षो भवति। अर्थात् विधिसूत्रेण स्वसंस्काराय (स्ववाक्यार्थबोधरूपसंस्काराय) स्वस्मिन् स्थितेन चिह्नेन चिह्नितं यत् परिभाषासूत्रं विद्यते तस्य विधेयांशस्य आक्षेपः (स्मरणं) क्रियते इति फलितार्थकथनम्।

कार्यकालपक्षे परिभाषासूत्राणामेव आक्षेपः क्रियते इति कथनेन इदं सिद्धं भवति यदयं कार्यकालपक्षः केवलं परिभाषासूत्राणां कृते एव सीमितो विद्यते।

विधिसूत्रदेशे परिभाषाविधेयांशस्य आक्षेपः (स्मरणं) क्रियते इति कथनेन "पूर्वत्राऽसिद्धम्" इति सूत्रस्थं भाष्यं सङ्गतिं प्राप्नोति। तत्र उच्यते यत् "पूर्वत्राऽसिद्धम्" इति सूत्रानुरोधेन त्रिपादीविधिसूत्रस्य सपादसप्ताध्यायीस्थपरिभाषासूत्रस्य दृष्टौ असिद्धत्वात् त्रिपादीस्थविधिसूत्रे सपादसप्ताध्यायीस्थपरिभाषासूत्रस्य कथं प्रवृतिर्स्यादिति आशङ्क्य भाष्यकारः उत्तरयति यत् यद्यपि त्रिपादीसूत्रं तत्र असिद्धं वर्तते, किन्तु सपादसप्ताध्यायीस्थं सूत्रं तत्र असिद्धं नास्ति, अतः कार्यसिद्धिः स्यात्। किन्तु एतावतापि सपादसप्ताध्यायीस्थपरिभाषासूत्रस्य दृष्टौ त्रिपादीस्थस्य विधिसूत्रस्य असिद्धत्वात् तत्र परिभाषासूत्रस्य गमनानन्तरमपि विधिसूत्रस्य वाक्यार्थबोधो न सम्भवति। अतः अग्रे कथयति भाष्यकारः स्थानमाहात्म्यात् कार्यकालपक्षे परिभाषासूत्रद्वारा विधिसूत्रस्य दर्शनं तथा च वाक्यार्थबोधरूपः संस्कारो भविष्यति यथा स्वर्गरूपस्थानमाहात्म्यात् स्वर्गस्थो जनो देवतां पश्यति। यथा - 'कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् इत्युक्तम्।'

---

[27] अष्टा., 8/2/84

न च "इको गुणवृद्धी"[28] सूत्रोपरि कैयटेन यदुक्तम् - परिभाषासूत्राणां कार्यकालपक्षे विधिसूत्रदेशे गमनं भवति, तस्मात् "ङमो ह्रस्वादचि ङमुँण्नित्यम्"[29] इति सूत्रे 'ङमः' इति पञ्चम्यन्तं पदं दृष्ट्वा "तस्मादित्युत्तरस्य"[30] सूत्रं तथा 'अचि' सप्तम्यन्तं पदं दृष्ट्वा "तस्मिन्निति निर्दिष्टे पूर्वस्य" सूत्रम् उपस्थितं भवति। इदानीम् उभयोः परिभाषासूत्रयोः "ङमो ह्रस्वादचि ङमुँण्नित्यम्" सूत्रस्य देशस्थत्वेन तयोः पूर्वत्वपरत्वयोरभावात् "उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्" इति परिभाषानुरोधेन परत्वात् "तस्मिन्निति निर्दिष्टे पूर्वस्य" परिभाषासूत्रस्य प्रवृत्तिर्भविष्यतीति "तस्मिन्निति निर्दिष्टे पूर्वस्य" सूत्रस्थं भाष्यम् असङ्गतं भवतीति वाच्यम्, "विप्रतिषेधे परं कार्यम्" सूत्रे अष्टाध्यायीपाठकृतपरत्वस्याश्रयणेनादोषात्। अर्थात् कार्यकालपक्षे उपर्युक्तयोः परिभाषासूत्रयोः समानदेशत्वेऽपि अष्टाध्याय्याम् "तस्मिन्निति निर्दिष्टे पूर्वस्य" सूत्रस्य परत्वात् तस्यैव परिभाषासूत्रस्य सहायतया "ङमो ह्रस्वादचि ङमुँण्नित्यम्" सूत्रस्य वाक्यार्थबोधो सम्भूय अचो ङमुडागमो भवति।

परिभाषासूत्राणां कार्यकालपक्षस्य तात्पर्यम् इदं कदापि नास्ति यत् परिभाषासूत्रं स्वदेशत्यागं करोति। वास्तविकता तु इयं विद्यते यत् यथोद्देशपक्षो भवेद् अथवा कार्यकालपक्षो भवेद् उभयत्र पक्षयोः परिभाषासूत्रं स्वविधेयबुद्धिं कारयित्वा विधिसूत्रैः सह एकवाक्यतां प्राप्नोति। यथा - न हि कार्य्यकालपक्ष इत्येतावता तदपैति, पक्षद्वयेऽपि प्रदेशेषु स्वबुद्धिजननेनाविशेषात्। अत्र प्रदेशेषु स्वबुद्धिजननेन इत्यस्य तात्पर्यम् इदं विद्यते यत् यथोद्देशपक्षे परिभाषासूत्रदेशे कार्यकालपक्षे विधिसूत्रदेशे पदैकवाक्यता भवति। अत्र प्रदेशस्य अर्थ उभयविधो भवति - परिभाषादेशो विधिदेशश्च। निष्कर्षरूपेण कथयितुं शक्यते यत् परिभाषासूत्रं वस्तुतः कुत्रापि न गच्छति। केवलं तस्य विधेयबुद्धिद्वारा कार्यं क्रियते। अतः उपर्युक्तयोः परिभाषासूत्रयोः समानदेशस्थप्रयुक्तायाः पूर्वत्वपरत्वशङ्काया अवसरो न समुदेति। कार्यकालपक्षेऽपि अचेतनस्य परिभाषासूत्रस्य स्वदेशपरित्यागपूर्वकं विधिदेशगमनं कथमपि न सम्भवति। एतदतिरिक्तम् अस्माभिर्विधिसूत्रदेशे परिभाषासूत्रविधेयबुद्धिसम्पादनेन परिभाषासूत्रस्य स्वदेशत्यागो न भवति। मूले पठितेन 'अविशेषात्' इति पदेन इदमेव बोध्यते यत् उभयत्र पक्षयोः परिभाषासूत्रस्य पाठदेश एव मुख्यो भवति तथा च तदनुरोधेनैव विप्रतिषेधसौत्री व्यवस्था भवति।

यथोद्देशपक्षो भवेद् आहोस्वित् कार्यकालपक्ष उभयत्र परिभाषासूत्रस्य पाठदेश एव मुख्यो भवतीति स्वीकारकारणादेव "षष्ठी स्थानेयोगा" सूत्रस्य भाष्ये भाष्यकारेण एकदेशस्थस्यैव सर्वशास्त्राभिज्वालकत्वम् उक्तम्। अत एव "तस्मि-

[28] अष्टा., 1/1/3

[29] अष्टा., 8/3/32

[30] अष्टा., 1/1/67

न्निति निर्दिष्टे पूर्वस्य" सूत्रोपरि कैयटेन सूत्रपाठापेक्षया परत्वस्य व्यवस्थापकत्वम् उक्तम्। अर्थात् परिभाषासूत्रस्य पूर्वत्वादिव्यवस्था अष्टाध्यायीपाठाधारिता भवति। यत्तु कैयटेन "इको गुणवृद्धी" सूत्रोपरि उक्तम् - "तस्मिन्निति ..." तथा "तस्मादि..." परिभाषासूत्रयोरेकदेशस्थत्वात् तत्र पूर्वत्वपरत्वयोर्निर्णयो भवितुं न शक्नोति, तच्चिनिन्त्यमेव। कारणं स एव अग्रे कथयति पूर्वत्वादिव्यवस्था अष्टाध्यायीपाठापेक्षया भवति। अन्यथा सर्वशास्त्राणां प्रयोगार्थत्वात् प्रयोगरूपैकदेशस्थत्वेन क्वापि एकदेशस्थानां पूर्वत्वादिव्यवस्था न सम्भवति। एतदतिरिक्तं "क्ङिति च" इति सूत्रस्थकैयटरीत्या विधिसूत्राणां यथोद्देशपक्षे परिभाषासूत्रसान्निधानेन तेषां परत्वं व्याहन्येत। एवम्प्रकारेण 'वृक्षेभ्यः' इत्यत्र 'वृक्ष+भ्यस्' इत्यवस्थायां "सुपि च"[31] इति बाधित्वा परत्वात् "बहुवचने झल्येत्"[32] इत्यनेन एत्वं भवतीति कथनमपि उच्छिन्नं स्यात्, उभयोः सूत्रयोः 'वृक्षेभ्यः' इति प्रयोगरूपैकदेशस्थत्वात्। अतः परिभाषासूत्राणाम् एकदेशस्थत्वं स्वीकृत्य समुत्पन्ना शंका निराधारा एव। एवम्प्रकारेण संज्ञापरिभाषासूत्राणां कार्यकालपक्षविषयको यथोद्देशपक्षविषयकश्च विमर्श अत्रैव समाप्तिमेति।

**शब्दसंकेत**

1. अष्टा. - अष्टाध्यायी

**सन्दर्भग्रन्थसूची**

1. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, सम्पा. श्रीगोपालदत्तपान्डेयः, चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७
2. बालमनोरमा-तत्त्वबोधिनीसहिता वैयाकरणसिद्धान्तकौमुदी, प्रकाशक- मोतीलाल बनासीदास, दिल्ली, वाराणसी, पटना, पुनर्मुद्रण दिल्ली, १९७९
3. श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेतः परिभषेन्दुशेखरः, प्रकाशक- चौखम्भा संस्कृत प्रकाशन, वाराणसी, पुनर्मुद्रित संस्करण, २००९

[31] अष्टा., 7/1/102
[32] अष्टा., 7/3/103

# वैदिकसाहित्ये व्याकरणविद्या

भगवत्शरणशुक्लः

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति'[1] इति महाभाष्य-वचनात् षडङ्गैः सह वेदाध्ययनस्यानिवार्यता विशेषतः परम्परया अध्ययनशीलानां ब्राह्मणानां कृते ज्ञायते। 'अपौरुषेयाः वेदा' इति मीमांसकप्रभृतयो दार्शनिका अङ्गीकुर्वन्त्येव। तर्हि न हि निरवयवः कश्चिद्देहः स्थातुमर्हति इति व्यवहारदर्शनात् षडङ्गसिद्धान्ता अपि अपौरुषेयाः वेदवन्नित्याः सन्ति। अत एव गोपथब्राह्मणे 'तस्मात् कारणं ब्रूमो वर्णनामयमिदं भविष्यतीति षडङ्गविदस्तत्तथाऽधीमहे'[2]। तथैव षडविंशब्राह्मणेऽपि उक्तमस्ति 'चत्वारोऽस्यै वेदाः शरीर षडङ्गानि अङ्गानि'[3] एवमेव ऐतरेयब्राह्मणे 'षड्विधो वै पुरुषः षडङ्गः'[4] शाङ्खायनब्राह्मणे 'षडङ्गोऽयमात्मा षड्विधः'[5] इत्येवंरूपेण वेदैः षडङ्गानां कीर्तनात् कीर्तितान्येतानि छन्दः कल्पः ज्यौतिषम्, व्याकरणं, निरुक्तं, शिक्षा इत्यङ्गानि सर्वाणि अपौरुषेयाणि स्वीकर्त्तव्यानि। तेनेदं प्रतिपादनं नव्यविदुषां यत् पूर्वं भाषा भवति पश्चाद् व्याकरणमिति निर्मूलमेव भाषया सहैव व्याकरणनियमानामपि सत्तायाः सत्त्वात्। अत एव व्याकरणमजानन्नपि चेत् कश्चित् स्त्र्यर्थे पुल्लिंगं नपुंसकं वा प्रयुक्तेऽथवा एकवचनस्यार्थे बहुवचनं प्रयुङ्क्ते तथा चतुरेण नरेण बाधितो बोधितश्च दृश्यते। यद्यपि स चतुरोऽपि नरोऽकृताध्ययन एव भवति। तथापि तीव्रतमबुद्धेः सत्त्वात् स्वतो बोधात् कालप्रभावेण नष्टत्वाद् वा व्याकरणादिग्रन्थाभावेऽपि लोके सामान्य नियमास्तु भवन्त्येव। अतो यद्यपि -

ब्राह्ममैशानमैन्द्रं च प्रजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलञ्चैव पाणिनीयमथाष्टमम्॥[6]
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादि-शाब्दिकाः॥[7]
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥[8]

---

1 पस्प.
2 गोप., पूर्वभागे, 1/27
3 षड., 4/7
4 ऐत., 2/36
5 शाङ्खा., 13/3
6 हैमबृ.वृ., पृ. 3 (संस्कृत व्याकरण शास्त्र का इतिहास, पृ. 29)
7 वोपदेवकृत कविकल्पद्रुमे
8 श्री.नि.

एवम्भूतैः पद्यैरनेके वैयाकरणाः व्याकरणग्रन्थाश्च सूच्यन्ते तथापीदृशा व्यकरणग्रन्थाः वैयाकरणाश्च ये सूचिताः तेनेत्थमेव मन्तव्यं यदेतत् सर्वं षडङ्गज्ञानं व्याकरणज्ञानं वा यत् वेदेषु मूलत्वेन निहितमासीत् तानि वेदस्थव्याकरणादितत्त्वानि समालोच्य विचार्य लौकिकवैदिकप्रयोगांश्च समीक्ष्य इन्द्रप्रभृतय आचार्या वैशद्येन व्याकरणग्रन्थान् निर्मितवन्तः ।

वस्तुतस्तु सर्वा विद्याः सनातन्यः, एतासामाचार्यैः एतासां विधानां प्रवचनं भवति। यथा सृष्टिकर्त्ता ब्रह्मा सर्वां सृष्टिं रचयति तथैव वेदान्, अन्यानि शास्त्राणि, सर्वा विद्याश्चोपदिशति इति सर्वं भगवदत्तः स्वकीये 'भारतवर्ष का बृहद् इतिहास' इति ग्रन्थे चतुर्थेऽध्याये प्रतिपादितवान्। स चोल्लिखितवान् यत् द्वाविंशतिः शास्त्राणि ब्रह्मा उपदिष्टवान् -

| | | | |
|---|---|---|---|
| 1 | वेदान् | 12 | व्याकरणम् |
| 2 | ब्रह्मज्ञानम् | 13 | लिपिज्ञानम् |
| 3 | योगविद्या | 14 | ज्योतिषम् |
| 4 | आयुर्वेदः | 15 | गणितशास्त्रम् |
| 5 | हस्त्यायुर्वेदः | 16 | वास्तुशास्त्रम् |
| 6 | रसतन्त्रम् | 17 | शिल्पशास्त्रम् |
| 7 | धनुर्वेदः | 18 | अश्वशास्त्रम् |
| 8 | पदार्थविज्ञानम् | 19 | नाट्यशास्त्रम् |
| 9 | धर्मशास्त्रम् | 20 | इतिहासपुराणानि |
| 10 | अर्थशास्त्रम् | 21 | मीमांसाशास्त्रम् |
| 11 | कामशास्त्रम् | 22 | स्तवशास्त्रम् |

भाषायां तावत् वेदेषु लोकव्यवहारेषु च वाक्यानि एव प्रयुज्यन्ते। वाक्यानामेव वैदिककार्येषु यागादिषु लौकिकव्यवहारेषूपयोगात्। तत्र वाक्येषु कथं पदविभागस्तत्रापि कथं पकृतिप्रत्ययविभाग इति जिज्ञासायां तैत्तरीययजुर्वेदसंहितायामुदीरितं यत् -

'वाग्वै पराच्या व्याकृतावदत्। ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्विति.......... तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोद् याव इति'।[9]

मैत्रायणीसंहितायामपि शाब्दिकसिद्धान्तानुसारेण वाण्याः चत्वारि रूपाणि कथितानि -

---

[9] तै.सं., 6/4/7

'सा वै वाक् सृष्टा चतुर्धा व्यभवत्, एषु लोकेषु त्रीणि, तुरीयाणि, पशुषु तुरीयं या पृथिव्यां साऽग्नौ सा रथन्तरे यान्तरिक्षे सा बाते सा वामदेव्ये, या दिवि सा वृहति सा स्तनयित्नौ अथा पशुषु ततो या वागत्परिच्यत वां ब्राह्मणे न्यदधुः तस्माद् ब्राह्मण उभयीं वाचं वदति यश्च वेद यश्च न। या बृहद्रथन्तरयोर्यज्ञादेनं तथा गच्छति।'[10]

तथैव मैत्रायणीसंहितातुल्यं काठकसंहितायमपि लिखितम् 'सा वाग् दृष्टा चतुर्धा व्यभवत्, एषु लोकेषु त्रीणि तुरीयाणि, पशुषु तुरीयम्, या दिवि सा बृहति सा स्तनयित्नौ, यान्तरिक्षे सा वाते सा वामदेव्ये, या पृथिव्यां साग्नौ सा रथन्तरे, या पशुषु तस्या यदत्यरिच्यत तां ब्राह्मणे न्यदधुः, तस्मात् ब्राह्मण उभे वाचौ वदति। दैवीं च मानुषीं च करोति .......या बृहद्रथन्तरयोस्तयैनं यज्ञ आगच्छति या पशुषु तयर्ते यज्ञमाह।'[11]

महाभाष्यानुसारेण चतस्रो वाचः परा, पश्यन्ती, मध्यमा वैखरी इत्येवम्भूताः सन्ति। तासु तिस्रः पश्यन्तीमध्यमावैखरीरूपाः वैयाकरणलोकेषु वर्त्तते। सामान्येषु लौकिकजनेषु पशुपक्ष्यादिषु च केवला वैखरी तुरीया वागेव भवति। महाभाष्यकारः ऋग्वेदस्थ यजुर्वेदस्थमन्त्रद्वयस्य व्याख्यायां व्याकरणसिद्धान्तान् वाण्याः चत्वारि रूपाणि च दर्शयित्वा व्याख्यातवान् तन्मन्त्रद्वयमेवम्भूतम् -

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥[12]
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश॥[13]

एतन्मन्त्रद्वयव्याख्यायां भाष्यकारः नामाख्यातोपसर्गनिपातरूपाणां पदानां चतस्रः वाचः सन्ति तत्र मनुष्या अवैयाकरणाः तुरीयं वाचो वदन्ति। एतस्य वाग्रूपवृषभस्य नामाख्यातोपसर्गनिपातरूपाणि चत्वारि शृङ्गा भूतभविद्वर्तमानाः त्रयः पादा नित्यानित्यौ द्वौ मस्तकविशेषौ सप्तविभक्तिरूपा सप्त हस्ताः, स च वाणी रूपो वृषभो उरसि कण्ठे शिरसि इति त्रिषु स्थानेषु बद्धः यतो हि उरसि, कण्ठे,शिरसि, नाभिदेशतः आगतवायोः आघातविशेषेण वर्गपञ्चमानां हवारेण उरस्यं तद्भिन्नान्य कण्ठम् मूर्धा चेति उच्चारणस्थानत्रयं सामान्यतया भवति। इत्थं महाभाष्यकारः कैयटो नागेशश्च सर्वे पूर्वोक्तमन्त्रद्वयं व्याकरणसिद्धान्तानुसारं व्याख्यातवन्तः। तेनोभयोः

10 मै.सं., 1/11/5
11 का.सं., 14/5
12 ऋ., 1/164/45
13 यजु., 17/91

व्याकरणविषयता सिद्ध्यति।

सर्वप्रथमं गोपथब्राह्मणे व्याकरणविषयकाः पारिभाषिकशब्दाः प्रयुक्ताः येषां तथैव पाणिनीयादिव्याकरणेषु ग्रहणमस्ति -

'ओङ्कारं पृच्छामः को धातुः, किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं का विभक्तिः, कः प्रत्ययः, कः स्वरः, क उपसर्गो निपातः, किं वैयाकरणम्, को विकारः को विकारी, कति मात्राः, कति वर्णः, कत्यक्षरः, कति पदः, कः संयोगः, किं स्थानम्, नादानुप्रदानानुकरणम्.........'[14]

एवमेव भाष्यकारः 'उतत्वः प्रयन्न ददर्श वाचम्'[15] इत्यादौ 'सक्तुमिव ततउना पुनन्तो'[16] इत्यादौ 'सुदेवोऽसि वरुण यत्र ते सप्तसिन्धवः'[17] इत्यादौ च व्याकरणस्य दार्शनिकसिद्धान्तान् प्रकटितवान्। संहिताग्रन्थेषु यद्यपि व्याकरणशास्त्रस्य पारिभाषिकशब्दानां सङ्केतस्तादृशो नास्ति पूर्वोक्तदृष्ट्या दार्शनिकसिद्धान्ताः अवश्यमेव सूचिताः, तथापि बहुषु मन्त्रेषु शब्दानां व्युत्पत्तिः प्रदर्शितास्ति। न च सा व्याकरणशास्त्रं नियमं विना दर्शयितुं शक्या। तेन वैयाकरणसिद्धान्ता वेदोपदेशकालादेव आसन् इति ज्ञातुमर्हामः ; ते च व्युत्पत्तिप्रदर्शकाः केचन मन्त्राः स्थालीपुलाकन्यायेनात्र प्रदर्श्यन्ते -

**ऋग्वेदः** -

उप नः सवना गहि सोमस्य सोमपाः पिब।
गोदा इद् रेवतो मदः ॥[18]
गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्मणस्त्वा शतक्रत उद् वंशमिव येमिरे ॥[19]
यच्चिद्धि शश्वता तना देवं देवं यजामहे।
त्वे इद्धूयते हविः ॥[20]
हविषा जारो अपां पिपर्ति पपुरिर्नरा।
पिता कुटस्य चर्षणिः ॥[21]

[14] गोप., पूर्वभाग, 1/24
[15] ऋ., 10/71/4
[16] ऋ., 10/71/1
[17] ऋ., 8/69/12
[18] सोमं पिबन्ति इति सोमपाः आतोऽनुपसर्गे इति क प्रत्ययः। ऋ., 1/4/2
[19] अर्च्यते असौ इति अर्कः कर्मणि घञ्। ऋ., 1/26/6
[20] हूयते यत् तद् हविः। आणादिकः इसि प्रत्ययः। ऋ., 1/26/6
[21] पिपर्त्ति इति पपुरिः। किप्रत्ययः लिड्वद्भावः। ऋ., 1/46/4

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समुतृण्णुत ऋभवः॥[22]
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति।
अन्धा अपश्या न दधन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥[23]
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥[24]
आ वहेथे पराकात् पूर्वीरश्नन्तावश्विना।
इषो दासी रमर्त्या॥[25]

**यजुर्वेदः -**

धूरसि धूर्व्व धूर्व्वन्तन्धूर्व्व तं योस्मान् धूर्व्वति तन्धूर्व्वं यँ व्वयन् धूर्व्वामः।
देवानामसि व्वह्नितमसस्नितमम्पप्रितमञ्जुष्टत-मन्देवहूतमम्॥[26]
धान्यमसिधिनुहि देवान्त्र् प्राणाय त्वोदानाय त्वा व्यानायत्वा।
दीर्घामनु प्रसितिमायुषे॥[27]
आपोऽस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु॥[28]
महीनाम्पयोसि वर्च्चोदा असि वर्च्चो मे देहि॥[29]
देव सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाजन्नः स्वदतु॥[30]
यत्ते पवित्रमर्च्चिष्यग्ने व्विततमन्तरा। ब्रह्म तेन पुनातु मा॥[31]
पवमानः सोऽअद्य नः पवित्रेण व्विचर्षणिः।
यः पोता स पुनातु मा॥[32]
तेजोसि शुक्रममृतमायुष्पाऽआयुर्मे पाहि॥[33]

---

[22] तायते इति ततं। ऋ., 1/110/1
[23] रेषयन्ति इति रेषणा, ण्यासस्स्रन्थो युच्। ऋ., 1/148/5
[24] रहन्ते इति सहांसि। ऋ., 6/66/9
[25] अश्नान्ति इति अश्विनी। ऋ., 8/5/31
[26] धूर्व्वन्ति धूर्व्व वनिप् प्रत्ययः। शु.यजु., 1/8
[27] धिनोति इति धान्यम् ण्यत् प्रत्ययः। शु.यजु., 1/20
[28] घृतं पुनाति इति घृतपूः क्विप् प्रत्ययः। शु.यजु., 4/2
[29] वर्च्चो ददाति इति वर्च्चोदा क प्रत्ययः शु.यजु., 4/3
[30] केतं पुनाति इति कतपूः क्विप् प्रत्ययः। शु.यजु., 11/7
[31] पुनाति इति पवित्रम् इत्र प्रत्ययः। शुक्लयजुर्वेद, 19/41
[32] पुनाति इति पोता तृच् प्रत्ययः। शु.यजु., 19/42
[33] आयुः पाहि इति आयुष्मा क्विप् प्रत्ययः। शु.यजु., 22/1

**सामवेदः -**

अद्य नो देव सवितः प्रजापत् सावीः सौभगम्।
परा दुष्वप्न्यं सुव॥[34]
वात आ वातु भेषजं शम्भु मयोभु नो हृदे।
प्र न आयुंषि तारिषत्॥[35]
प्र व इन्द्राय बृहते मरूतो ब्रह्मार्चत।
वृत्रँ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा॥[36]
गायन्ति त्वा गायत्रिणोऽर्चन्त्यमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे।[37]
उभे यदिन्द्र रोदसी आप प्राथोषा इव।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम्।
देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत्॥[38]
अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम।
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि॥[39]
येन देवाः पवित्रेणात्मानं पुनते सदा।
तेन सहस्रधारेण पवमानीः पुनन्तु नः॥[40]
अञ्जते व्यञ्जते समुञ्जते क्रतुँ रिहन्ति मध्वाभ्यञ्जते।[41]

**अथर्ववेदः -**

यत् प्रेषिता वरुणेनाच्छीमं समवत्सात।

[34] सुवति इति सविता तृच् प्रत्ययः। साम., 5/7(141)अध्याय 1

[35] वातु इति वातः त्किच्क्तौ च संज्ञायमिति त्क प्रत्ययः। साम., 1/9/10(184)

[36] वृत्रं हन्ति इति वृत्रहा क्विप् प्रत्ययः। साम., 3/7/5/(257)

[37] 1. गायति इति गायत्री ष्ट्रन् प्रत्ययः अडागमः षित्वात् डीष् अथवा गीयते यत् गायः घञ् प्रत्ययः। गायं जायते गायत्रः, क प्रत्ययः। सः अस्ति अस्य इति गायत्री इनि प्रत्ययः (बह्यादिभ्यश्च, 5/2/116.), 2. अच्चर्यते इति अर्कः घञ् प्रत्ययः सः अस्ति अस्य असौ अर्की इनि प्रत्ययः। साम., 3/6/1(342)

[38] जनयति इति जनयिता तृच् प्रत्ययः ततः ऋन्नेभ्यो ङीप् इति ङीप् प्रत्ययः। साम., 3/9/10(379)

[39] अत्तीति अन्नम् अद् धातुः त्क प्रत्ययः। साम., 6/1/19(594)

[40] पुनाति इति पवित्रं पु धातुः इत्र प्रत्ययः। साम., 10/6/5(1302)

[41] अञ्जते इति अञ्जनम् ल्युट प्रत्ययः। साम., 16/4/1 (1614)

तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन ॥[42]
रोहिण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी ।
रोहयेदमरून्धति ।[43]
आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ॥[44]
अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथश्च यः ।
अपाह यातुधानीरपसर्वा अराय्यः ॥[45]

**शब्दसंकेत**

1. अथर्व. - अथर्ववेदः
2. ऋ. - ऋग्वेदः
3. ऐत. - ऐतरेयब्राह्मणम्
4. क.द्रु. - कविकल्पद्रुमः
5. का.सं. - काठकसंहिता
6. गोप. - गोपथब्राह्मणम्
7. तै.स. - तैत्तिरीयसंहिता
8. पस्प. - पस्पशाह्निकम्
9. मै.सं. - मैत्रायणीसंहिता
10. यजु. - यजुर्वेदः
11. शांखा. - शांखायनब्राह्मणम्
12. शु.यजु. - शुक्लयजुर्वेदः
13. श्री.नि. - श्रीतत्त्वनिधि
14. साम. - सामवेदः
15. हैमबृ.वृ. - हैमबृहद् वृत्त्यवचूर्णि

[42] आप्यन्ते इति आपः, आप्नोतेर्ह्रस्यश्च (उ.सू.) क्विप् प्रत्ययः उपधा हस्वः । अथर्व., 3/13/2
[43] रोहते इति रोहिणी, रूहधातुः जिनि प्रत्ययः ङीप् प्रत्ययः । अथर्व., 4/12/1
[44] वाति इति वातः वा धातुः त्क प्रत्ययः । अथर्व., 4/13/3
[45] अपमर्ष्टि इति अप मृज्यते इति अपमार्गः घञ् प्रत्ययः । अथर्व., 4/18/7

## सन्दर्भग्रन्थसूची


1. Kavikalpadruma of Vopadeva, ed. Gajanan Balakrishna Palsule, Poona, 1954
2. अथर्ववेदः, पदपाठेन च श्रीसायणाचार्यकृतभाष्येण, संपा. विश्ववन्धु, विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, होशिआरपुरम्, १९६२
3. ऋग्वेद, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००६
4. ऐतरेयब्राह्मणम्, श्रिमत्सायणाचार्यविरचितभाष्यसमेतम्, संशो. हरि नारायण आप्टे, आनन्दाश्रममुद्रणालय, १८९६
5. काठकसंहिता, श्रीपाद शर्मा भट्टाचार्य, स्वाध्याय मण्डल, सतारा, १९४३
6. गोपथब्राह्मणम्, संपा. श्रीजीवानन्दविद्यासागर, कलिकातानगरी, १८९१
7. तैत्तिरीयसंहिता, संशो. वे.शा.सं. काशीनाथशास्त्री, आनन्दाश्रममुद्रणालय, १९४०
8. मैत्रायणी संहिता, संपा. श्रीपादशर्मा भट्टाचार्य, स्वाध्याय मण्डल, सतारा, १९४२-४३
9. शांखायनब्राह्मणम्, रा.रा. गुलाबराय वजेशंकर छाया राजकोट वकील इत्येतैः संशोधितम्, आनन्दाश्रममुद्रणालय, १९११
10. शुक्लयजुर्वेदसंहिता, हरिश्चन्द्र विद्यालंकार मानस प्रिंटिंग प्रेस, दिल्ली, संवत् २०१६
11. श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम्, भाष्यप्रदीपेन समुल्लसितम्, प्रथमः खण्डः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७
12. सामवेद, सायण भाष्यावलम्बी सरल हिन्दी भावार्थ सहित, संपा. श्रीराम शर्मा आचार्य, गायत्री तपोभूमि, मथुरा, १९६०
13. संस्कृत व्याकरण शास्त्र का इतिहास, लेखक. श्री युधिष्ठिर मीमांसक, सम्पा. रामनाथ त्रिपाठी शास्त्री, चौखम्भा ओरियन्टालिया, दिल्ली, २०२०

# श्रीराघवोल्लासमहाकाव्यस्य प्रतिपाद्यविषयाः

मनीषकुमारत्रिपाठी

## प्रथमसर्गस्य कथा

अद्वैतयतिप्रणीतं राघवोल्लासमहाकाव्यं भक्तिरसपूरितमपूर्वं ग्रन्थरत्नं वर्तते। मर्यादापुरूषोत्तमस्य श्रीराघवेन्द्रस्य चरितमधिकृत्य इदं काव्यं द्वादशसु सर्गेषु विभक्तं वर्तते। प्रथमे सर्गे सर्वप्रथमं विघ्नविनाशकं श्रीगणेशं कविः स्मरति। यतिवर्यः कविः ग्रन्थादौ मङ्गलाचरणं करोति यत् सिन्दूरपूरारुणवाराणस्याः दासजनानां कृते सकलार्थदाता गजमुखः लम्बोदरः सदा मे हृदये तिष्ठतु[1]। अत्र मङ्गलाचरणे कविः सर्वप्रथमं लम्बोदरम् एव स्मरति। अनन्तरं द्वितीये श्लोके वीणाप्रवीणा शुद्धवेषा कुमुदप्रकाशा सरस्वती मम आशापूरणे सदा भवतु इति प्रार्थयते[2]।

महाकाव्यस्य प्रारम्भे मङ्गलाचरणमावश्यकं भवति। आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति वचनात् गणेशस्य सरस्वत्याश्च स्तुतिः अद्वैतयतिना कृता। कविः तृतीये श्लोके आराध्यदेवस्य रघुनाथस्य स्मरणं करोति। रघुनाथः साक्षात् परब्रह्म वर्तते। सर्वेषां क्लेशानां विदारणं करोति। असौ भयभीतिनिवारकः अस्ति। तादृशम् अनन्तं विष्णुं श्रीरामं नमामि[3]। अग्रे यतिवर्यः कविः स्वगुरुं रामकृष्णम् अग्रिमेषु सप्तसु श्लोकेषु स्मरति -

> जयति हृदि मदीये सर्वदा रामकृष्णः
> क्षयितविषयतृष्णः कृष्णपादैकधिष्ण्यः।
> शुचिगुणयतिवर्यः कार्यकर्त्तृप्रभेद-
> प्रतिहतमतिरेष क्लेशहर्त्ताश्रितानाम्॥[4]

अर्थात् मम हृदये सर्वदा गुरुचरणः श्रीरामकृष्णः तिष्ठतु। असौ विगतविषयतृष्णः कृष्णपादे मग्नः च वर्तते। असौ यतिवर्यः शुचिगुणसम्पन्नः एवं चाश्रितानां क्लेशहर्त्ता वर्तते। कविः वाराणसीमण्डले विद्यते अत एव तस्य गुरुरपि तत्रैव आसीदिति प्रतीयते -

---

[1] सिन्दूरपूरारुणवारणास्यो दास्योद्यतानां सकलार्थदाता।
विघ्नाब्धि मज्ज्ज्जनतावलम्बो लम्बोदरो मे हृदये सदाऽस्तु॥ (रा.महा., 1.1)

[2] वीणा प्रवीणा सततं यदीया करद्वयी कान्तिमयी विभाति।
सा शुद्धवेषा कुमुदप्रकाशा भाषा ममाशा परिपूरणेऽस्तु॥ (रा.महा., 1.2)

[3] रघुनाथाभिधं ब्रह्म जिह्मभावविदारणम्।
नमामि विततानन्त-भवभीति निवारणम्॥ (रा.महा., 1.3)

[4] रा.महा., 1.4

तं नित्यं नमत द्विजा यतिवरं श्रीरामकृष्णाश्रमं
पूर्वस्मिन् विहितश्रमं विगमवाच्याचारयुज्याश्रमे।
तुर्यस्थं समलङ्करोति मुनिता यं नग्नभालाग्निका
मुक्तेर्मण्डनमागलाच्च विमलं वाराणसीमण्डनम्॥[5]

अर्थात् हे द्विजाः यतिवरं श्रीरामकृष्णाश्रमं नित्यं नमत। पूर्वं यतिवरः स्वाश्रमे आचारवान् आसीत्। सम्प्रति चतुर्थे आश्रमे असौ मुनिः वाराणसीमण्डनं वर्तते एवम् अत्रैव निवसति। श्रीरामकृष्णस्य चिन्तनेन अनेके जनाः सिद्धभाजः अभवन्। अतः तस्य चरणद्वयस्य चिन्तां कुर्वन्तु भवन्तः। असौ रामकृष्णः मुक्तिदः कल्पतरुः गुरुः जयति। तथा चोक्तम् -

रामकृष्ण-कथाप्रश्न-मात्रत्रासितपातकः।
गुरुः कल्पतरुः कोऽपि यतिर्जयति मुक्तिदः॥[6]

यदि गुरोः पादाम्बुजस्य लोकवन्द्यस्य हृदये स्मरणं क्रियते तदा तस्य सर्वं पापं नश्यति[7]। यस्य पादकमलस्य स्मरणेन संसारशोकात् बहवो विमुक्ताः भवन्ति। यः गुरुः तृष्णारहितः वर्तते। तस्मिन् विरते श्रीरामकृष्णे अहं रतोस्मि[8]। श्रीरामकृष्णः साक्षात् दिगम्बरः हरः वर्तते यः कामदेवं भस्मावशेषं चकार। तादृशं गुरुं रामकृष्णं नौमि[9]। यः विजने वने निरन्तरं वासं चकार। यः वैराग्यं स्वीचकार। यः प्रपञ्चात् विरसः वर्तते। पापे यस्य रुचिः नास्ति। सताम् मनः यस्मात् पूर्णं भवति। सोऽयं मम गुरुः श्रीरामकृष्णः शङ्करपत्तने विजयते[10]।

अद्वैतभिक्षुः रामकृष्णः काशीनिवासनिरतः प्रपञ्चात् विरतः दिक्षुगुणैः प्रतीतः वर्तते तस्य प्रसादात् अखिलजनमनोरथसिद्धिः भवति[11]। वस्तुतः गुरोः कृपावशात् सर्वं भवति। यस्य गुरौ भक्तिः न भवति तस्य जीवनं व्यर्थम्। रामकृष्णः दिगम्बरः यतिः सर्वतो भावेन सेव्यो वर्तते।

अनन्तरं कविः राघवोल्लासस्य चिन्तनं करोति। राघवस्य नाम श्रवणात्

---

5 रा.महा., 1.5
6 रा.महा., 1.7
7 रा.महा., 1.8
8 रा.महा., 1.9
9 रा.महा., 1.10
10 रा.महा., 1.11
11 रा.महा., 1.12

अन्तः उल्लासो जायते अतः अयं राघवोल्लासः श्रोतव्यः[12]। अयं राघवोल्लासः उज्ज्वलं काव्यं वर्तते। सुधीनां कृते निधिः एव वर्तते। अस्मात् ग्रन्थात् रामभक्तिः जायते एवं स्वार्थस्यापि पूर्तिः भवति। अस्मिन् भवसागरे इयं काव्यरूपिणी तरिः वर्तते। अतः भवसागरात् पारं प्राप्तुम् इयं गरीयसी तरी सेव्या[13]।

कविः कथयति यत् श्रीरामचन्द्रस्य पादयुगले यदि भक्तिः जायते तदा जीवनं सफलं भवति। अतः सुधाधाराधाररूपं काव्यम् अवश्यमेव सेव्यं भवति[14]। राघवोल्लासकाव्यस्य श्रवणात् यस्य मानसं न द्रवेत् असौ नरः नास्ति[15]। कविः लिखति यत् अयं राघवोल्लासः यद्यपि मन्त्रः नास्ति तथापि अस्य ग्रन्थस्य पठतां जनानां दोषः न आयाति। मन्दः अपि पुरुषः अस्य ग्रन्थस्य हृदयेन पाठं करोति तदा नूनं तस्य रामे भक्तिः जायते। अतः अस्य ग्रन्थस्य प्रचारः अवश्यमेव कर्तव्यः। रघुनायकस्य अस्य काव्यरत्नस्य पाठे आलस्यं न कर्तव्यम्। भगवान् रामः परमात्मा वर्तते। अतः अस्मात् ग्रन्थात् मुक्तिः अपि भविष्यति[16]।

तापाकुलाः पापिनः यदि रामनामामृतं स्मरन्ति तदा तेषां दोषाः अपगच्छन्ति। अतः सर्वैः वन्द्यम् अनिन्द्यं राघवोल्लासकाव्यं सेवनीयम्[17]। यस्मिन् श्लोके रामनाम नास्ति स श्लोकः सारवान् अपि निःसारः वर्तते[18]। भगवत्याः सरस्वत्याः कृते तदा विश्रान्तिः भवति यदा रामचन्द्र-यशोगङ्गायां सरस्वती क्रीडति[19]।

कविः लिखति यत् हे चेतः ! त्वं विचारय यदि अस्मिन् संसारे अखिलं विफलं भवति तदा श्रीरामचन्द्रं स्मर[20]। राघवोल्लासस्य पठनात् जीवने गौरवम् आयाति। अतः राघवं स्मर। जनस्य लाघवं कुत्र भविष्यति[21]। रामचन्द्रस्य स्मरणं श्रेष्ठं च वर्तते तथा तत्र यदि अधिकः प्रयासः क्रियते तदा असौ सफलः भवति[22]। यदि नेत्रेण

---

12 उल्लासो राघवस्यान्तः श्रवणादेव जायते।
राघवोल्लास एवायं श्रोतव्यो रामतत्परैः॥ (रा.महा., 1.15)

13 रा.महा., 1.17

14 रा.महा., 1.18

15 रा.महा., 1.19

16 रा.महा., 1.26

17 तदेव पद्यं जगतां हि वन्द्यं सर्वैरनिन्द्यं मनसोऽतिहृद्यम्।
यद् रञ्जितं तापहरेण नाम्ना श्रीरामचन्द्राक्षरचुम्बितेन॥ (रा.महा., 1.28)

18 रा.महा., 1.29

19 रा.महा., 1.30

20 रा.महा., 1.31

21 रा.महा., 1.34

22 रा.महा., 1.35

केवलं हरेः अनुचरः (दासः) दृश्यते तदा तस्य नेत्रं पवित्रं भवति[23]।

सज्जनानां साधूनां च प्रशंसापि कविना क्रियते। सन्तापे तप्तानां पुरुषाणां विश्रान्तिः साधौ एव भवति तदैव शान्तिः लभ्यते[24]। अस्मिन् संसारे सर्वे श्रमातुराः सन्ति। भाग्येन कैश्चित् साधवः गुरुवः तरवः शिवाः लभ्यन्ते[25]।

अद्वैतयतिः दुष्टविषये लिखति यत् दुष्टाः पवित्रान् अपवित्रान् कुर्वन्ति अतः दुष्टाः विष्ठासमाः भवन्ति। ते दूरात् त्याज्याः भवन्ति[26]। यः रामं न स्मरति स पुरुषः पुरीषं वर्तते स दूरात् त्याज्यः भवति। कफरोगस्य रेफस्य च स्थितिः समाना भवति। मधुरैः कफः शान्तिं न गच्छति विधुरैरेव कफस्य शान्तिः भवति[27]। रामनाम्नः यः पराङ्मुखः वर्तते तं पुरुषं न पश्येत्। तस्मात् पुरुषात् दुखं जायते। सुखं नश्यति[28]।

श्रीरामः पूर्णावतारः वर्तते। सुकृतीनां कृते उदारः वर्तते। तस्य चित्ते सर्वदा सीता तिष्ठति। श्रीरामः अज्ञानं नाशयति[29]। कविः कथयति यत् हे मनः ! सदा एकं रामम् एव चिन्तय अन्यत्र सर्वं जगत् चञ्चलं वर्तते। अतः रामं स्मर[30]। तथा च हे रसने! त्वं व्यसनेषु आसक्ता असि। अतः व्यसनं त्यक्त्वा सानन्दं रामनाम पठ[31]। त्वं रामाक्षरोद्घोषं कुरु। नो चेत् अहं दोषं वदामि[32]।

माता कौशल्या रामवियोगात् परं दुःखिता आसीत्। रामस्य पार्श्वतः समागतं ब्राह्मणं सा अपृच्छत् हे विप्रवर! तप्तानां विश्रामचन्द्रः रामचन्द्रः कुत्र वर्तते? सा पृथ्वीपुत्री कुलीना सीता कथं वर्तते? सुमित्रातनयः लक्ष्मणः किं करोति[33]?

23 तदेव केवलं नेत्रं पवित्रं प्राणिनामिह।
कदापि जायते यस्य गोचरोऽनुचरो हरेः॥ (रा.महा., 1.37)

24 रा.महा., 1.39

25 अपारे पथि संसारे सञ्चारेण श्रमातुरैः।
लभन्ते साधवः कैश्चिद् गुरुवस्तरवः शिवाः॥ (रा.महा., 1.40)

26 पवित्रानपवित्रान् ये सङ्गमनात्प्रकुर्वते।
दुष्टाः विष्ठासमाकाराः दूरात् त्याज्याः शरीरिभिः॥ (रा.महा., 1.42)

27 रा.महा., 1.43

28 नेक्षणीयं मुखं तत्तु रामनाम पराङ्मुखम्।
जायते च यतो दुःखं सुखं नश्यति चोन्मुखम्॥ (रा.महा., 1.45)

29 रा.महा., 1.46

30 सदा राममेकं मनश्चिन्तयालं जगच्चञ्चलं चञ्चलावत्समस्तम्।
तदासक्तिरेषा विशेषाद् विपत्यै स्फुटं ते रटन्त्युत्कटं ज्ञा अटन्तः॥ (रा.महा., 1.51)

31 रा.महा., 1.52

32 सत्यं वदामि रसने! व्यसनेष्वनिशं रते!।
कुरु रामाक्षरोद्घोषं नो चोद्दोषं वदाम्यहम्॥ (रा.महा., 1.55)

33 रा.महा., 1.57,58,59

हे ब्राह्मण! रामस्य विषये सत्यं वद। श्रीरामस्य वार्ता आर्तानपि आर्द्रीकरोति। यस्य स्मरणात् मनुष्याणां दुःखानि बहिर्गच्छन्ति। ब्रह्मरूपस्य रामस्य मायया सह कुत्र स्थितिः वर्तते[34]? यदा पितुः आज्ञां प्राप्य श्रीरामचन्द्रः वनं गतवान् तदा तं वीक्ष्य पौराः हाहारवं कृतवन्तः[35]। सर्वे पौरजनाः दुःखभराः आसन्। श्रीरामचन्द्रः वस्त्राणि त्यक्त्वा अनुचितानि वस्त्राणि धृत्वा अभिषेकमुहूर्ते सीतया सह कुत्र गच्छति इति चिन्ता अभूत्[36]। ते जनाः वदन्ति - सीता जनानां माता वर्तते एवं त्वमाश्रितानां पिता असि। साम्प्रतं शिशूनां तव चरणे रतानां विनापराधं त्यागं कथं कुरुषे[37]। यस्याः सीतायाः पादतलं कोमलम् आसीत् सा कथं वने गमिष्यति इति जनानां चिन्ता[38]। पृथ्वीपुत्री सीता कथं पत्या सह वनं गच्छति इति जनानां विश्वासः नासीत्।

यदा प्राणप्रियस्य रघुनन्दनस्य वनवासार्थं प्रवृत्तिः अभूत् तदा मातृजनानां शरीराणि दुःखैः पेतुः[39]। ताः मातरः हा राम! हा राघव! इति विलापं कुर्वन्ति स्म। सीता वने भोजनं न करोति स्म तस्याः शयने अपि इच्छा न आसीत्। मनसि काचित् इच्छा न आसीत्। तस्याः दशा अद्भुता आसीत्[40]।

जनाः कथयन्ति हे देवदेव! किं त्वयि विवेकः नास्ति? श्रीरामचन्द्रः सर्वेषां जनानां सञ्जीवनं वर्तते स कथं अस्मान् त्यक्त्वा गच्छति[41]। जनाः रोदनं कुर्वन्ति हे राम! त्वं जनानां जनकोऽसि, माताऽसि, जनानां जीवनम् असि। हे रघुनाथ! वयं किं कुर्मः? कोऽपि अस्माकं कल्याणकर्ता जनः न दृश्यते[42]?

साकेते जनता लता सदृशा राघवश्च कल्पवृक्षः वर्तते। स राघवः अयोध्यां

---

[34] रा.महा., 1.62

[35] आज्ञां पितुः प्राप्य शनैः प्रयातः पथा धराधीशगतोचितेन।
तं वीक्ष्य पौरैः स्रवदस्रपूरैर्हा! हा! रवो दुःखभरदकारि॥ (रा.महा., 1.63)

[36] त्यक्तः सुभूषानिचयः कुतः त श्रीरामवस्त्राण्यपि होचितानि।
क्व यासि सीतासहितोऽभिषेके मुहूर्त्त एष प्रहितोऽन्यवेशः॥ (रा.महा., 1.64)

[37] माताजनानामियमद्य सीता पिताश्रिताशेषगुणस्त्वमेव।
विनापराधं चरणे रतानां त्यागं कथं हा! कुरुतः शिशुनाम्॥ (रा.महा., 1.65)

[38] रा.महा., 1.66

[39] प्राणप्रिये श्रीरघुनन्दनेऽस्मिन् गन्तुं प्रवत्ते पुरतोऽपि दूरे।
पेतुः शरीराणि पुरः स्थितानां मातर्जनानां विकलानि दुःखै॥ (रा.महा., 1.69)

[40] रा.महा., 1.72

[41] रा.महा., 1.74

[42] माताजनानां जनकोऽपि राम! त्वां जीवनं मूल्यधनं धनञ्च।
त्वया विना किं रघुनाथ! कुर्मः शर्मप्रणेता न हि दृश्यतेऽन्यः॥ (रा.महा., 1.78)

त्यक्त्वा गतवान्। अधुना लता अधः प्रयातु गच्छतु[43]। कविः कथयति हे अयोध्ये! अधुना तव मध्ये वसतिः न योग्या। अधुना रामेण त्यक्ता त्वं न आदरयोग्या[44]। सम्प्रति नाथः रामचन्द्रः गतः। वयं अनाथाः, न कोऽपि त्राणकरः वर्तते। अधुना इयं अयोध्यानगरी विधवा नारी इव अभूत्। अत्र प्रकाशः न दृश्यते।

यदा रामचन्द्रः वनं गतवान् तदा जनाः हा हा कुर्वन्ति स्म। श्रीरामचन्द्रस्य करः सरोजपत्रादपि शीतलः वर्तते। अतः तापितानां मोलौ त्वं निधेहि[45]। रामः सर्वान् प्रविहाय कुत्र गच्छति? इति शोकस्य कारणम् आसीत्। रामेण सदृशः न कोऽपि पुरुषः दृश्यते यस्य दर्शनात् जनाः सम्मानभाजनत्वं यान्ति[46]। हे राम! त्वं ब्राह्मणेभ्यो सदा अप्रार्थितानि एव धनानि ददासि। अधुना रामः गतवान् किं करणीयम् इति जनानां करुणालापः भवति[47]।

कविः लिखति यत् हे मनः! यदि त्वं सर्वान् दुर्लभान् लब्धुम् इच्छसि तदा केवलं भरताग्रजं भज[48]। यदा माता कोपयुता भवति तदा पिता तस्य बालकस्य शरण्यं भवति। यदि पिताऽपि कठिनो भविष्यति तदा बालकः कस्य शरणं गमिष्यति[49]। कश्चित् सीतां कथयति हे माता जानकि! श्रीराम चन्द्रः भृशं काठिन्यं प्राप्नोति किन्तु त्वं मृणालनालसदृशा कोमलाऽसि, किन्तु त्वमपि यदि गमिष्यसि तदा अस्य बालकस्य का दशा भविष्यति[50]। हे राम! वयं निकामतप्ता अतः कस्य शरणं वयं गमिष्यामः[51]।

एवं प्रकारेण रामः यदा वनं गतवान् तदा सर्वे अयोध्यावासिनः शोकाकुलाः आसन्। ते कथयन्ति हे राम! वयं कस्य शरणं गच्छामः -

भूषावली मौलिमणेर्गणेन श्रीमद्गुणानामतिमात्रबद्धाः।

[43] रा.महा., 1.80
[44] रा.महा., 1.83
[45] रा.महा., 1.91
[46] रा.महा., 1.97
[47] रा.महा., 1.118
[48] प्राप्तुमिच्छसि मनो यदि सर्वान् दुर्लभानपि सुरैर्विषयौघान्।
तद् भजस्व भरताग्रजामेकं किं वृथा तनुभृतां भजनेन॥ (रा.महा., 1.119)
[49] माता यदा भवति कोपयुता तनूजे
तातस्तदा व्रजति तस्य शरण्यभावम्।
सोऽप्याश्रयेद् यदि तथा कठिनं स्वभावं
कं यातु राम! शरणं बत बालकोऽयम्॥ (रा.महा., 1.121)
[50] रा.महा., 1.124
[51] रा.महा., 1.133

शक्ता न गन्तुं पदमद्य लोकाः शोकाकुलाः कं शरणं व्रजेयुः ॥[52]

एवंविधस्य राघवोल्लासस्य प्रथमसर्गे पौरजनविलापो वर्तते। अत्र महाकाव्ये कविना रामविरहोक्तिकथनम् अतीव समीचीनतया वर्णितम्।

**द्वितीयसर्गस्य कथा**

'सत्सङ्गतिः कथय किं न करोति पुंसाम्'। द्वितीयस्य सर्गस्य प्रारम्भे एव कविः लिखति यत् सत्सङ्गात् सर्वं पूर्णं भवति। यदि इन्द्रः अतन्द्रः वर्षपर्यन्तं तीव्रांसि तपांसि करोति, तथापि तेन सत्सङ्गपूर्णस्य रजांसि अपि न प्राप्तुं शक्यानि भवन्ति[53]।

जनकस्य पुत्री चन्द्रानना सीता सावित्री लक्ष्मीरूपिणी वर्तते एवं रामः साक्षात् नारायणः अस्ति। अतः वयं नारायणं स्मरामः[54]। कविः इच्छति यत् श्रीराघवस्य कान्तं मुखं मम हृदये स्फुरतु।

वनवास-गमनसमये सीता श्रीरामस्य सेवां करोति। तदा श्रीरामः तस्याः प्रशंसां करोति। सा जानकी श्रीरामस्य वचनं श्रुत्वा अपूर्वं सुखं मनुते[55]। यदा श्रीरामः कस्यापि उपरि दृष्टिं पातयति तदा तस्य उग्रतापः नश्यति। श्रीरामस्य कृपादृष्टिः सदा कल्याणाय भवति[56]। ब्राह्मणस्य माहात्म्यं राघवोल्लासे कविः वारं-वारं सूचयति[57]।

कविः कथयति यत् भगवति रामे भक्तिः ईश्वरकृपातः भवति। यदा जगदीश्वरस्य अपारा कृपा भवति तदैव तस्य पादपद्मे भक्तिः भवति[58]। देहस्य गेहस्य च शोधनं ब्राह्मणस्य पादजलसेचनेन सम्भवं भवति। अतः ब्राह्मणपादसेवनं कल्याणाय भवति[59]। यस्य पुरुषस्य धनं भूसुराणां ब्राह्मणानां कृते दीयते तदैव तस्य

---

52 रा.महा., 1.155

53 इन्द्रोऽप्यतन्द्रो यदि वर्षपूगान्करोतु तीव्राचरणैस्तपांसि।
प्राप्तुं न शक्यानि तथापि तेन सत्सङ्गपुण्यानि सखे! रजांसि॥ (रा.महा., 2.6)

54 चन्द्रानना या जनकस्य पुत्री नूनं सवित्री जगतामियं श्रीः।
नारायणस्त्राणपरायणोऽयं रामः स्मरामः सततं तमेव॥ (रा.महा., 2.14)

55 रा.महा., 2.44

56 रा.महा., 2.52

57 मातुः पितुर्बन्धुजनाच्च सख्युरिष्टाद् वरिष्ठो द्विज एव नान्यः।
दातार एतेऽत्र मनोरथानामन्यः सुमान्याः सुखदोऽपि नाके॥ (रा.महा., 2.60)

58 कृपा कृपालोर्जगदीश्वरस्य यदा पदाब्जस्य भवेदपारा।
तदैव दैवोदयवीक्षितस्य भक्तिर्द्विजाङ्घ्रावुदयं प्रयाति॥ (रा.महा., 2.64)

59 देहस्यापि च गेहस्य परमेकं विशोधनम्।
सेचनं यत् पयोलेशैः ब्राह्मणाङ्घ्रिसमुद्भवैः॥ (रा.महा., 2.70)

सार्थक्यं भवति[60]। द्विजानामाशीर्वचनमपि उदयाय भवति। यस्य पुरुषस्य उपरि ब्राह्मणानामाशीर्वचनं भवति तस्य सकलं पापं विनश्यति[61]।

कविः कथयति यत् कष्टस्य कारणं दुष्टः वर्तते। दुष्टः श्रेष्ठस्य नाशकः भवति अतः दुष्टस्य सङ्गतिः न कार्या इति रामशासनम् आसीत्। दुःखं विविधप्रकारकं भवति, किन्तु प्रियजनविरहस्य दुःखं शरीरभाजां कृते असहनीयं भवति। राघवस्य वियोगे क्षणम् अपि किमपि सहनीयं न भवति[62]। यदा सूर्यवंशी रामचन्द्रः वनं गतवान् एवं जनकपुत्री अपि तेन सह गतवती तदानीं जनता दुःखिता अभूत्[63]। यदा रामचन्द्रः वनं गतवान् तदा जना आक्रोशन्तः अब्रुवन्- हे राम! वयं अनाथाः, शोकमग्नाः, भवतः तनूजाः स्मः। हे दयालो! हे रामचन्द्र! वयं त्वया नैव त्याज्याः[64]।

कश्चित् कथयति हे राम! तव दर्शनेन यत् सुखं जायते तत् सुखं परब्रह्मणः दर्शनेऽपि न भवति[65]। हे राम! भवान् जनानां पिता-माता च अस्ति। त्वमेव सखा, मित्रं, नेत्रं च अतः बहुभिः किम् उक्तैः[66]? रामस्य वियोगे हा! कुत्र वयं यामः इति विवशाः जनाः वदन्ति। पौरजनाः रामस्य पादारवृन्दं संस्पृश्य कथयन्ति हे सीतापते! त्वद् वियोगे वयं कथं जीवामहे[67]। जनाः विलापं कुर्वन्तः वदन्ति हे राम! वयं निकामतप्ताः पूर्वं त्वया संरक्षिताः अधुना वयं कुत्र शरणं गमिष्यामः शरणागतानां कः त्राता भवति[68]? जनाः आक्रोशन्तः वदन्ति- हे रघुनाथ! भवान् वनवासं गच्छति किन्तु अस्माकं का गतिः भविष्यति? अस्माकं जीवनं शून्यमेव

60 तस्यैव वित्तं पुरुषस्य सत्यं कृत्यं यतः सिद्ध्यति भूसुराणाम्।
अन्यद् यदेतद् रिपुणा सदक्षं पक्षं छिनत्युद्गमने जनस्य॥ (रा.महा., 2.78)

61 आशीर्द्विजानां सुकृतोदयेन सम्प्राप्यते येन नरोत्तमेन।
स पुरुषस्तत्पुरुषार्थपात्रं गात्रं तदीयं विगतामयञ्च॥ (रा.महा., 2.85)

62 दुःखं कदाचित् सकलं कथिञ्चत् शरीरभाजां सहनाय योग्यम्।
हा! हा! वियोगे रघुनायकस्य शक्यो न सोढुं क्षणतोऽपि कैश्चित्॥ (रा.महा., 2.98)

63 मातर्यदाम्बुजपदावलितोऽवतंसो वंशस्य भानुजननस्य स रामचन्द्रः।
साकं सरोरुहदृशा जनकस्य पुत्र्या कुत्रापि दुःखदलिता जनता निपेतुः॥ (रा.महा., 2.104)

64 वयं तनूजा भवतः समस्ता एताः पुरस्तात् पतिता अनाथाः।
त्याज्यास्त्वया नैव दयाकरेण लोके वरेणापि च रामचन्द्रः॥ (रा.महा., 2.118)

65 रा.महा., 2.120

66 पिता भवानेव भवज्जनानां किञ्चापि माताऽर्भकजीवनाय।
त्वमेव रामासि सखा सुमित्रं किञ्चापि नेत्रं बहुभिः किमुक्तैः॥ (रा.महा., 2.121)

67 ऊचुश्च संस्पृश्य पदारविन्दं स्वमौलिदेशेन च मन्दमन्दम्।
सीतापते! लोकय लोललोलान् बालानबालान्तरलोचनाभ्याम्॥ (रा.महा., 2.129)

68 कं हाऽधुना राम! निकामतप्ताः पूर्वं प्रगुप्ताः शिशुवत्त्वया ये।
यामः सुदीनाः शरणं शरण्यं त्राता भवेद्यः शरणागतानाम्॥ (रा.महा., 2.135)

प्रतीयते[69]? अत्रापि पुत्राः, मित्राणि, मन्दिराणि, गावः सकलपदार्थाः सन्ति किन्तु हे राघव! सर्वे पदार्थाः त्वया विना व्यर्थाः सन्ति[70]। हे राम त्वया विना दीनाः, हीनाः वयं कुत्र यामः। सर्वे अतीव दुखिताः प्रतीयन्ते[71]। एवम्प्रकारेण राघवोल्लासस्य द्वितीयसर्गे रामस्य सीतायाश्च विरहे जनानां दुःखानि व्यक्तीकृतानि दृश्यन्ते।

**तृतीयसर्गस्य कथा**

तृतीयसर्गस्य आदौ कविः लिखति यत् -

जयन्ति रघुनाथस्य पदपङ्कजपांसवः।
मूकोऽपि वावदूकोऽयमद्वैतो यदुपाश्रयात्॥

अयं श्लोकः राघवोल्लासमहाकाव्यस्य प्रतिसर्गम् आदौ वर्तते। सीता रामेण सह वनं गच्छति। हर्षात् प्रसन्ना सीता रामचन्द्रस्य पश्चात् त्रिचतुराणि पदानि गत्वा पृच्छति-अधुना कियत् दूरं गन्तव्यम् अस्ति? एतदाकर्ण्य रामस्य नेत्रात् जलं पतति[72]।

रामस्य पादतले कमलमङ्कुशः वज्रं ध्वजश्च इति चर्तुणां चिह्नान्यासन्। रामस्य पदधूलिषु एतानि जज्ञिरे[73]। श्रीरामस्य पादतलस्य चिह्नानि दृष्ट्वा देवा अपि नमश्चक्रुः। अयं रामः साक्षात् विष्णुः वर्तते। केचन मुनयः नताः आहुः - हे राम! अत्र वने निशाचरकुलं त्वं मारय, त्वं भूमिभारं दूरीकुरु, हे रघुनायक! अखिलं विश्वं पाहि। ब्रह्माऽपि एवमेव ब्रूते। श्रीरामः भिल्लादिनानाजनसेवितानि धनानि वनानि चचार[74]।

रामः मार्गे परिश्रान्त आसीत् किन्तु सौभाग्येन गङ्गामपश्यत्। गङ्गातटं प्रा-

[69] नेत्रं जनानां रघुनाथ एव नामुत्र किञ्चद् विमृशामि मिथ्या।
गन्तुं प्रवृत्ते जनजीवनेऽस्मिन् शून्यं जगत् हा! सकलं विभाति॥ (रा.महा., 2.137)

[70] अत्रापि पुत्रा विदधुः सुखानि मित्राणि चित्राण्यपि मन्दिराणि।
गावः प्रियावः सकलाः पदार्थाः व्यर्थाः विना राघवसङ्गमेन॥ (रा.महा., 2.139)

[71] हीनास्त्वया सरललोचनदीनहीना ईनाऽधुना रघुपते! बत कुत्र यामः।
एवं जनाः स्फुटघनान्तरदुःखजाला हालाहलाकृतिवचः प्रययुर्वदन्तः॥ (रा.महा., 2.141)

[72] हर्षात् पुरः पुर इयं रघुनायकस्य गत्वा जवात्त्रिचतुराणि पदानि सीता।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा रामाश्रुणः प्रविदधे प्रथमावतारम्॥ (रा.महा., 3.2)

[73] पङ्कजाङ्कुशपविध्वजादिभिः शोभितानि च तलेऽखिलेशितुः।
राघवस्य चरतोऽत्र धूलिषु श्रीपदानि हि पदानि जज्ञिरे॥ (रा.महा., 3.5)

[74] मध्ये घनानि द्रुवरैर्वनानि भिल्लादिनानाजनजीवनानि।
चचार रामः सविचारसारः प्राप्तानि मार्गे बहुभीषणानि॥ (रा.महा., 3.13)

प्य रामः प्रियाकरेण जलेन पवित्रगात्रोऽभूत्। रामः श्रमेण परिश्रान्तः जलं पीत्वा दुःखमुक्तः अभूत्[75]। गङ्गा जगत्पतिं राममुपेत्य पादौ संस्पृष्य तमपूजयत्[76]। गङ्गायां स्नात्वा रामः वटजयीपयोभिः केशान् जटात्मकान् कृतवान्। रामस्य जटां दृष्ट्वा सीता अतीव दुखिता अभूत्[77]। सीता रामस्य जटारूपं वेषं न द्रष्टुम् इच्छति स्म। कविः लिखति -

वासं नाथ! वने सुखं कुरु घने साकं मयैकं प्रभो!
तत्राप्यम्बुजपत्रनेत्रयुगल! त्वामर्थये किङ्करी।
वेशः क्लेशमलं दधाति मनसो योऽयं त्वया स्वीकृतः
सीतावाक्-सितसायकेन निहते रामेऽभवद् विभ्रमः ॥[78]

युक्तो वेष इति प्रतीततपसां स्वामिन्! मुनीनां वने
नित्यं हा! वसतां कुतो विलसतां शक्त्यावतां भूभृताम्।
एवं दीनमुखीं गलज्जलदृशं भीत्या सकम्पां भृशं
कुर्वन्ती पुरतोऽर्थनां जनकजां संवीक्ष्य रामोऽपतत्॥[79]

जटाजूटयुक्तं रामं दृष्ट्वा सीता विलापमकरोत्। सीतायाः विलापं श्रुत्वा रामः अपतत्। निशायां रामेण जलं न भुक्तं तदा सीता मूर्च्छिता अभूत्। श्रीरामचन्द्रः निद्रां न प्राप्तवान्[80]। रामः सीतां कोमलवचनं कथयति - हे कान्ते! हे सीते! अद्य कथं निद्रा न आयाति। मनुष्याणां जीवने सुखं दुःखं च भाग्यानुसारं भवति[81]।

गङ्गानीरस्पर्शमात्रेण सर्वे क्लेशाः दूरीभवन्ति[82]। गङ्गायाः महत्त्वमपि क-

[75] आनीय नीरं सुरनिम्नगाया गात्रं पवित्रं प्रियया करेण।
सिक्तं विमुक्तं शनकैः श्रमेण बभूव रामस्य मनोरमस्य॥ (रा.महा., 3.18)

[76] जगत्पतिं राममुपेत्य गङ्गा प्रोद्यत्तरङ्गाकृतिशस्तहस्तैः।
संस्पृश्य पादौ कमलावलीभिरपूजयत्पूजितमीश्वराद्यैः। रा.महा., 3.19

[77] बद्धाः जटाः प्रतिभटान्तकभीषणेन रामेण गाङ्गपुलिनेऽमलकुन्तलानाम्।
तां वीक्ष्य रामदयिताऽप्यतिदुःसहानां गाढं बबन्ध च जटां हृदि वेदनानाम्॥ (रा.महा., 3.25)

[78] रा.महा., 3.26

[79] रा.महा., 3.27

[80] अङ्गानि रामस्य मनोहराणि सरोजपत्राधिककोमलानि।
असौ शयानः शयने धरायां निद्रां न चन्द्रानन आससाद॥ (रा.महा., 3.34)

[81] नायाति निद्रा कथमद्य सीते! सुप्तासि कान्ते! विषमे धरान्ते।
विपर्ययादेव जनाः लभन्ते सुखञ्च दुःखं न कथं श्रुतं ते॥ (रा.महा., 3.37)

[82] धन्या जन्यास्त एवात्र गङ्गानीरलवस्पृशः।
येषां केषामपि क्लेशाः न भवन्ति भवोद्भवाः॥ (रा.महा., 3.45)

विना अत्र वर्णितम्[83]। कविः लिखति यत् हे मातः ! जाह्नवि ! अहं तव जले मज्जनं करोमि। यस्मात् नरः वैष्णवपदं लभते। त्वयि मज्जने कृते भव-भवं विनाशितं भवति[84]।

श्रीरामः गङ्गां प्रार्थयति - हे गङ्गे तव कूले स्थित्वा सलिलस्नानात् मम सकलाः मनोवाञ्छाः त्वया पूरिताः। निवेदनमेकं वर्तते। त्वं पूरय। त्वन्नीरे यदि कोऽपि शिवं स्मरति तदा मोक्षः समक्षं भविष्यति[85]। श्रीरामस्य कोमलपादतले कण्टक-कूटकुण्ठितगतिं दृष्टवा जानकी दुःखेन अपतत्[86]। रामः दुःखितां सीतां कथयति - हे सीते ! सुखं वा दुःखं व जनैः कर्मानुसारं भुज्यते। अतः एतत् सर्वं प्रारब्धं भवति। धैर्यम् अवलम्बनीयम्। तदा सीता उच्चैः रुरोद[87]।

सीता वने स्वजीवनविषये कथयति - अहं राज्ञः जनकस्य पुत्रिरूपेण जाता एवं दशरथस्य अग्रगण्या वधूः अस्मि। सोऽहं महारण्ये प्रदीर्णचरणा भ्रमामि इति अद्भुतम्[88]।

श्रमातुरशरीरस्य राघवस्य चरणाम्बुजस्य संवाहनं विदधाति। सीता वने क-ण्टकानां समूहं दृष्ट्वा देहे दधार[89]। वनवाससमये रामस्य सीतायाः लक्ष्मणस्य च

---

83 विशुद्ध्यर्थं त्वयि स्नाता ! अविशुद्धास्त्वया कृताः।
अपूर्वा पूर्वजाराध्ये गङ्गे ! मातः ! कृतिस्तव॥ (रा.महा., 3.50)

84 जाह्न्वि ! त्वयि करोमि मज्जनं यज्जनं वयति वैष्णवं पदम्।
मातरस्मि सकलेषु सत्तमो यत्तमो भवभवं विनाशितम्॥ (रा.महा., 3.54)

85 स्थित्वा त्वत्पुलिने तथा च सलिलस्नानान्नपानादिभिर्मातर्जाह्नवि ! पूरिता मम मनोवाञ्छाः स-मस्तास्त्वया।
एकं त्वद्य सुपूरयातिसुभगे गङ्गे ! मदीयं प्रियं त्वन्नीरे स्मरतः शिवं हृदि वपुर्मोक्षः समक्षं स-ताम्॥ (रा.महा., 3.57)

86 हा ! हा ! बालमृणालकोमलतलं कान्त्याकुलं पादयोर्युग्मं तिग्ममरीचिवंशकुमुदश्रीरामचन्द्रस्य यत्।
व्यानम्रक्षितिपालमौलिजमणिश्रीरञ्जितं तत्कथं जातं कष्टककूटकुण्ठितगतिप्रोक्त्वा-पतज्जानकी॥ (रा.महा., 3.74)

87 दुःखं जानकि ! किञ्चिदेव हृदये नानेयमेतत्त्वया
प्रारब्धं किल कर्मधर्मिभिरपि स्वीयं जनैर्भुज्यते।
श्रुत्वोक्तिं सपयोदृशो रघुपतेर्धैर्यं विहायैव सा
तच्चालिङ्ग्य पदद्वयं सकरूणं प्रोच्चैः रुरोदातुरा॥ (रा.महा., 3.75)

88 जाताऽहं भुवनेश्वरप्रियतमा पुत्री धरित्रीपतेरीशश्चापि दिशामसौ दशरथस्तस्याग्रगण्या वधूः।
सेयं दन्तिनिनादनादितमहात्रासप्रदारण्यभू-र्मध्याध्वप्रसरप्रदीर्णचरणा पत्या भ्रमाम्यद्भुतम्॥ (रा.महा., 3.76)

89 संवाहनं विदधती चरणाम्बुजस्य सीता श्रमातुरतनोः पथि राघवस्य।
शेषो निरीक्ष्य परितोऽत्र च कण्टकानां देहे दधार चयमाशु च कष्टकानाम्॥ (रा.महा., 3.78)

भोजनमपि दुर्लभमासीत्[90]। राघवः वने सीतायाः मुखं दृष्ट्वा एवं सूर्यस्य किरणैः दीप्तां सीतां दृष्ट्वा अतीव म्लानाननोऽभूत्[91]। वने रामः अग्रे प्राचलत्। पुनः जनकपुत्री जानकी ततः पश्चात् प्रचलति। तदन्तरं लक्ष्मणः क्रमशः मार्गमनुसरति -

रामः पुनः सर्वमनोहरश्रीस्तस्यापि पश्चाज्जनकस्य पुत्री।
ततः समर्थो महसानुजोऽपि मार्गे वनस्यापि सुखं चरन्ति॥[92]

एवम्प्रकारेण श्रीरामः सीता लक्ष्मणश्च त्रयः चित्रकूटं प्राप्तवन्तः[93]। चित्रकूटे मन्दाकिनी नदी प्रवहति। मन्दाकिनीं प्राप्य श्रीरामः अतीव प्रसन्नः अभूत्। कविः लिखति -

मन्दाकिनीकूलमदोऽनुकूलं सन्ध्याविधानेषु तपोधनानाम्।
प्रायः सुखं लोकदृशां तनोति तुल्यं पदातेः रघुवंशकेतोः॥[94]

एताः शिलाः शीततलास्तरूणां छायान्तराले विलसन्ति राम।
ये केऽपि तप्ताः किरणैः खरांशोर्विश्रान्तिमश्रान्तमिहाश्रयन्ते॥[95]

चित्रकूटे विविधाः आश्रमाः सन्ति। यत्र साधवः आगच्छन्ति। यदा रामः चित्रकूटं प्राप्तवान् तदा पशुषु अपि वैरभावः न आसीत्[96]। रघुवंशेऽपि कालिदासेन एष दृष्टिभावः प्रकटितः दृश्यते[97]।

---

[90] भक्ष्याद्यभावाद्यदिहोपवासो रामस्य नैवेतरयोः कदाचित्।
श्रीरामनामामृतमत्ति सीता भ्राता तदङ्घ्रीक्षणतृप्तचेताः॥ (रा.महा., 3.82)

[91] म्लाने स्वीयमुखाम्बुजेति विपिने तीक्ष्णैच तीक्ष्णद्युतेर्दीप्तीनां निकरैः करेण करूणानीरप्रकीर्णेक्षणे।
कुर्वन्ती कमलाऽतिकोमलकरां च्छायां क्षितेरात्मजां ज्ञात्वाऽभूदधिकं सखेदरविणा म्लाननो राघवः॥ (रा.महा., 3.83)

[92] रा.महा., 3.86

[93] कृतस्तुतिः सत्कृतिभिर्मुनीशैः प्रत्याश्रमं पूजितपादपः।
भुञ्जन् फलादिप्रियतार्पितं तैः श्रीचित्रकूटं गिरिमाससाद॥ (रा.महा., 3.87)

[94] रा.महा., 3.95

[95] रा.महा., 3.96

[96] नृसिंहरामः प्रकरोति सिंहे करी करेणाक्रमणं यथेष्टम्।
व्याघ्री सदा पश्यति धेनुमेनां कन्यासमानां हृदये प्रलीनाम्॥
कालो विडालो निकटोपविष्टः शिष्टा कृतिस्तत्पुरतो रतोऽयम्।
विहाय भीतिं प्रमुदोन्दुरूणां गणः कणानां मदने विचित्रम्॥ (रा.महा., 3.100,101)

[97] रघु., सर्ग-2

चित्रकूटे उत्फुल्लनेत्रं रघुनाथं सर्वे मुनयः छात्राः वनवासिनश्च ददृशुः[98]। रामेण सह सीताऽपि परमसुन्दरी लक्ष्मीरिव शोभते स्म। चित्रकूटे सर्वे चिन्तयन्ति स्म यत् वने भोजनार्थं फलमूलादीनाम् अभावः वर्तते, तथापि एतेषां शरीरं पुष्टं प्रतीयते इति आश्चर्यमेव[99]।

सीतायाः वेणीं फणिन्द्राकृतिरिव शोभमाना आसीत्। किन्तु वेण्यां पुष्पाणि न शोभन्ते स्म। तत्र तैलाभावे केशाः रूक्षाः आसन्। तथापि तस्याः लीला विचित्रा आसीत्[100]। सीता का वर्तते इति विषये जनानां तर्कः-सीता जनानां जननी वर्तते। इयं समुद्रस्य सुता ब्रह्मनुता च वर्तते एवं तस्याः कान्तः साक्षात् भगवान् अनन्त एव वर्तते[101]।

मुनिः चिन्तयति यदत्र वने दुष्टानां हननाय साक्षात् विष्णुः एव मनुष्यरूपेण समागतः वर्तते[102]। यस्य स्मरणमात्रेण पापिजनाः दिव्यस्थानं लभन्ते। स एव विष्णुः सुरारिकालः कमलपत्राक्षः वर्तते[103]। तत्र स्त्रियः सीतां नमश्चक्रुः -

मातर्नमस्त्वच्चरणाम्बुजाय ब्रह्मादिदेवैः सततं स्तुताय।
शिवं कुरुष्वाखिलदेहभाजां सदा शिवे चोचुरिति स्त्रियस्ताः ॥[104]

चित्रकूटे साधूनां मुनीनाम् अनुकम्पया तरूणां मध्ये विशालां पर्णशालां लक्ष्मणः चक्रे[105]। तदीनां रघुप्रवीरः रामचन्द्रः लक्ष्मणेन सीतया सह मुनिजनेभ्यः प्रणामं कृतवान्। तदा मुनयः श्रीरामचन्द्राय लक्ष्मणाय सीतायै च कीर्तिं लभस्व इत्युक्त्वा आशिषं वितेनुः[106]। रामं दृष्ट्वा सर्वे मुनिजनाः प्रसन्नाः आसन्। श्रीरामचन्द्रं

[98] उत्फुल्लनेत्रं रघुनाथवक्त्रं पात्रं श्रियां सर्वमनोरमाणाम्।
छात्रैः कलत्रैः सह मित्र-पुत्रैस्संघाः मुनीनां ददृशुः सतृण्णम्। रा.महा., 3.111

[99] फलं च मूलं न हि दृश्यतेऽत्र हा! भोजनार्थं समये कदाचित्।
शरीरमिष्टं परितोऽतिपुष्टं कान्त्यापि जुष्टं न बतेति दृष्टम्॥ (रा.महा., 3.123)

[100] रा.महा., 3.127

[101] इयं सुता ब्रह्मनुता पयोधेः प्रायेण जाने जननी जनानाम्।
अयं न यस्यास्ति जनिर्न चान्तः कान्तः स तस्या भगवाननन्तः ॥ (रा.महा., 3.135)

[102] विष्णुः सहिष्णुः स्वजने विधातुं सुखान्यलं भूमितलङ्गतो यः।
अयं स्वयं प्राप्य मनुष्यकायं यातोऽन्तरायं च निहन्तुमत्र॥ (रा.महा., 3.140)

[103] यस्य स्मृतेः पापिजनाः लभन्ते तत्स्थानमन्तेऽप्यमरैरगम्यम्।
सोऽयं हरिर्दैवतवृन्दपालः सुरारिकालः कमलामलाक्षः ॥ (रा.महा., 3.142)

[104] रा.महा., 3.149

[105] रा.महा., 3.149

[106] कृतप्रणामाय सलक्ष्मणाय श्रीरामचन्द्राय सवल्लभाय।
लभस्व कीर्तिं शिवमूर्तिशुद्धामित्याशिषं ते मुनयो वितेनुः ॥ (रा.महा., 3.157)

स्तुतिभिः मुनिजनाः गतमोहमुद्रं चक्रुः[107]।

रामस्य माहात्म्यविषये कविः लिखति यत् भवसिन्धौ निमग्नानां सर्वेषां देहिनां तरणे तरणी नान्या रामपादात् वर्तते[108]। अत एव हे मानस! अहर्निशं रामं भज। रामं विना भवसागरस्य दुःखं दूरीकर्तुं न कोऽपि समर्थः[109]।

कविः कथयति यत् हे अनाथनाथ! हे विश्वेश! अहं संसारविपत्तिसमुद्रे मग्नः अस्मि। इतः परं मम यात्रा नोचिता[110]। हे राम! त्वम् असुरस्य पुत्रं प्रह्लादं रक्षितुं नृसिंहरूपेण अवातरः। अधुना कथं त्वं मयि दीने उदासीनः असि[111]? भगवतः माहात्म्यं कविः वर्णयति -

सुन्दरं रघुपते! तव नाम पापतापनिकरं च निहन्ति।
श्रीभरं यदपरं वितनोति किञ्च संसृतिदरं विधुनोति॥[112]

हे पुरुषाः! ये पातकानां मध्ये सन्ति एवं पापे निरताः भवन्ति तेऽपि रामनाम स्मरन्तः रामधाम प्रयाताः[113]। महामायाजालसमाकुलः अहं न जानामि यत् किं विधेयम् इति। अतः हे राम! त्वया शरणागतायै अभीतिः प्रदेया[114]। रामपदस्य स्मरणात् स्मृतिः नाशं प्राप्नोति। अतः रे मूढ! त्वं रामस्य स्मरणं कुरु[115]।

हे दयानिधे! राघव! क्षिप्रं दयां कुरु। अहम् अनन्तसंसारसागरे मग्नः अस्मि। शीघ्रम् उद्धर -

---

[107] दृष्ट्वा प्रहृष्टाः सकलाः मुनीशाः देहाद् गिरेर्यः कुरुते सकाशात्।
तं रामचन्द्रं गतमोहमुद्रं चक्रुः कृतार्थां स्तुतिभिः रसज्ञाम्॥ (रा.महा., 3.159)

[108] भवसिन्धुनिमग्नानां सर्वेषामपि देहिनाम्।
तरणे तरणिर्नान्या क्षमा रामपदादिह॥ (रा.महा., 3.163)

[109] स्मरानिशं मानस! राममेकं कुर्वेऽप्यनेकं भ्रमतोऽर्थनं ते।
विना न रामं भवभमखेद-निर्मूलविच्छेदविधौ पटीयान्॥ (रा.महा., 3.164)

[110] अनाथनाथं किमहं वदामि विश्वेश! विश्वान्तरलब्धवासम्।
मग्नस्य संसारविपत्समुद्रे यात्रा न मे राम! गुरोऽपरोऽस्ति॥ (रा.महा., 3.166)

[111] त्रातस्त्वया राम! महाविपत्तेः नृसिंहरूपेण सुतोऽसुरस्य।
आगत्य लोकादपि स स्वकीयात् कस्मादुदासीन इहासि दीने॥ (रा.महा., 3.167)

[112] रा.महा., 3.169

[113] निरन्तरं ये निरता विधानेऽप्यनेकसंख्यायुतपातकानाम्।
अन्ते स्मरन्तो हृदि रामनाम के के न धामप्रयतं प्रयाताः॥ (रा.महा., 3.171)

[114] माया-महाजालसमाकुलोऽयं जानीति किञ्चन्न ततो विधेयम्।
प्रयाति भीतिं भवतो ह्यभीतिः श्रीराम! देया शरणागताय॥ (रा.महा., 3.175)

[115] यतो यान्ति मृतिर्नाशं स्मृतिः रामपदस्य सा।
क्रियते न कुतो मूढ! या च रूढपदप्रदा?॥ (रा.महा., 3.179)

दयानिधे! राघव! सन्निधेहि क्षिप्रं दयां हा। मयि दुर्विधेहि।
अनन्तसंसारजलाशयान्तस्तरङ्गसङ्गोदितसम्भ्रमेण॥[116]

कविः जिह्वां कथयति हे जिह्वे त्वं रामनाम सर्वदा पठ-

सत्यं प्रिये त्वां प्रवदामि जिह्वे। नामानिशं त्वं पठ राघवेति।
तद् वैपरीत्ये प्रकरोमि घातं किञ्चापि पातं स्वनिवेशतस्ते॥[117]

कविः निवेदयति यत् अखिलान् सुरान् प्रणिपत्य याचे यत् रामनामपदस्मृतिः सदा मे भूयात् -

पुनः पुनरहं याचे प्रणिपत्याखिलान् सुरान्।
अनिशं मे भृशं भूयाद् रामनामपदस्मृतिः॥[118]

अधुना कश्चित् वृद्धः रामं कथयति यत् तस्य पुरुषस्य वृद्धत्वं धिक् यस्य शक्तिं रामचन्द्रस्य भजने न भवति। हे राम! मया व्यर्थमेव नवं वयः नीतम्। अधुना किं करोमि अहं वृद्धोस्मि[119]।

कविः अद्वैतयतिः शङ्कराचार्यस्य 'भजगोविन्दम् भजगोविन्दम्' इति स्तुतिः स्मरति। बालः तावत् क्रीडाशक्तः तरुणः तावत् तरुणीरक्तः। अधुना अहं वृद्धः सञ्जातः। हे रघुपते! त्राहिमाम् -

बाल्ये मूढमतिः पयोधररसास्वादैकतानाशयः
कौमारे वयसि स्पृशद्रतिरसं लीलाविधौ बालके।
तारुण्ये स्मरवह्निकीलविकलस्वान्तो नितान्तोन्मदो
हा! वृद्धः प्रकरोमि किं रघुपते! ताताधुना त्राहि माम्॥[120]

वृद्धः कथयति यत् मम शरीरे या शक्तिरासीत् सा गता। विलोकने यत् दिव्यं चक्षुः आसीत् तत् चक्षुः कार्यं न करोति। शरीरे या कान्तिः आसीत् स कान्तिः

---

116 रा.महा., 3.193
117 रा.महा., 3.197
118 रा.महा., 3.198
119 व्यर्थमर्थार्थने राम! मया नीतं नवं वयः।
किं करोम्यधुना वृद्धः सिद्धः स्वीकरणेऽक्षमः॥ (रा.महा., 3.205)
120 रा.महा., 3.206

क्षीणतां गता[121]। हे भगवन्! तव पूजार्थं जलम् आनेतुं मम शक्तिर्नास्ति। आसनं बध्वा त्वद् पादचिन्तनविधौ रुचिः न भवति। तव पावनकथां श्रोतुं वक्तुं वा न रोचते -

नाहर्त्तुं तव पूजने शुचिजलं शक्तो विविक्ते स्थले
स्थातुं त्वत्पदचिन्तनविधौ बद्ध्वा क्षणं चासनम्।
वक्तुं श्रोतुमथातिपावनकथा गाथास्तथा सत्पथात्
हा! वृद्धः प्रकरोमि किं रघुपतेः! ताताधुना त्राहि माम्॥[122]

वृद्धावस्थायां प्रातःकाले वायुः वहति अतः गेहात् बहिः चरणं छिपामि। शिशिरं नीरम् आचमने हिताय न भवति -

वातः प्रातररङ्करोति तुदनं देहे ततो नो बहि-
र्गेहात्किञ्चिदपि क्षिपामि चरणं चित्रं परं श्रूयताम्।
नीरं नाचमने हिताय शिशिरं तद्वै कुतश्चाप्लवे
हा! वृद्धः प्रकरोमि किं रघुपते! ताताधुना त्राहि माम्॥[123]

एवम्प्रकारेण वृद्धानां कृते सर्वं कष्टकरं हासजननं च भवति। तृष्णावृद्धिमुपैति। शब्दानाम् उच्चारणं कर्तुं न शक्यते। युक्तम् अपि वचः न श्रूयते। पृष्ठं वक्रं यातम्। दृष्ट्वा सर्वे हसन्ति। कफस्य आधिक्यं वर्तते। मम प्राणाः व्याकुलाः भवन्ति। क्षुधा बाधा जायते। अतः सर्वं कष्टं प्रतिभाति। कविः लिखति -

वक्त्रं पाणिपदं पुनर्मुखमिदं वीभत्सरूपास्पदं
जिह्वा चापि तथा वदत्यपि कथा नाना वृथा सर्वथा।
एतद् वीक्ष्य भवन्ति चान्तरगताः सर्वे प्रहासाञ्चिताः
हा! वृद्धः प्रकरोमि किं रघुपते! ताताधुना त्राहि माम्॥[124]

गृहे युवती पुत्री पुत्रः जामाता भ्राता सर्वे सन्ति। धनम् अपि वर्तते किन्तु कोऽपि मम हितं न करोति -

121 शक्तिर्व्यक्तिमुपागता करपदे सर्वापि सा निर्गता चक्षुर्दिक्षुविलोकनेति चतुरं त्यक्तं रुचा स्वीयया।
कायश्चायमनन्तकान्तिनिलयः सोऽप्यागतः क्षीणतां हा! वृद्धः प्रकरोमि किं रघुपते! ताताधुना त्राहि माम्॥ (रा.महा., 3.207)

122 रा.महा., 3.208

123 रा.महा., 3.209

124 रा.महा., 3.223

अस्ति स्वस्तिमती गृहेषु युवतिः पुत्रः सुता तत्पति-
र्भाता चापि युतः सुतैः प्रविततैर्व्रातैः स्वसम्बन्धिनाम्।
द्रव्यं चाप्यमितं हितं न विहितं केनाप्यहो! निश्चितं
हा! वृद्धः प्रकरोमि किं रघुपते! ताताधुना त्राहि माम्॥[125]

एवम्प्रकारेण वृद्धस्य बहुविधविलापः राघवोल्लासमहाकाव्यस्य तृतीय सर्गे वर्णितो दृश्यते। रामः चित्रकूटे बहूनि दिनानि सुखेन नीतवान्। अनन्तरमसौ दण्डकारण्यं प्रविवेश -

नीताः कियन्तो दिवसाः सुखेन श्रीचित्रकूटाद्रिगुहान्तरेषु।
रामः समेतोऽनुजजानकीभ्यां मातर्गतो दण्डकमुग्रदण्डः॥[126]

तृतीयसर्गस्य अन्ते अद्वैतयतिः चतुर्थसर्गस्य कथानकसम्बन्धिसङ्केतमपि करोति -

जनकादधिको औषधादिव तद्वाक्याद् हृद्रोगस्य विशोधनात्। दुःखशल्यं हि
कौशल्या-हृदयान्निर्ययौ शनैः॥[127]

## चतुर्थसर्गस्य कथा

चतुर्थसर्गस्यारम्भे रुदती कौशल्या रामविषये सुमित्रां कथयति[128]। कौशल्या अतीव दुःखिता स्रवन्नेत्रा वर्तते। सा कथयति मया रघुनन्दनस्य विषये चिन्ता क्रियते। यदा अयं रघुवंशदीपः रामः जातः तदा अमरलोकात् देवैः प्रसूनं विकीर्णम्[129]।

तदा किन्नराणाम् अप्सरसां च गीतम् ऋषीणां तोषघोषः सर्वत्र उद्ध्वनितः बभूव[130]। यदा रामः पृथिव्यामवातरत्तदा आकाशवाणी अभूत्। सर्वेषां चिन्ता विनाशं यातु। पृथ्वी निशङ्कं सर्वं वित्तं स्वीकरोति। अधुना राक्षसानां दलनाय प्रकोपी

125 रा.महा., 3.225
126 रा.महा., 3.250
127 रा.महा., 3.251
128 याते द्विजाते कौशल्या रामबाल्यादिसत्क्रियाः।
दुःखभारस्रवन्नेत्रा सुमित्रामाह तत्परा॥ (रा.महा., 4.2)
129 जातो यदाऽसौ रघुवंशदीपः सम्प्रोल्लसन्निर्जितमेघकान्तिः।
आगत्य देवैर्नभसोऽन्तरालं प्रसूनजालं परितो विकीर्णम्॥ (रा.महा., 4.5)
130 किञ्चाप्सरः किन्नरचारुगीतैः स्फीतैश्च वादित्रशतप्रणादैः।
ऋषीश्वराणामपि तोषघोषैर्देशा दिशामुध्वनिता बभूवुः॥ (रा.महा., 4.6)

हरिः जातः। सः श्रीरामः वर्तते इतिप्रचारो अभूत्[131]। अयं कमलनयनः विशालबाहुः रामः वर्तते इति मुनयः प्राहुः। तदानीं मम हृदये यत् सुखम् अभूत् तत् अन्यः कोऽपि न जानाति इति कौशल्या कथयति[132]।

कौशल्या अग्रे वदति यत् यदा रामस्य जन्म अभूत् तदा अहम् आनन्दसमुद्रे मग्ना आसम्। तदानीं देशस्य विदेशस्य गेहस्य देहस्य जनस्य च चिन्ता मयि न आसीत्[133]।

रामचन्द्रस्य निर्मला अतिशीता सुखकरा मुख-चन्द्रमयूखाः कौशल्यामानसे विकासं भजन्ति। अतः तत्र तस्याः शरीरे पापस्य तापस्य च लेशो नास्ति। रामस्य चरणकमले अनन्तं सुखं भवति। श्रीरामस्य भास्वरनूपुरेण यः शब्दः कान्तिश्च अभवत् तदानीं रामस्य सौन्दर्यगुणेन कौशल्या रामात् अन्यत्र कुत्रापि गन्तुं न मनश्चकार[134]। रामाननं दृष्टवा कौशल्या पुनः पुनः दर्शनेन तत्र वितृष्णभावः न अभूत्[135]।

कौशल्या सुमित्रां कथयति यत् यदा श्रीरामस्य जन्म अभूत् तदा मया अवगतं यत् अयं भक्तावतारः नारायणः मम गृहे अवतीर्णः[136]।

कौशल्या रामं स्तौति- हे भगवन्! अहं शिरसा नमामि त्वं बालरूपं स्वीकुरु -

नाथाप्रगल्भा स्तवने त्वदीये दिव्याकृतिप्रेक्षणमुद्भ्रमा सा।
योगप्रयोगैरपि कर्मयोगैर्दुःप्राप्यमङ्घ्रिं शिरसा स्पृशामि॥[137]

---

131 चिन्ता यातु विनाशमाशु भवतः सर्वा सुपर्वाधिप!
क्षोणी दैवतदत्तवित्तमपि तन्निःशङ्कमङ्गीकुरु।
जातो राक्षसदन्तिदम्भदलने कोऽपि प्रकोपी हरिः
श्रीरामस्त्विति वृद्धसिद्धवचसा मातुः प्रचारा दिवि॥ (रा.महा., 4.8)

132 आलोकिते तत्र पवित्रनाम्नि रामे सुधाशीतलमञ्जुधाम्नि।
जातं सुखं यद् हृदये मदीये तच्चाद्वितीये न कुतो द्वितीये?॥ (रा.महा., 4.10)

133 मग्नाहमानन्दमये समुद्रे निर्यातमुद्रे प्रचलत्तरङ्गे।
नासादि किञ्चद् विदिशां दिशां वा देहस्य गेहस्यजनस्य सिञ्चत्॥ (रा.महा., 4.11)

134 रत्नप्रभा-भास्वरनूपुरेण पूरेण कान्त्या विमलङ्गजायाः।
केनापि सौन्दर्यगुणेन रामात्कुत्रापि गन्तुं न मनो ममैच्छत्। रा.महा., 4.17

135 रामाननं पङ्कजशोभमानं हासोदित श्रीरदरत्नचारू।
नालोकयन्त्या मम चेतसोऽभूत् प्रिये! चिरेणापि वितृण्णभावः॥ (रा.महा., 4.24)

136 ज्ञातं मयायं जगतामधीशः शेषाङ्गशैय्याशयनप्रवीणः।
नारायणो भक्तपरायणत्वात्प्राप्तोऽवतारं सदने मदीये॥ (रा.महा., 4.30)

137 रा.महा., 4.31

त्वन्मायया मोहमहं प्रणीता तेनाब्रुवं देवतदैवमेवम्।
त्वं याहि बालत्वमबालकीर्त्ते! मूर्तिः समीहे परिरम्भणानि ॥[138]

श्रीरामः अतीव दानी आसीत्। वनगमनात् पूर्वमसौ सर्वं धनं ब्राह्मणेभ्यः प्रादात् -

आसीद् यदेतद् द्रविणं स्वकोषे तोषेण पूर्णः ससुवर्णवर्णः।
राजा ददौ तुष्टमनाः द्विजानां वृन्दाय कुन्दामलहासवक्त्रः ॥[139]

शिशुः श्रीरामचन्द्रः अतीव शोभनः आसीत्। तस्य शरीरं भूषणैः विभूषितमासीत्। स्नेहमार्जनेन तस्य देहः कान्तिमयः आसीत्। तस्य पादे किङ्किणीविराजितशब्दः भवति स्म। एवं शिशुः रामः आसीत्[140]। कवि तुलसीदासेनपि बालस्य रामचन्द्रस्य वर्णनं रामचरितमानसे कृतम्। प्रभातकाले माता कौशल्या बालं रामचन्द्रं प्रबोधयति -

प्रातर्लीलास्वलं लोला दोलान्दोलननिद्रितम्।
राममर्थयते माता जाताकाङ्क्षावबोधने ॥[141]

माता कथयति- हे चन्द्रमुख! रामचन्द्र! अधुना प्रातर्जातम्, अत तव मुखपङ्कजस्य विकासः जातः। त्वं खेलनैः मुदं प्रतनुताम्। सोत्कण्ठान् अखिलान् प्रियान् प्राप्य त्वम् आनन्दं कुरु[142]। हे रघुनाथ! बोधं प्रयाहि। हे दयानिधे! तव निद्रा-भङ्गात् रोगाः दूरीभवन्ति। उत्तिष्ठ बाललीलां कुरु -

बोधं प्रयाहि रघुनाथ! दयापयोधे
स्वाधेर्भविष्यति ततः सकलस्य नाशः।
वेदा हृदाऽविरलमञ्जुलबाललीला-

---

[138] रा.महा., 4.32

[139] रा.महा., 4.37

[140] बालभूषणविभूषितदेहः स्नेहमार्जनविशेषितकान्तिः।
किङ्किणीचयविराजितपादो खेदभेदनमधात् शिशुरामः ॥ (रा.महा., 4.40)

[141] रा.महा., 4.45

[142] बोधं याहि सुधांशु सुन्दरमुख! श्रीरामचन्द्राधुना
निद्रोन्निद्रसरोजनेत्र-भजतामेषापि सम्पूर्णताम्।
प्रातर्जातमिदं मुदं प्रतनुतां त्वत्खेलनैः पश्यतां
सोत्कण्ठानखिलानिमांस्तवजनान् स्वीयैः प्रियैः पूरय ॥ (रा.महा., 4.46)

जालानुवर्णनधियः परितो भ्रमन्ति ॥[143]

पुनः प्रातःकाले माता कौशल्या पुत्रं रामं कथयति - हे पुत्र! उत्तिष्ठ जगतां कष्टं दूरीकुरु। बालभाषणेन सर्वेषां तापं दूरीकुरु -

उतिष्ठ दुष्टजनकष्टकरेष्टराम!
त्वद् बालभाषणसुधाप्रचुरप्रचाराः।
कुर्वन्तु तापमखिलं श्रवसोर्विदूरे
सुरेण सम्प्रति दिशां क्रियते प्रकाशः ॥[144]

हे विश्वम्भर! अधुना तव निद्रा नोचिता। जनानां जननीनां हिताय त्वं निद्रां त्यज। हे रघुनाथ! मज्जीवने च उद्बोधं लभस्व -

विश्वम्भरस्य तव राघव नैव निद्रा
विद्राविघातनिचयस्मृतितो हिताय।
तातो भवानपि तथा जननीजनानां
मज्जीवनञ्च रघुनाथ! लभस्व बोधम् ॥[145]

कौशल्या कथयति हे राघव! तव सेवार्थं देवाः समागताः सन्ति। पाताल-लोकेऽपि दीनाननाः विज्ञप्तिं कुर्वन्ति। हे राघव! अधुना उत्तिष्ठ दुष्टराक्षसजनानां नाशं कुरु -

सेवार्थं बहिरागताश्च सकला देवेश! देवा इमे
विज्ञाप्तिं पतितास्तलेऽपि च भुवः कुर्वन्ति दीनाननाः।
उद्बुद्धो भव राघवाद्य जगतामानन्दसम्पत्तये
रक्षोवृन्दममन्दसत्त्वकुरुते चारं पुनर्मारय ॥[146]

कौशल्या कथयति हे राम! त्वम् उत्तिष्ठ। इन्द्रः समागतः। ब्रह्मा समागतः। भूमिः समागता अन्येपि समागताः। ते सर्वे प्रार्थयन्ति यत् हे राम! लङ्कायाः ईश्वरात् रावणात् पाहि -

---

143 रा.महा., 4.47
144 रा.महा., 4.49
145 रा.महा., 4.51
146 रा.महा., 4.56

स्तोत्रं गोत्रमुदीर्य राम ! भवतः ! कुर्वन्त्यपि प्रार्थनां
नानासत्यवचश्चयाश्च विनयानम्रोत्तमाङ्गा पुरः ।
लङ्कायाः पुर ईश्वरो विधिवरो नद्धः प्रसिद्धः खलो
लोकान् शोकयुतान् करोति करुणासिन्धोऽस्तु बोधोऽधुना ॥[147]

अत्र स्वभावोक्तिरलङ्कारस्य प्रयोगेन बालरामस्य कियत् सुन्दरं वर्णनं करोति कविः । श्रीरामचन्द्रः एकस्मात् अङ्कात् अपरं पर्यङ्कं गच्छति स्म-मातृतो पितरं याति, पितृतो मातरं पुनः । एवं गतागते रामे पश्यतां न गतागते ।

श्रीरामःकौमारावस्थायाम् रिङ्गणं कुर्वन् इतस्ततः गच्छति स्म। रात्रौ अपि तस्य कृते दीपस्य अपेक्षा नास्ति -

त्रैलोक्यदीपे रघुनाथरूपे गेहान्तरे कुर्वति रिङ्गणानि ।
नासीदपेक्षापि निशासु तत्र दीपस्य नामुत्रविचित्रलेशः ॥[148]

रामः गेहात् बालैः सह बहिः गच्छति स्म तदा कौशल्यायाः मनः अपि तेन सह भवति स्म । कविः श्रीरामं प्रार्थयति हे रघुपते ! मया प्रार्थना क्रियते यत् प्राणान्तकाले त्वं दूरं मा व्रज -

भक्तेभ्यः स्वपदं त्वया रघुपते ! सम्प्रार्थितं दीयते
वक्त्रात् साधुजनस्य वेदनिचयादप्येतदाकर्णितम् ।
एकं त्वामहमर्थये क्षणमपि प्राणाप्रियाऽक्ष्णोर्युगाद्
दूरं नो व्रज वाक्यतोऽतिविहसन् रामोऽन्तिके खेलति ॥[149]

रामस्य स्मरणादेव जनानां मृतेः भयं नश्यति इति साधुजनाः कथयन्ति। रामस्य वाणी अमृततुल्या आसीत्। रामस्य पदं मनुष्याणां कृते दुर्लभं भवति -

रामस्य वाणी सुधया समाना नैवोपमा चास्य वदान्यतायाः ।
गुणेषु विज्ञस्य कथं त्यजन्तु लाभास्पदं तस्य पदं मनुष्याः ॥[150]

रामस्य उदारता अद्भुता आसीत्। यदा केनापि किञ्चित् सम्प्रार्थितं तदा तेन तस्मै समस्तं प्रदत्तम् -

---

147 रा.महा., 4.60
148 रा.महा., 4.80
149 रा.महा., 4.85
150 रा.महा., 4.104

उदारतामस्य तदैव दैव-सिन्धोः समाकर्णय राघवस्य।
सम्प्रार्थितं केन च किञ्चदेव ददाति तस्मै सहसा समस्तम्॥[151]

वित्तेश्वरेण यत् धनं जनकाय प्रदत्तं तत् धनं द्विजेभ्यः दशरथः न प्रादात्। किन्तु तस्य पुत्रेण श्रीरामचन्द्रेण विना प्रयत्नं सर्वं प्रदीयते[152]। धनस्य संरक्षणे क्लेशः भवति अतः दानमेव तस्य परमं निदानं वर्तते-

वक्ति प्रसङ्गाज्जगतीशमेव क्लेशो महान् रक्षण इन्दिरायाः।
दानं तदीयं परमं निदानं जाने सुखानामहमत्र तात॥[153]

कविः भर्तृहरिः लिखति -

दानं भोगो नाशस्तिस्त्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

अर्थात् धनस्य दानमपि कर्तव्यं, भोगः न केवलं, नोचेत् तस्य नाशः भविष्यति। कविः अद्वैतयतिः लिखति -

शून्येन दान-भोगाभ्यां द्रव्येन द्रव्यवान् भवेत्।
तत्कथं न जनाः सर्वे द्रव्यवन्तः सुमेरुणा ?॥[154]

कविः पुनः अग्रे कथयति-नृपेन्द्रस्य महाराजस्य द्विपेन्द्रस्य गजवरस्य गौरवं देवनिर्मितं दानं भवति[155]। यदा जनानां भाग्योदयः भवति तदा तेन धर्मः विधेयः। अन्यत् किमपि न कर्त्तव्यम्। धर्मं विना न कोऽपि कदापि सहाय्यभावं समुपैति -

धर्मं कुरुष्वानिशमीशबुद्धे! सिद्धेरयं कारणमायतीनाम्।
श्रेयान् सखा सर्वसुखाद्यकर्त्ता हर्त्तापदामत्र च तत्र लोके॥[156]

---

151 रा.महा., 4.107
152 रा.महा., 4.109
153 रा.महा., 4.110
154 रा.महा., 4.111
155 नृपेन्द्रस्य द्विपेन्द्रस्य गौरवं देवनिर्मितम्।
शोभायां तु परं दानं निदानमुभयोरपि॥ (रा.महा., 4.112)
156 रा.महा., 4.114

कविः लिखति यत् रे मनुष्य ! यदि त्वया बहुसुखस्य साधनं धनं विमलचेतसा न प्रदत्तं तदा तव आधिपत्यं व्यर्थं भवति -

रे त्वया विमलचेतसा धनं साधनं बहुसुखस्य साधवे।
नार्पितं हृदि विचिन्त्य माधिपं माधिपङ्क्तिजननं वृथा कृथाः ॥[157]

यदि कश्चित् पुरुषः अनुरागपूर्वकं जगदीश्वरं ध्यायन् तीर्थराजे प्रयागे भूमिं कस्मैचित् ददाति तदा असौ नरः राजेन्द्रभावं प्राप्नोति[158]। कीटादीनां यथा कायः नाशं प्राप्नोति तथा मानुषाणामासक्तशरीरं नाशं प्राप्नोति। अतः व्यर्थमासक्तिः न विधेया। यदा मनुष्यः संसारसिन्धौ पतितो भवति तदा तस्मात् भवसागरात् निस्तरणं कथं विधेयम् इति यत्नः कर्तव्यः। यदि यत्नकरणे विलम्बो भवति तदा कार्यं सफलं न भवति।

संसारसिन्धौ पतितेन साधो ! बहिः कथं निःसरणं विधेयम्।
प्रेम्णा दृढं स्वीकुरु राम-राम-श्रीराम ! रामेत्यभिधानमालाम् ॥[159]

श्रीरामः स्वपितुः अपेक्षया अधिकः गुणवान् आसीत्। अतः कविः कथयति यत् -

पित्रा तुल्यगुणः पुत्रः कुत्रचित् पुण्यतो भवेत्।
जनकादधिको यस्तु वस्तुतः पुरुषोत्तमः ॥[160]

अतः नूनम् एव श्रीरामः पुरुषोत्तमः आसीत्। श्रीरामचन्द्रः प्रयागं गतवान् पुनः चित्रकूटं प्राप्तवान् अतः कौशल्या गौरवमनुभवति। सा कथयति यत् सा सन्ततिः पुण्यशालिनी वर्तते यया तीर्थनिषेवणैः अपूर्वं पुण्यं लभ्यते[161]। रामे बहवः गुणाः आसन्। बालः रामः अनुजस्य हस्तं निधाय पितुः सकाशं गच्छति स्म। कौशल्या सुमित्रां कथयति हे सुमित्रे ! अहं सत्यं वदामि। रामः प्रेमप्रवृत्तः आसीत्। असौ दीनबन्धुः कर्णधारः आसीत्। रामवियोगे कौशल्या रोदिति -

---

157 रा.महा., 4.118

158 भानूपरागे हृदि सानुरागे ध्यायन् यदाऽयं जगदीश्वरङ्घ्रिम्।
दादाति भूमिं सति तीर्थराजे राजेन्द्रभावं स नरः प्रयाति ॥ (रा.महा., 4.116)

159 रा.महा., 4.125

160 रा.महा., 4.129

161 तस्यैव संततिः पुण्या पुण्यानामिह संततिः।
येनार्जिता सताऽपूर्वं सर्वतीर्थनिषेवणैः ॥ (रा.महा., 4.131)

रम्यं यत्र युगं भ्रुवोरभिभवश्चेतोभुवो धन्वनो
येनार्थिक्रियतेऽसुना समधरद्योतिस्फुरत्श्रीरदम्।
आस्यं हास्ययुतं कपोलविलसत्कान्तिप्लुतं राम! तत्
संसारश्रमराशिनाशि भवताद् दूरे न मेऽक्ष्णोर्युगात्॥[162]

कौशल्या श्रीरामम् एकवारं द्रष्टुमिच्छति। सा प्राणान् त्यक्तुमुत्सुका वर्तते। सा अग्नौ पतितुं समुद्यता वर्तते। येन केन प्रकारेण सा रामं द्रष्टुमिच्छति। रामः कौशल्यायाः सर्वस्वं वर्तते। सा कथयति यत् -

राम! त्वं जननी ममासि जनकस्त्वं सोदरः सुन्दरो
जीवस्यापि च जीवनं बत धनं यद् वर्द्धनं श्रेयसाम्।
मध्ये तुन्दममन्ददाहमभितः कुर्वन्ति दुःखाग्रय-
स्त्वदृष्टी-रसवृष्टिराशु कुरुतादेषां प्रणाशं भूशम्॥[163]

कौशल्या रामस्य वियोगे क्रन्दति। हे राघव! तव अपत्यं न अस्ति। अतः त्वं पुत्रस्य दुःखं न जानाति। हे रघुपते! त्वं मम कष्टं जानीहि -

नापत्यं तव राघवास्ति पुरतो वक्तव्यमेतत् किमु
यद् दुःखं भवतीह तस्य विरहात् पित्रोः सुपुत्रोत्कटम्।
एतस्यात्र हि विद्यते रघुपते! नो किञ्देवोपमा
ज्ञात्वैवं त्वरया कुरुष्व परया संभावनां मामिकाम्॥[164]

हे रघुनाथ! यथा मीनः जलात् विमुक्तः दुःखी भवति तथा अहमपि रामं विना कष्टे अस्मि -

मीनो यथा कापि जलाद् वियुक्ता युक्ता भवेत्केन च संभ्रमेण।
इयं तथा रामसुधाविमुक्ता प्रायोऽनुरक्ता विकलत्वमेति॥[165]

हे राम! त्वया विना मम निद्रा न भवति। अहं तन्द्राकुला चित्ताऽस्मि। त्वया विहीना अहं दीना अस्मि[166]। हे राम! तव वियोगे मम हृदये हुताशः प्रज्ज्वलति। अतः त्वमत्रागत्य प्रेम्णा भुजद्वयेन शीघ्रमालिङ्गनं देहि -

[162] रा.महा., 4.140
[163] रा.महा., 4.143
[164] रा.महा., 4.144
[165] रा.महा., 4.147
[166] श्रीरामचन्द्रानिशमेव निद्रा नायाति तन्द्राकुलचेतनायाः।
भवामि नानाविपदापि दीना हीना त्वया जीवनजीवनेन॥ (रा.महा., 4.147)

वियोगतस्ते परितः प्रवृत्तो रामोग्रवृत्तो हृदये हुताशः ।
तच्छीतशीतेन भुजद्वयेन प्रेम्णाप्रियालिङ्गनमाशु देहि ॥[167]

हे राघव ! त्वं मम भवार्णवे नौका असि । गुरुः वशिष्ठः सत्यमेव उक्तवान् यत् त्वं वनौका वर्तसे । अहं विपदि प्रयाता अस्मि किन्तु त्वं मां न पश्यसि -

भवार्णवे त्वं रघुनाथ ! नौका सत्यं वनौका अवदद् वशिष्ठः ।
अहं तु माता विपदं प्रयाता दृशापि ताताद्य न वीक्षिता हा ॥[168]

कौशल्या करुणविलापं करोति । हे राम ! हे रावणरिपो ! हे करुणासमुद्र ! अहं तव शरणं चरणं संगतास्मि । अतः एक बारं दर्शनं प्रदाय मां दीनामुद्धर -

राम ! रावणरिपो ! करुणाब्धे ! सङ्गतास्मि शरणं चरणं ते ।
एकवारमपि पारमपार-दुःखक्षीरजलधेर्नय दीनम् ॥[169]

कौशल्या विलपति- हे राम ! स्वप्नेऽपि दर्शनं न भवति -

राम ! ते दर्शनं साक्षान्नो चेद् भवति मास्तु तत् ।
स्वप्नेऽपि जायते नैव दैवस्य गहना गतिः ॥[170]

हे राम ! हा ! अहं कुत्र यामि । अहं दुःखे पतिताऽस्मि न कोऽपि जगत्त्रयेऽपि मम दुःखस्य हर्ता वर्तते । अतः त्वमागच्छ -

क्व यामि राम ! क्व च हा ! न यामि त्वया विना दुःखघना दिनानि ।
नैवास्ति कुत्रापि जगत्त्रयेऽपि दुःखस्य हन्ता भवतोऽवतोऽन्यः ॥[171]

कौशल्या कथयति यत् यदा रामस्य स्मरणं भवति । तदा रणे मरणमपि न भवति । रामस्य कृपया यमराजः त्यक्त्वा गच्छति -

[167] रा.महा., 4.149
[168] रा.महा., 4.151
[169] रा.महा., 4.153
[170] रा.महा., 4.161
[171] रा.महा., 4.163

स्मरणे सति रामस्य मरणेऽपि रणे कुतः ।
भयं तेन कृतान्तेन कृतान्तेन विवर्जिता ॥[172]

यथा शीतलं जलं विधिवशात् अग्निसमानं भवति तथैव रामचिन्तनं सुखरूपमनलसमानं भवति -

शीतलं किल जलं विपरीताद् हा! विधेर्भवति बह्नि, समानम्।
तत् तथैव जगतां सुखरूपं रामचिन्तनमिहानलरूपम् ॥[173]

कौसल्या कथयति यत् हे राम! त्वमेव मम गतिः नान्या गतिः वर्तते। त्वया विना अत्र मम किञ्चत् नास्ति। एवं प्रकारेण बहुधा विलापं विधाय निजशिरः जानुदेशे निधाय रघुनाथमाता दुःखिता अभूत् -

एवं विलापान् बहुधा विधाय निधाय मौलिं निजजानुदेशे।
तूष्णीं बभूवाक्षिजलाविलाङ्गा दुःखातिसङ्गाद् रघुनाथमाता ॥[174]

दुःखार्ता जननी कौशल्या वदति यदि मम पापराशिः वर्तते तदा त्वं पापनाशी मातरं मां पश्य -

महान् यदि स्यान्मयि पापराशिस्त्वं पापनाशीति जने प्रसिद्धः ।
तन्नेत्रमार्गे व्रज चारुनेत्रं श्रीरामपुत्राशुतया दयाब्धे! ॥[175]

एवम्प्रकारेण राघवोल्लासमहाकाव्यस्य चतुर्थे सर्गे रघुनाथबाललीलावर्णनं वर्तते।

**पञ्चमसर्गस्य कथा**

राघवोल्लासमहाकाव्यस्य पञ्चमे सर्गे विश्वामित्रः अयोध्यां गतवान्। कनकासनान्ते सुखोपविष्टं गाधेः तनुजं विश्वामित्रं सम्पूज्य राजा प्रसन्नमनसोवाच- अद्य मम गोत्रं पवित्रमभूत्। यस्य चरणरेणुः सौभाग्येन लभ्यते तादृशः श्रेष्ठः मुनिप्रवरः मम सदनं प्रयातः -

---

172 रा.महा., 4.169
173 रा.महा., 4.178
174 रा.महा., 4.185
175 रा.महा., 4.187

जातं पवित्रं तपनस्य गोत्रं पात्रं तथा कीर्त्तिपरम्पराणाम्।
नो लभ्यते यस्य पदप्रणीतो रेणुः स साक्षात्सदनं प्रयातः ॥[176]

दशरथः कथयति यत् अद्य मम शरीरं पवित्रमभूत्। मम सदनं धन्यं अभूत्। पुत्राः धन्याः, कलत्राणि धन्यानि अभवन्। मित्रवर्गः धन्यः जातः। अद्य अस्य गुरोः अङ्घ्रिजलेन सर्वे अभिषिक्ताः -

धन्यं वपुर्मे सदनं च पुत्रास्तथा कलत्रापि च मित्रवर्गः।
यन्मौलिनालिङ्गितमीश्वरेण तेनाङ्घ्रिनीरेण गुरोऽभिषिक्ताः ॥[177]

वशिष्ठस्य आशीर्वचोभिः पूर्णं रामचन्द्रं तेजःसमुद्रं वीक्ष्य मुनिविश्वामित्रः उवाच - दशरथस्य पुत्रः अयं रामचन्द्रः विचित्रः वर्तते। कविः रामनामालापमाहात्म्यं वर्णयति -

एकमाभरणं वाण्याः पापश्रेण्याश्च नाशनम्।
स्फुटमालपनं राम! रामरामेति केवलम्॥[178]

अद्वैतयतिः कथयति यत् रामस्य सम्बोधनं पुंसां धनं भवति। सुखसम्पदां साधनं भवति। अतः रामस्मणात् अपरं किमपि नास्ति। तत्र रामं विना अखिलं विश्वमनित्यं वर्तते -

बोधनं च धनं पुंसां साधनं सुखसम्पदाम्।
नापरं विद्यते राम! नामतः प्रेमतः स्मृतात्॥[179]

स्मर रामं मनो नित्यमनित्यमखिलं जगत्।
भ्रमतोऽभिमतो नैव विश्रामः श्रमिणोऽन्यथा॥[180]

यस्य कर्णे रामनामवर्णः पतति तस्य सर्वं पापं विनश्यति। अत एव हे चेतः! रामनामस्मरणं कुरु। तस्मात् रुचिरम् अन्यत् किमपि नास्ति। श्रीरामस्य स्मरणात् मरणस्य नाशः भवति। अतः रामं स्मर -

[176] रा.महा., 5.5
[177] रा.महा., 5.6
[178] रा.महा., 5.16
[179] रा.महा., 5.17
[180] रा.महा., 5.29

वर्णोऽपि कर्णे यदि रामनाम्नः प्राप्तः कदाचित् सुकृतेन जन्तोः ।
यात्येव नाशं तदमुष्य पापं नासौ प्रतापं भजते भवोत्थम् ॥
सत्यं वदामि चेतस्त्वां रामनामस्मृतेः परम् ।
दृश्यते नैव रुचिरं किं चिरं भ्रमसे वृथा ॥
यतो याति मृतर्नाशं स्मृतिः रामपदस्य सा ।
क्रियते न कुतो मूढ ! या च रूढपदप्रदा ॥[181]

रामः त्रिषु लोकेषु श्रेष्ठः वर्तते । अतः अन्यत् सर्वं त्यक्त्वा रामं भज । रघुनायकस्य गुणगणान् वक्तुं शेषनागोऽपि समर्थः न भवति[182] । विश्वामित्रः कथयति यत् सुबाहुमारीचनिशाचरौ द्वौ राक्षसौ मम यज्ञसमये विघ्नानि कुरुतः । अन्येऽपि बहवः दुष्टाः तयोः सहायकाः भवन्ति -

सुबाहु-मारीचनिशाचरौ द्वौ मुख्यौ सहाया बहवस्तदीयाः ।
कुर्वन्ति विघ्नान् यजनस्य काले स्थित्वाऽन्तराले गगनस्य दुष्टाः ॥[183]

अतः तव पुत्रः रामचन्द्रः रजनीचराणां साक्षात् कालः वर्तते । शेषावताररूपो लक्ष्मणोऽपि तेषां निधनाय समर्थः । तं रामं लक्ष्मणेन सह देहि -

रामाभिधानस्तव यो हि बालः कालः स साक्षाद् रजनीचराणाम् ।
तं देहि राजन् ! निधनाय तेषां शेषांशभूतेन च लक्ष्मणेन ॥[184]

राजा दशरथः विश्वामित्रस्य वचनं श्रुत्वा मूर्छितोऽभूत् । रामात् विमुखो न अहं भवितुमिच्छामि -

प्राणाः मदीया वपुषः प्रयान्तु सुखेन काचिन्न ततोऽस्तिहानिः ।
परन्तु रामः क्षणमात्रमत्र नेत्रप्रसङ्गाद् विमुखो न मेऽस्तु ॥[185]

---

181 रा.महा., 5.22,28,30
182 गणान् गुणानां रघुनायकस्य शेषोऽप्यशेषान्नाहि वक्तुमीशः ।
सहस्रसंख्या गणितानि यस्य फ्रेल्लासमायान्त्यनिशं मुखानि ॥ (रा.महा., 5.37)
183 रा.महा., 5.42
184 रा.महा., 5.43
185 रा.महा., 5.49

यथा मीनाः जलं विना न जीवन्ति तथा मम जीवनम् अपि रामेण विना न सम्भवति[186]। अधुना अयं बालः रामः कथं शरासनं धृत्वा प्रहारं करिष्यति[187]।

रामः सुकोमलः वर्तते राक्षसेन सह युद्धं कथं कर्त्तुं समर्थः। तदानीं कुलगुरु वशिष्ठः विश्वामित्रं कुपितं दृष्ट्वा तं रहसि अवोचत् -

श्रुत्वा वचः क्ष्मातलपालकस्य मुनीशकोपोदयकारणं तत्।
इष्टो वशिष्ठः स्वकुलस्य शापाद् भीतो रहः किञ्चदवोचदेवम्॥[188]

वशिष्ठस्य वचनं श्रुत्वा दशरथेन धैर्यपूर्वकं पवित्रौ पुत्रौ कौशिकस्य करे समर्पितौ -

वशिष्ठवाक्यात्कृतधैर्यबुद्धिः सिद्धेर्भवित्र्या अधिपो धरित्र्याः।
आनीय पुत्रौ मनसा पवित्रौ करेऽर्पयत्सत्कृतिकौशिकस्य॥[189]

राजा दशरथः अश्रुपूर्णनेत्रेण प्रोवाच- हे पुत्रौ! मुनिवरमनुसरताम्। रामः प्रणामं कृत्वा प्राह। हे पितः! अत्रापि देवानां हिताय धात्रा किमपि विहितम्। नयज्ञाः वशिष्ठप्रमुखाः मुनयः प्राहुः रामः प्रसन्नः आसीत्। रामः पितुः आज्ञां प्राप्य तस्य गुरोः पादयुगे प्रणामान् कृत्वा[190] अवोचत् हे गुरो! आवां तव दासौ आज्ञापयतु। अनन्तरं च विश्वामित्रेण सह रामः लक्ष्मणश्च जग्मतुः। मार्गे विश्वामित्रेण रामाय लक्ष्मणाय च बलाबलेति विद्ये प्रदत्ते -

विश्वामित्रसमाह्वयेन मुनिना साक्षादिहम्भोधिना
विद्यानाममलाबलाप्यतिबला विद्येऽनवद्येऽर्पिते।
बाधा कापि च जायते पथि गतो नैषा तृषा क्षुद्भवा
रामायापि च लक्ष्मणाय निधये नानागुणानां प्रिये॥[191]

एवम्प्रकारेण राघवोल्लासमहाकाव्यस्य पञ्चमे सर्गे विश्वामित्रस्य आगमनम् एवं दशरथेन रामलक्ष्मणयोः विश्वामित्राय समर्पणं सम्यक् प्रकारेण वर्णितम्।

---

186 रा.महा., 5.51,52
187 बालेन बालः घ्रियते कारेण शरासनं हा! गुरूणा शरेण।
बध्याः कथं स्युः रजनीविहारा रामेण ते प्राणहरप्रहारा॥ (रा.महा., 5.58)
188 रा.महा., 5.73
189 रा.महा., 5.75
190 रा.महा., 5.88
191 रा.महा., 5.100

**षष्ठसर्गस्य कथा**

विश्वामित्रस्य कथनानुसारं राजा दशरथः वशिष्ठस्य वचसा रामलक्ष्मणौ विश्वामित्राय प्रददौ। द्वौ भ्रातरौ विश्वामित्रेण सह जग्मतुः। मार्गे ताडकानाम्नी राक्षसी दृष्टा या जनान् बहुविधं कष्टं प्रददाति स्म। सा सूक्ष्मरूपं धृत्वा जनान् घातयति स्म[192]। गुरोः विश्वामित्रस्य वचनं श्रुत्वा रघुपतिः त्वरया सशरं धनुः समकरोत्। मनुजभक्षणमानसा ताडका जनान् निहत्य खादति स्म। श्रीरामचन्द्रस्य प्रखरः शरः निशाचरीं जघान[193]। रघुपतिः रामचन्द्रः लक्ष्मणसहितः युद्धे सन्नद्धः आसीत्। ताडका रामस्य शरेण विद्धा अभूत्। तदा मुनीनां 'जय-जय' इति मनोहरैः रवैः तस्य अभिनन्दनमभूत्। ताडकाः निधनं दृष्ट्वा मुनिः रघूत्तमाय विजयाभिलाषं प्रकटितवान्[194]। गाधिसुतः विश्वामित्रः मुनिगणान् समाहूय अतीव प्रसन्नचेताः यजनं वितेने[195]। मुनयः श्रीरामचन्द्रं प्रणम्य ऊचुः यत् - हे रघुनाथ! हे विष्णुमूर्ते। त्वम् अधुना अस्माकं त्राता भव[196]। यज्ञस्य समये रजनीचराणां विघ्नाः भवन्ति स्म। अत एव श्रीरामः यजनस्य प्रारम्भे आकृष्टगरिष्ठचापः तत्र अतिष्ठत्। तदानीं तत्र मारीचनामा सुबाहुनामा च द्वौ रजनीचरौ विघ्नं कर्त्तुं समायातौ। तत्र वीरसौमित्रेण एकः रजनीचरः विशिखेन समुद्रं प्रेषितः अन्यश्च राक्षसः निहितः। लक्ष्मणेन रात्रिचराणां विलयः कृतः। तथा चोक्तम् -

वीराग्रगण्येन च लक्ष्मणेन कौमारवेशेन मनोहरेण।
हुताशनेनेव गुणास्तृणानां रात्रिञ्चराणां विलयं प्रणीताः ॥[197]

कौशल्या सुमित्रां कथयति यत् मदीयौ तनुजौ देवैः सौर्यराशी सम्पूजितौ। तदानीं मुनीनां कान्ताः कदलीदलेषु दीपान् निधाय नीराजनं चक्रुः[198]। मुनीनां स्त्रियः ऊचुः 'स पिता धन्यः सा च जननी धन्या वर्तते। यतो एतौ द्वौ कुमारौ सञ्जातौ'[199]।

192 ताडकामपि च पिण्डनाडिकां मार्गपीडनविधानपण्डिताम्।
सूक्ष्मरूपमुपकल्प्य संस्थिता हा! हृदि क्षिपहि रामनामतः ॥ (रा.महा., 6.5)

193 ग्रसनविस्तृतभीममुखान्तरे खरतरेण शरेण पराहता।
दशरथस्य सुतेन निशाचरी क्लमरणं मरणं क्षणतो ययौ ॥ (रा.महा., 6.9)

194 रा.महा., 6.15

195 रा.महा., 6.16

196 रा.महा., 6.17

197 रा.महा., 6.21

198 रा.महा., 6.25

199 रा.महा., 6.26

रामः प्रणामं कृत्वा लक्ष्मणेन सह विश्वामित्रस्य अग्रे विनीतभावेन स्थितः आसीत्। गुरुः विश्वामित्रः तस्य मौलिं समाघ्राय हृदयेन तं रघुवरं दधार[200]। श्रीरामचन्द्रस्य कृपावशात् सर्वे मुनीशाः परिपूरिताशाः जाताः। तेषां शत्रवः विनाशं गताः। ततः ते यजनक्रियासु संलग्नाः अभवन्। ते मुनयः श्रीरामचन्द्रमुचुः - हे राम! भवतः नामस्मरणात् संसारशोकात् बहवः विमुक्ताः भवन्ति। साक्षात् त्वयि आगते वयं वीतभयाः जाताः इति न आश्चर्यम्। ते ऊचुः हे राम! तव स्मरण संसारभीतिस्मरणं भवति। अहं त्वां शरणं गतः। अतः मम मरणमपि मुक्तये भविष्यति[201]। हे राम! अस्माकं गोत्रं पवित्रमभूत्। वयं कीर्तिं प्राप्ताः यत् मया जगतां वरिष्ठं प्रेष्ठं स्वरूपं लब्धम्[202]।

कविः कथयति यत् स्वप्नेऽपि रघुनाथस्य रूपदर्शनं यदि लभ्यते तदासौ पुरुषः धन्यधन्यः भवति। मिथिलाराज्ञा जनकेन पत्रं प्रेषितं यत् - हे मुनिवर! शैवधनुर्यज्ञं द्रष्टुं त्वं रामलक्ष्मणाभ्यां सह आगच्छ। रामः धनुर्यज्ञं द्रष्टुं स्वीचकार। मुनिः विश्वामित्रः रघुनन्दनाभ्यां मिथिलां पुरीं प्रतस्थे[203]।

मार्गे कश्चित् विशिष्टः आश्रमः आसीत्। यत्र वृक्षाः फलैः लताभिश्च पूर्णाः आसन्। रामः गुरुं पप्रच्छ - हे गुरो! कस्य अयम् आश्रमः ? गुरुः विश्वामित्रः प्राह-हे राघव! अतीव धर्मात्मा गौतमः अस्य आश्रमस्य स्वामी वर्तते। पुण्यात्मा गौतमः अहल्यायाः पतिः न्यायशास्त्रस्य प्रणेता आसीत्। तथा चोक्तं -

अक्षपादो महायोगी गौतमाख्योऽभवन् मुनिः।
गोदावरी समानेता अहल्यायाः पतिः प्रभुः॥

अर्थात् गौतममुनेः अयमाश्रमः। अस्य गौतममुनेः कान्ता इन्द्रस्य दुष्टाचरणेन अभिशप्ता। सा अहल्या पाषाणरूपा अभूत्। इन्द्रश्च विफलोऽभूत्। पञ्चकन्यासु[204] अहल्या परमसुन्दरी देवपूजिता वर्तते। एकदा इन्द्रः महर्षेः परोक्षे आगत्य तया सह दुराचरणं कृतवान्। इयं कथा पुराणेषु महाभारतेषु च वर्तते। इन्द्रस्य कृते 'अहल्यायै जारः' इति प्रयोगः वैदिककाले अभूत्। श्रीगौतमः प्रस्तररूपामहल्यामकथयत् यदा श्रीरामः अत्रागमिष्यति तस्य पादस्पर्शः तव शरीरे भविष्यति तदा

[200] रा.महा., 6.27
[201] रा.महा., 6.34
[202] रा.महा., 6.36
[203] रा.महा., 6.42
[204] अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा।
पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम्॥

तव उद्धारो भविष्यति। श्रीरामस्य पदरजः प्राप्य सा शिलारूपा अहल्या शापमुक्ता अभूत्। कविः लिखति -

पादधूल्याऽप्यहिल्या सा शापशल्याद् विदूरतः।
कृता कृतार्थान् सकलान् करोतु रघुनन्दनः॥[205]

यदा अहल्या शापविमुक्ता अभूत् तदा देवाः श्रीरघुनन्दनस्य मौलौ पुष्पवृष्टिं चक्रुः। सर्वे देवाः प्रणामान् चक्रुः। ऋषिपत्नी अहल्या पापमुक्ता अभूत्। सा मुक्तिं प्राप। रघुकुलतिलकेन सा स्वशरीरं प्राप्तवती[206]। श्रीरामः स्वपदधूलिद्वारा पाषाणोद्धारं कृतवान्। एतादृशः विशिष्टपुरुषः स्वर्गे पृथिव्यां पाताललोके च न दृश्यते। अतः श्रीरामः धन्यः आसीत्[207]।

एवम्प्रकारेण षष्ठः सर्गः अद्वैतयतिना पाण्डित्यपूर्णशब्दैः पूर्णतां नीतः।

**सप्तमसर्गस्य कथा**

कविः अद्वैतयतिः राघवोल्लासमहाकाव्यस्य सप्तमसर्गस्य प्रारम्भे मङ्गलाचरणरूपेण लिखति -

जयन्ति रघुनाथस्य पदपङ्कजपांसवः।
मूकोऽपि वावदूकोऽयमद्वैतो यदुपाश्रयात्॥[208]

अस्य मङ्गलाचरणस्य प्रयोगः प्रतिसर्गं कृतो दृश्यते। श्रीरघुनन्दनस्य चरणकमलपांसवः जयन्ति। यस्य कृपावशात् अयमद्वैतयतिः मूक अपि वावदूकोऽयं प्रतिभाति। वस्तुतः मूकं करोति वाचालं इत्यस्य आशयः अत्र प्रकटितो दृश्यते।

गौतमपत्नी अहल्या यदा पाषाणरुपात् मुक्ता अभूत् तदा सा कथयति यस्य पादरजसा पत्युश्शापात् विमुक्ता सती स्त्रीरुपेण अभूत् तद् राघवस्य पादारविन्दयुगलं नतोऽस्मि इति[209]।

सा मुनिधर्मपत्नी स्वकीयं मनोहराङ्गं विलोक्य दाशरथेः श्रीरामस्य स्तुतिं चकार। यस्य रघुनन्दनस्य पादारविन्दं स्मृतिमात्रेण संसारदुःखोद्धरणं करोति तत्

[205] रा.महा., 6.50
[206] रा.महा., 6.53
[207] रा.महा., 6.54
[208] रा.महा., 7.1
[209] रा.महा., 7.4

पादारविन्दयुगलं मम हृदये वसतु[210]।

सा अहल्या कथयति श्रीरघुनन्दनं नीलोत्पलदलश्यामलकान्तिकान्तम् अजानबाहुं बाणशरासनेन संशोभितं स्मरामि। यस्य नेत्रं विचित्रं मुखं रददन्तपङ्क्त्या विचित्रं कुण्डलमण्डनेन मुखं मण्डितं सुखं वितनोति। प्रथमम् अहल्या रुरोद। यतः सा पाषाणरूपा शापवशाद् आसीत्[211]। सा स्तुतिं करोति। हे नाथ! मम विषयेषु नास्ति सुखस्पृहा। केवलं भवतः पदसरोजयुग्मम् अनिशं दृष्टिपथं कर्त्तुमिच्छा[212]। हे रघुनाथ! अन्तकालेऽपि भवतः पादसरोजं स्मृत्वा अन्तकभयात् जनः मुक्तः भवति तादृशः हे विभो! त्वं सर्वं जानासि। यः कोऽपि तव शरणं समायाति सः दुःसन्तापेन सन्तापितः संसारशोकाद् विमुक्तः भवति।

अहल्या स्तुतिं करोति- न कापि स्त्री मदन्या तव पुण्याङ्गधूलिविमलीकृताङ्गी वर्तते। अहमेव केवलं तादृशी अस्मि या श्रीराममूर्तिमवलोकयामि[213]। अहं मंदबुद्धिः स्त्री अस्मि किन्तु तव चरणवीक्षणात् तव स्वरूपं जानामि। त्वमेव सर्वचराचराणाम् अगोचरः रामः भगवानसि[214]। यथा आदित्यः अशेषान् प्रकाशयति तद्वत् त्वमपि प्रकाशरूपेण श्रीरामः भगवानसि[215]। अस्मिन् संसारे सकलोऽपि लोकः जातः पुनश्च नाशं प्राप्नोति। तेषां लोकानां विधाता ब्रह्माऽपि तव कृपावशादेव वर्तते। अतः त्वं भगवान् रामोऽसि। वस्तुतः निजसेवकस्य प्रह्लादस्य क्लेषान्निहन्तुं भगवान् नृसिंहः स्तम्भात् सञ्जातः एवं तस्य दुःखं दूरीचकार[216]।

त्वमेव कूर्मरूपं धृत्वा अम्बुराशेः मथनस्य काले स्वकीये पृष्ठे मङ्गलं दधार। स कूर्मावतारः भगवान् त्वमेव असि[217]। भगवान् वामनः वलियागकाले वामनरूपं धृत्वा याच्ञां कृतवान् एवं पादत्रयेण समस्तं जगत्त्रयं तेन लब्धम्। तादृशः वामनरूपः भगवान् त्वमेव असि। परशुरामावताररूपेण त्वमेव कुठारं धृत्वा क्षत्रियाणां विनाशं कृतवान्। तादृशः परशुरामः भगवान् त्वमेव असि। दुष्कृतां विनाशाय त्वं शरीरं धरसि। दुष्कृतां विनाशाय त्वं शरीरं धरसि।

यस्य स्मृत्या शूद्रादयः विविक्तचित्ताः मायाजलधिं तरन्ति तादृशः भगवान् त्वमेव राम असि। हे राम! त्वमेव सकलप्रपञ्चात् एकान्तवासं कृत्वा विगतप्रयासाः

[210] रा.महा., 7.6
[211] रा.महा., 7.10
[212] रा.महा., 7.11
[213] रा.महा., 7.16
[214] रा.महा., 7.17
[215] रा.महा., 7.18
[216] रा.महा., 7.21
[217] रा.महा., 7.22

योगविदः जानन्ति सः भगवान् त्वमेव असि। वेदे यत् सच्चिदानन्दरूपम् अनन्तं चिद्रूपम् उक्तं तद् ब्रह्म हे राम! त्वमेवासि। प्रलयसमये त्वमेव संहारं करोषि। हे राम! त्वमेव जगन्निवासः जगति प्रतिष्ठः भगवान् असि। हे राम! त्वमेव विभिन्नरूपेण भगवानसि। शिवस्य मायारूपा किङ्करी त्वयैव सृज्यते।

त्वमेव न दीर्घं न सूक्ष्मं न कृशं न महत् न जायते न विनाशम् एषि तादृशं ब्रह्म त्वमेव असि[218]। यस्य नाममाला पापानि दूरीकरोति भीतिमपाकरोति तादृशः गोविन्द-विष्णु-अच्युत-माधव-रामरूपः त्वमेव असि -

यन्नाममाला हृतपापजाला कालाहितां भीतिमपाकरोति।
गोविन्द-विष्णोऽच्युत-माधवेति स एव रामो भगवानसि त्वम्॥[219]

यस्य देवस्य भक्तिः मुक्तिं ददाति तादृशः देवः रघुनन्दनः त्वमेवासि। मुनिपुङ्गवस्य गौतमस्य पत्नी अहल्या श्रीरघुनन्दनस्य स्तुतिं कृत्वा पादे पतित्वा मां परिपाहि इति जगाद -

एवं स्तवं श्रीरघुनन्दनस्य विधाय पत्नी मुनिपुङ्गवस्य।
कृतापराधां परिपाहि दीनामुक्त्वेति पादे पतिता जगाद॥[220]

सा अहल्या स्तुतिं करोति- हे रघुनाथ! हे करुणासिन्धो! हे त्रिलोकीपते! मया अधिकं किमपि न उच्यते। अहं त्वदीय चरणं शरणं प्रयाता। सर्वापदां वारणं तव शरणम्। सौख्यानां कारणं तव शरणम् अस्ति। अतः मम उद्धारं कुरु -

स्वामिन् श्रीरघुनाथ! दीनकरुणासिन्धो त्रिलोकीपते!
प्रोक्तैः किं बहुभिः सुदीनवचनैरेकं वचः श्रूयताम।
याताऽहं शरणं त्वदीयचरणं सर्वापदां वारणं
सौख्यानामपि कारणं प्रपततामुद्धारणं किं पुनः॥[221]

हे नाथ! त्वमेव माता च पिता त्वमेव इति धिया अहल्या कथयति त्वमेव केषाञ्चन भ्राता केषाञ्चन सुता केषाञ्चन सुहृत् शिष्यः गोत्रजन्यः सहायकः वर्तसे तव चरणस्मरणात् मरणात् भीतिः न भवति। अतः हे जगतां नाथ! रघुनाथ! अन्यः इह कोऽपि नास्ति -

218 रा.महा., 7.47
219 रा.महा., 7.50
220 रा.महा., 7.53
221 रा.महा., 7.54

केषामस्तु पिता प्रसूरपि सुता भ्राता सुहृद्वा सखा
शिष्यः प्रेष्य उतापि गोत्रजननः कामः सहायस्तया।
यस्याङ्घ्रिस्मरणाद् भवेन्न मरणाद्भीतिः कदाचिन्नृणां
सर्वं मे रघुनाथ एव जगतां नाथः किमन्यैरिह॥[222]

अहल्या कथयति यत् श्रीरामचन्द्रपदं सेव्यम्। देवतान्तरं पदं न सेव्यम्। मया यत् स्पर्शतः प्राप्तं तत् देवैरपि न लब्धम्[223]। श्रीरामपदयुगलं मम हृदयम् अलङ्करोत्। श्रीरामचन्द्रस्य चरणयुगलं भवसागरे पतितानां कृते पोतः वर्तते[224]।

अहल्या कथयति हे राम! भवसागरमग्नस्य देहिनः कृते अवलम्बनं तव पादपोततः अन्यत् नास्ति[225]। हे राम! पाषाणात् अहम् उद्धृताऽस्मि अतः अहम् अनुभवामि तव प्रभावम्[226]। जनानाम् अनेकानि जीवनानि भवन्तु किन्तु मम जीवनं तु केवलं रामचन्द्रस्य पदाम्बुजे एकमेव भवतु[227]। हे राम तव पदं लोकमालोकितं करोति विशोकं करोति अतः तव चरणं मानसे मेऽस्तु[228]। हे प्रभो! तव चरणं मम शरणं भवतु। हे राम! तव परमं पदं मत्तः दूरे मास्तु[229]।

हे श्रीराम! एषा वर्णत्रयी (श्रीराम) अनलत्रयीव भाति। एतानि पापानि दूरीकृत्य भवार्णवात् पारं नयति[230]। अग्रे सा कथयति यत् हे राम! वज्रस्यापि आहतिः देया किन्तु तव विस्मृतिः न देया[231]। हे राम! तव कल्पपादपं प्रणम्य पादयुगलं याचे यत् कदाचिदपि मम मुखात् ते नाम नापसर्पतु[232]। सा अहल्या कथयति यत् हे विभो! अहं बहु न याचे। केवलम् अहं याचे यत् मम हृदयस्थितिः त्वयि अस्तु[233]। सा स्पष्टतया श्रीरामचरणं स्तौति -

दासीं राम निरन्तरं स्वचरणे संस्थापयैनां भृशं
कार्यं याचनयान्यया न हि विभो! सेवारते वर्तते।

[222] रा.महा., 7.55
[223] रा.महा., 7.56
[224] रा.महा., 7.59
[225] रा.महा., 7.60
[226] रा.महा., 7.63
[227] रा.महा., 7.64
[228] रा.महा., 7.66
[229] रा.महा., 7.69
[230] रा.महा., 7.72
[231] रा.महा., 7.73
[232] रा.महा., 7.74
[233] रा.महा., 7.75

एतच्चाप्यखिलं किलातिचपलं सङ्गेऽप्यलं निष्फलं
ज्ञात्वाऽप्यत्र दधातु को नु हृदयं यश्चाप्ययं ज्ञानवान् ॥[234]

सा अहल्या स्तुतिं करोति हे राघव ! अहं देवलोके शरीरं न याचे। अहं केवलं याचे यत् त्वं मम दृष्टेः अन्यत्र क्वचिदपि न याहि -

कृत्यं न मे राघव पुण्यलोकैः शोकैकगेहैरपि देव ! देहैः ।
याचेऽनया चेत् स्वगिरातितुष्टि दृष्टेरखण्डं न कुतोऽपि याहि ॥[235]

अहल्या स्तुतिं करोति यत् निर्मला सुखकरा अतिशीता रामचन्द्रमुखचन्द्र-मयूखाः यदि मम मानसे भवन्ति तदा तापत्रयं नश्यति[236]। यदि कश्चित् उत्तमाङ्गात् तृणम् उत्तारयेत् तं प्रति सुकृतिनः उपकारं स्मरन्ति। अतः यदि केनापि उद्धारः कृतः तस्मात् अपरं किं भवेत्[237]।

अहल्या कथयति भो जन्तो ! त्वं हृदये रामचन्द्रपदाम्भोजं कुरु। तस्मात् तव तापस्य नाशो भविष्यति। तव जीवनं शीतलं भविष्यति[238]। हे रघुनन्दन ! मम मनः कदापि तव स्मृतिं विना न भवतु। यस्य स्मृतिमात्रेण भवरोगः प्रणश्यति तत्कथं त्यज्यते मूढ ! रामनाममहौषधम्[239]। हे दुर्मते ! कथं पापभारं हाररूपेण वहसि। एकवारं श्रुतेः सारं परब्रह्म रामनाम कीर्तय[240]। वस्तुतः भवरोगस्य निवारणाय रा-मनाम एव औषधिः वर्तते। हे राम ! तव सेवा देवादिभिरपि दुःसाध्या वर्तते अतः अहं प्रत्यहम् अमृतिदां स्मृतिं करोमि[241]।

सा अहल्या वदति यत् हे नाथ ! मम पतिः ममोपरि अनुग्रहं कृत्वा शापं प्रदत्तवान्। यतः करुणासमुद्रः साक्षात् परब्रह्म रामचन्द्रः मम सहायकोऽभूत् -

पितः कृतः श्रीरघुनाथ ! तेन भर्त्ता ममानुग्रह एव शापः ।
जातो यतोऽयं करुणासमुद्रः साक्षात्परं ब्रह्म स रामचन्द्रः ॥[242]

[234] रा.महा., 7.76
[235] रा.महा., 7.77
[236] रा.महा., 7.78
[237] रा.महा., 7.79
[238] रा.महा., 7.80
[239] रा.महा., 7.83
[240] रा.महा., 7.84
[241] रा.महा., 7.87
[242] रा.महा., 7.88

लक्ष्मीवान् पुरुषः अहङ्कारवशात् रामं न पश्यति। केचन भूपाः गर्वपर्वतपरिक्रान्ताः रामं न पश्यन्ति। केचन सेवापराः अपि धराधिपतयः रामं न पश्यन्ति। अतः असतां कृते हे रघुपते! का गतिः भविष्यति[243]।

मुनिपत्नी अहल्या कथयति द्विजस्य गौतमस्य शापवशात् शिलात्वं प्राप्ता अहं त्वया पुनः वनितारूपेण प्रणीता। अतः मदीये चित्ते सततं श्रीरामपदं निवासं करोतु[244]। वस्तुतः मम माता पिता दयिता भ्राता अग्रजः सुहृत् सखा मातुलः देवः सर्वस्वरूपेण हे राघव! त्वमेव वर्तसे। तस्य फलमपि मया प्राप्तम् -

माता त्वं जनकोऽपि कोऽपि दयितो भ्राता च ताताग्रजः
श्रेयान्सत्सुहृदीश्वरो वरसखा योऽसौ सुखानां निधिः।
पूज्यो मातुल आकुलः प्रियतया देवोऽपि सेवोचितः
सम्बन्धात्त्वयि राघवेति बहवो मे तत्फलं दर्शितम्॥[245]

तदा रामः अहल्यां प्राह- त्वं दयितेन साकं सौख्यं याहि। त्वया स्तवः कृतः तस्य फलमपि त्वया प्राप्तम्। यस्य रामस्य कृपावशात् मुनिवर्यकान्ता शापमुक्ता अभवत् तं राममादाय विश्वामित्रः मिथिलादेशं प्राप्तवान्।

अधुना ग्रन्थाङ्के मिथिलां प्राप्य उपवने यत्सुखं विश्वामित्रः प्राप्तवान् तं वर्णयति कविः अद्वैतयतिः -

उपवने पवनेरितसुश्रमस्तपनवंशसुधाकरकिङ्करः।
तरुकदम्बतले विमले वसन्परमवाप सुखं मुनिसत्तमः॥[246]

एवम्प्रकारेण राघवोल्लासमहाकाव्ये अद्वैतयतिः सप्तमे सर्गे अहल्यामुखात् श्रीरामचन्द्रस्य महात्म्यवर्णनं कृतवान्।

### अष्टमसर्गस्य कथा

राघवोल्लासमहाकाव्यस्य अष्टमे सर्गे धनुर्भङ्गप्रसङ्गः अद्वैतयतिकविना अतीव चित्ताकर्षकरूपेण वर्णितो दृश्यते। सर्गारम्भे श्रीरघुनाथस्य पदपङ्कजपासवः जयन्ति

[243] रा.महा., 7.89
[244] रा.महा., 7.91
[245] रा.महा., 7.92
[246] रा.महा., 7.97

यत्कृपावशात् मूकोऽपि अयम् अद्वैतकविः वावदूकोऽभूत् इति[247]। अयं श्लोकः मङ्गलाचरणरूपेण प्रतिसर्गं दृष्टिपथमायाति।

साधुवरं विश्वामित्रं समागतं निशम्य मिथिलानरेशः जनकः स्नेहार्द्रचेतः पुरः आजगाम[248]। राजा जनकः तस्य तपोधनस्य कौशिकस्य चरणद्वयं ववन्दे। राजा जनकः कथयति यत् अद्य मम वंशोन्नतिः शोभमाना वर्तते। जनकः कौशिकस्य पदद्वयं पूजयामास। तस्य आशीर्वादं प्राप्य विश्वामित्रः स्वासने विराजमानोऽभूत्। मुनेः दक्षिणे भागे राघवौ कान्तिजनितप्रकाशौ रविचन्द्ररूपेण आस्ताम्। तदा मिथिलेश्वरस्य परिज्ञानाय रामलक्ष्मणयोः आगमनप्रयोजनमाह। सूर्यवंशे राजा दशरथः अभूत्। तस्य सुपुत्रौ मया विश्वामित्रेण यज्ञरक्षणार्थं सम्प्रार्थितौ। द्वाभ्यां राजकुमाराभ्यां यज्ञस्य रक्षा कृता एवं च महेश्वरस्य धनुर्द्रष्टुम् अत्र समागतौ स्तः -

जातो भानुकुलेऽमले दशरथो यत्कीर्त्तिजालैर्जगद्
व्याप्तं तत्तनुजाविमौ नरपते! सम्प्रार्थितां तं मया।
यज्ञे विघ्नचयं सदा विदधतां रक्षोगणानां क्षये
कृत्वा तत्सकलं महेष्वरधनुर्द्रष्टुं प्रयाताविह॥[249]

सीता प्रातः सखीं कथयति यत् अद्य मया सुशीलः पुरुषः तमालनीलसदृशः स्वप्ने अदर्शि। मम चेतः निकामं मोहवशात् तत्र वर्तते। सीता श्रीरामस्य रूपविषये कथयति यत् हे सखि! मया यत्स्वरूपं दृष्टं तत् अपूर्वं वर्तते। तस्य भुजौ भुजङ्गाकृतिशोभमानौ स्तः। तस्य नेत्रे कमलपत्रे स्तः। तस्य मुखम् अमलं वर्तते। अयम् अपूर्वः पुरुषः मया स्वप्ने दृष्टः। तस्य दन्ताः अपि अतीव शुभ्राः आसन्। तादृशः रामः विशिष्टः पुरुषः वर्तते[250]।

तस्य पादारविन्दे केचित् नताः आसन्। हे सखि! मया विज्ञातं यत् अयं त्रैलोक्यपालः भगवान् वर्तते। अयं पुरुषः पुरुषेषु रत्नं वर्तते। अस्य दास्ये मम अधिकारः नास्ति। सीता कथयति अहम् आनन्दपयोधिमग्ना आसम्। यदा तद् आलिङ्गनकर्मसज्जा अहं याता तदा लज्जा अभूत्। किन्तु तदानीं निशावसानं गता। मम निद्राऽपि अवसानं प्राप्ता। हा! हा! मया निराशा एव लब्धा। एवं रामस्य विरहे सीता विरता आसीत्। सीता अश्रुधारार्द्रहृदा बभाषे[251]। सीता स्वसखिं कथयति

[247] रा.महा., 8.1
[248] रा.महा., 8.2
[249] रा.महा., 8.9
[250] रा.महा., 8.24
[251] रा.महा., 8.35

मम भालतले विधात्रा किं लिखितम् इति न जानामि ? हे सखि त्वं मम प्रिया वर्तसे अतः त्वां वच्मि। तदा सखी सीतां प्राह यत् त्वया अभिराम्यवस्तुप्राप्यं वर्तते इति मम विचारः। तदानीं योषाजनं बाह्यसदः कुर्यातं विचित्रवादित्रनिनादमाला जनानां कोलाहलश्चाभूत्। तदानीं सीतायाः सहचरी कुरङ्गीनयना काचित् समागता। सा प्राह-यत् रामनामेति पुरुषः अत्र समागतोऽस्ति। तादृशः पुरुषस्तु स्वर्गेऽपि दुर्लभः। स तु पुरुषोत्तमः वर्तते इति केनापि उक्तम्। रामस्तु दुःखस्य विश्रामचन्द्रः वर्तते। दुःखातुराणां दुःखनाशकः वर्तते। रामस्य नामोच्चारणात् शरीरं पवित्रं भवति[252]। जनकस्य पुत्री सीता मणीनां पुञ्जमिव रामचन्द्रं सहसा ददर्श[253]। रामस्य कान्तिः तापस्य शान्तिं कुरुते। बाहुयुगलं शोभते[254]। अलौकिकं रामस्य रूपं वीक्ष्य सीता नतास्या अभूत्। विस्मयेन भ्रान्त्यावृताऽभूत्। सीता रामं दृष्ट्वा अतीव आकर्षिता अभूत् -

धातर्वरायास्तु नतिः कराय निःसीमकौशल्यकराकराय।
इयं कृता कापि हि येन मूर्त्तिः सीता हृतार्तिस्तमवेक्ष्य जाता॥[255]

भूमिसुता सीता रामस्य प्रशंसां कुरुते। इयं मूर्तिः देशान् दिशां च प्रकाशयति। सा कथयति यत् रामरामेति वर्णयुग्मं यः हृदये स्मरति तस्य सर्वं सफलं भवति। अस्य आकृतिं दृष्ट्वा तु का कथा फलस्य[256]? रामस्य रूपं दृष्ट्वा सीता कथयति यत् अस्य रामस्य दर्शनात् अङ्गनानाम् अनङ्गपाशस्य नाशो भवति। श्रीरघुनाथस्य रूपं दृष्ट्वा सीताविमोहं पतति कथिञ्चत् सखीभिः विद्धृता[257]। सीतायाः वियोगजन्यतापं दूरीकर्तुं सुशीतलैः वातैः वाजप्रयोगः कृतः। कर्पूरपूराश्रितनीरसेकः कृतः। कमलैः मृणालजालैः सख्यः प्रयोगं विदधुः -

वातैः सुशीतैर्व्यजनप्रसूतैः कर्पूरपूराश्रितनीरसेकैः।
किञ्जामलैः श्रीकमलैः प्रवालैर्मृणालजानैर्विदधुः प्रयोगम्॥[258]

श्रीरामचन्द्रः स्मरतां जनानां कृते कल्याणमूर्तिः वर्तते। स तु शिवं कुरुते किन्तु अद्य जनकात्मजायाः दृष्टिगतः त्राणं करोति इति सखायः ऊचुः[259]। सीतायाः

[252] रा.महा., 8.62
[253] रा.महा., 8.73
[254] रा.महा., 8.76
[255] रा.महा., 8.82
[256] रा.महा., 8.84
[257] रा.महा., 8.86
[258] रा.महा., 8.96
[259] रा.महा., 8.98

वयस्याः ताम् अकथयन् गवाक्षमार्गेण श्रीरामं पश्य[260]। सखिजनः कथयति यत् हे सीते! रामस्य पदपङ्कजाय वयं समस्ताः प्रणामान् कुर्मः। त्वमागच्छ[261]।

रघुनाथभक्ता सीता तस्य चरणं द्रष्टुमुत्सुका आसीत्। रामं दृष्ट्वा सा वदति यत् मया श्रीरामस्य यदङ्गं दृश्यते तत्रैव मम दृष्टिः बद्धेव तिष्ठति[262]। रामं दृष्ट्वा सीतायाः हृदयं सुशीतलं जातम्। सीता कथयति हे सख्य! सर्वाः शृण्वन्तु सुधया समानं रामाभिधानं विना मत्समक्षं किमपि न वदन्तु[263]।

रामः अतीव सुन्दरः आसीत्। तं दृष्ट्वा कामाधिकसुन्दरं पुरुषोत्तमं रामं सा नमश्चक्रे[264]। सीता रामस्य सकलं शरीरं समाकुञ्चतलोचना सुखेन अपश्यत्। मया शिवस्य कृपावशात् राघवः अदर्शि। श्रीरामसम्बोधितमानसा सीता लज्जां विहाय सखीमाह - अस्य श्रीरामस्य पदपङ्कजस्य अहं दास्यं याचे -

श्रीरामसम्मोहितमानसा सा सीता सखीमाह विहाय लज्जाम्।
विधेयमस्याङ्घ्रियुगस्य दास्यं हास्यप्रभानिर्जितपङ्कजस्य॥[265]

सा चिन्तयति यत् अयं श्रीरामः अतीवकोमलगात्रः वर्तते एवं च उमेशस्य चापम् अतीव कठोरं वर्तते। कथमनेन धनुर्भङ्गः कर्तुं शक्यते इति चिन्ताऽभूत्। सा शिवं प्रार्थयति यत् श्रीरामचन्द्रः धनुर्ज्याकर्षणे सफलः भवतु। यदि रामः मया न लभ्यते तदा मम जीवनस्य विरामो भविष्यति[266]। मया रामः सदैव सेव्यः इति भावः वर्तते।

श्रीजनकः सभामध्ये उद्घोषयति यत् यः अनङ्गशत्रोः चापचालने समर्थो भविष्यति तामेव सीतां दातुमिच्छामि। कठोरं चापं न कोऽपि नृपः सञ्चालयितुं समर्थः अभूत्। श्रीरामचन्द्रः यदा धनुषस्समीपं गतवान् तदा भूमिसुता सीता प्राह- हे देवेश! अहं रघूत्तमस्य दास्यं करिष्ये। अद्य मे कामं पूरय[267]।

श्रीशङ्करस्य पत्नीं शिवां सीता कथयति यत् हे मातर्! यदि मम अभिलाषः सिद्धो भविष्यति, ममाशा पूरिता भविष्यति तदाहं त्वदीयां पूजां करिष्यामि[268]। धर्मं

[260] रा.महा., 8.100
[261] रा.महा., 8.103
[262] रा.महा., 8.104
[263] रा.महा., 8.114
[264] रा.महा., 8.122
[265] रा.महा., 8.129
[266] रा.महा., 8.138
[267] रा.महा., 8.158
[268] रा.महा., 8.159

विना सिद्धिः न भवति अतः ब्राह्मणेभ्यः देवेभ्यः सा प्रमाणं करोति। रामः रमेशः वर्तते। क्षितिजा सीता लक्ष्मीः वर्तते। अतः उभयोः योगः दैवयोगः भवति। हे सीते! त्वमस्य रामस्य कान्ता भविता इति गिरः आकाशे विचेरुः[269]। श्रीरघुराजराजः तद्धनुः उद्दधार। कौशल्या सुमित्रां कथयति रामगात्रे सूर्यस्य साम्यं प्रभाभिः अभूत्। सर्वे तदानीं आश्चर्यचकिताः अभवन्। भूमिसुतामुखे हासः अभूत्। इन्द्रस्य हृदि सुखोद्गमः अभूत्। तत्रस्थितानां भूपानां कुले लज्जा अभूत्। मिथिलापतेश्च हृदये आश्चर्यम् अभूत् यत् रामेण गौरीपतेः चापः सहसा उद्धृतः[270]।

शङ्करस्य वज्रतुल्यं धनुः यदा रामकरेण स्पृष्टं तदा सहसा धनुः लघुः अभूत्। यदा धनुर्भङ्गः अभूत् तदा कोदण्डदण्डपरिखण्डनचण्डनादः अभूत्। शैवधनुप्रभेदे महान् नादः अभूत्। शाम्भवचापभेदेन भवात् अद्भुतं सर्वमभूत्। भूमितले सर्वत्र कौतुकमभूत्। सर्वे मर्त्याः आर्ताः अभवन्। विश्वामित्रोऽपि निश्चलनेत्रगात्रः अपतत्[271]। रामेण एतत् अद्भुतं कृतम् अतः सर्वे देवाः नताः अभवन्। सर्वे तं नमश्चक्रुः -

धिक् तन्नो बलमायतां विपुलतां धिक् पीनयोर्बाह्वयो-
र्धिक् तेजः किल कायजं तरुणतां धिग् धिग् जनुर्बाहुजात्।
धिक् श्रैष्ठ्यं नृपताञ्च धिग् यदमुना बालेन तुच्छीकृताः
प्रोद्यत्श्वासभरं रुदन्त इति ते तस्थुर्नतास्याः नृपाः ॥
[272]

केचित् राजानः दुखार्ताः शास्त्रेण रामं हन्तुं केचिच्च कौशिकं हन्तुं प्रवृत्ताः अभवन्[273]। यथा शुनकाः दूरतः कोलाहलं कुर्वन्ति तथैव केचित् नृपाः रामस्य समीपे कोलाहलं चक्रुः[274]। पितामहः ब्रह्मा श्रीरामस्य पादयोः साङ्गं नतः अभूत्। हे राम! त्वया आनन्दः कृतः[275]। केचित् नृपालाः कुटिलाः विडालाः इव तत् स्थानं त्यक्त्वा गतवन्तः[276]। भूमिसुता जानकी प्रसन्नवदना रामस्य गले स्रजं सन्दधे-

कृत्वा कृत्यमपेतसाम्यमपि तत्सङ्गच्छतो बालवत्

---

[269] रा.महा., 8.166
[270] रा.महा., 8.170
[271] रा.महा., 8.178
[272] रा.महा., 8.183
[273] रा.महा., 8.184
[274] रा.महा., 8.186
[275] रा.महा., 8.187
[276] रा.महा., 8.188

कर्त्तुं वन्दनमुन्मदाय मुनये रामस्य रामप्रिया।
लज्जाकुञ्चतलोचनेक्षितमुखप्रान्ता सुवाद्यावलि-
ध्वानौघेऽम्बरगे स्रजं पृथुतले हर्षाद् गले सन्दधे॥[277]

एवम्प्रकारेण अद्वैतयतिः राघवोल्लासस्य 'धनुर्भङ्ग'नामके अष्टमे सर्गे धनुर्भङ्गस्य वर्णनं कृतवान्।

**नवमसर्गस्य कथा**

राघवोल्लासमहाकाव्यस्य नवमे सर्गे अद्वैतयतिः लिखति यत् मिथिलायां जनकस्य भुवने या अद्भुता घटना अभूत् अर्थात् श्रीरामचन्द्रेण धनुर्भङ्गः कृतः इति ज्ञात्वा शिवस्य सदने रमेशस्य सदने वेधसश्च सदने सन्तोषनादः अभूत्। सीता चिन्तासमुद्रे मग्ना आसीत् किन्तु तस्याः सख्यः रघुनन्दनस्य बाहुयुगस्य दीपैः नीराजनं वितेनुः[278]। श्रीरामचन्द्रः सीतामनस्तापविनाशचन्द्रः वर्तते इति सर्वे वृद्धाः सिद्धाश्च समूचुः।

स्वर्गे अयोध्यायां च रामस्य अभिनवं कर्म निरीक्ष्य स्वः प्रमदाः गीतं नृत्यं च चक्रुः[279]। भूतनया समेतं श्रीरामं यातं मुनिः विश्वामित्रः सन्नद्धरोमा आलिलिङ्ग[280]। सीता अतीव प्रसन्ना आसीत्। सा अवदत् यत् अद्य अहं क्षणमपि रामं न मुञ्चामि। सर्वे भवन्तः स्वसदनं प्रयान्तु तदानीं तत्र स्थितानां सा कुतुकानि तेने। यथा क्लेशेन प्राप्तं रत्नं न कोऽपि त्यक्तुमिच्छति तथैव रामचन्द्रं सम्प्राप्य सीता आकृष्यमाणाऽपि नामुञ्चत्[281]।

कौशल्या कथयति यत् हे सुमित्रे! मम तनुजः रामः महाजनानां गुरोश्च पुरः त्रपाम् एव प्राप। सीता मुनिं विश्वामित्रं प्रणम्य प्रसन्ना आसीत् तदा राजा विदेहः तां भागधेयां निजगेहमध्यं समानयत्। सीता मात्रा हृदयेन धृता। सा माता अवदत् यत् दयितेन साकं त्वं चिरं सौख्यं लभस्व इति आशिषम् उच्चचार -

मात्रा धृतालं हृदयेन सीता स्वीये नता पादयुगे कराभ्याम्।
सौख्यं चिरं त्वं दयितेन साकं कन्ये! लभस्वाशिषमुच्चचार॥[282]

---

[277] रा.महा., 8.189
[278] रा.महा., 9.4
[279] रा.महा., 9.6
[280] रा.महा., 9.8
[281] रा.महा., 9.10
[282] रा.महा., 9.13

राजा जनकं निजेन करेण पत्रं विलिख्य अतीव प्रसन्नचेताः सत्कुङ्कुमाड्कं पत्रं रघुनाथस्य पित्रे दशरथाय सम्प्रेषयामास -

विलिख्य पत्रं जनको निजेन करेण सन्तोषनिमग्नचेताः।
सम्प्रेषयामास मनोहरार्थं सत्कुङ्कुमाङ्कं रघुनाथपित्रे॥[283]

राजा दशरथः राघवस्य लक्ष्मणस्य च कृते चिन्तितः आसीत्। किन्तु कश्चित् दूतः समागत्य तस्य पादयुगे प्रणम्य उक्तवान् यत् राज्ञा विदेहेन स्वपुत्री सीता रामस्य हस्ते पत्नीरूपेण सङ्कल्पिता। पत्रं पठित्वा दशरथः आनन्दकन्दोऽभूत्। विदेहस्य पत्रमित्थमासीत् -

श्रीपुत्रिणे दशरथाय धराधिपाय
निःसीमदैवनिलयाय जगच्छुताय।
भूमीतलाश्रितशिरः परयाङ्घ्रिभक्त्या
दासः प्रणामनिचयान् कुरुते विदेहः॥[284]

रामेणाद्भुतविक्रमेण धनुषो भङ्गः कृतः शूलिन-
स्तत्पादाम्बुजसेवनाय च मया सीता सुता साऽर्पिता।
कृत्वाऽनुग्रहमङ्घ्रिदास्यनिरते मय्याशु वैवाहिकं
कर्त्तुं कृत्यममर्त्यगेययशसाऽऽयातव्यमेषाऽर्थना॥[285]

अत्र प्रथमे श्लोके दासः प्रणामनिचयान् कुरुते विदेहः इति पदं विद्यते अर्थात् दासः जनकः भक्त्या प्रणामाञ्जलिं समर्पयति इति भावः। द्वितीये श्लोके रामस्य पराक्रमवर्णनं वर्तते। भगवतः शङ्करस्य धनुषः भङ्गः अति विक्रमेण रामेण कृतः। अतः तस्य रामस्य सेवनाय मया सुता सीता समर्पिता। अधुना वैवाहिकं सम्बन्धं पूरयितमवश्यमेव भवता आगन्तव्यमिति प्रार्थना वर्तते। दशरथः मिथिलाधिपस्य पत्रं प्राप्य स्वजनान् सर्वं सम्भावयामास।

अत्र मिथिलायां गृहे गृहे मङ्गलकेतुमाला उत्सवानां संसूचिकाः अभवन्। तदानीं नरनायकस्य दाराः हारावलीभूषणभूषिताङ्गाः शिवकान्तराणि सन्तः प्रययुः। अद्वैतयतिः लिखति यत् राजा दशरथः सेनासहितः सहर्षं मिथिलापुरमाजगाम। तदा

[283] रा.महा., 9.14
[284] रा.महा., 9.17
[285] रा.महा., 9.18

रामोऽपि अनुजेन सह हर्षपूर्णः पितुः दर्शनार्थं विश्वामित्रस्य सम्पूर्णभाग्योदय इव शीघ्रं दशरथं प्राप्तवान्। कौशल्या सुमित्रां कथयति यत् हे सुमित्रे! दशरथस्य गात्रे तनुजौ रामलक्ष्मणौ दृष्ट्वा रोमोद्गमः अभूत् एवं च चक्षुषः अश्रुधाराः पेतुः[286]।

राजा दशरथः रथात् उत्प्लुत्य लोचनतः जलं मुञ्चन् हृदयेन तौ तनुजौ रामलक्ष्मणौ अधात् विललाप च। राजा दशरथः अवदत् यत् अस्य पुत्रस्य गात्रं गङ्गाजलतोऽपि पवित्रं सुधासदृशं वर्तते इति[287]।

कौशल्या कथयति हे सुमित्रे! राज्ञा दशरथेन पङ्कजशीतगात्रः पुत्रो आलिङ्गितो[288]। विदेहः नृपतेः पदाय प्रणामान् कर्तुं धावन् आसीत्। तावत् दशरथेन हृदयेन हर्षोल्लासेन तेन धृतः[289]। राजा विदेहः हर्षपूर्णः मोहरहितः श्रीभरपूरिताङ्गः साकेतपुराधिराजं दशरथं प्रोवाच- इयं नगरी मिथिला विष्णोः रामस्य अतिवन्द्यानि पदानि प्राप्य धन्याऽभूत् -

इयं पुरी मे नगरी धुरीणा रीणाखिलाघौघजनाश्रयाश्च।
अद्यातिवन्द्यानि पदानि विष्णोः श्रीरामचन्द्रस्य वसन्ति यस्याम्॥[290]

जनकः कथयति यत् मदीयाः पूर्वजाः अपि स्वर्गे वासं कुर्वन्ति किन्तु केनापि श्रीरामचन्द्रस्य विष्णोः रजः न लब्धम्। जनकस्य हर्षप्रकर्षं कुर्वन् राजा दशरथः उवाच अयं मम स्थविरस्य यत्नैः मे सुताः जाताः। तत्रापि अयं रामः अतीव साधुभिः स्मरणीयः वर्तते। भवतां वंशः यशोयुक्तः वर्तते। तेन सह मम सम्बन्धात् अहं धन्यतरः अस्मि[291]।

तदानीं राजा जनकः सन्तुष्टचेता विनयप्रवीणः उत्तरं वाक्यं जगादहं भवतां दासः। राजा जनकः दशरथस्य तस्य पुत्रद्वयस्य च पूजां चकार। यदा सर्वे भूपालाः आज्ञां प्राप्य निजमन्दिराणि गतवन्तः तदा विदेहः सत्वरमङ्गजायाः सीतायाः स्नेहबद्धः राजगृहं प्रविवेश[292]। उत्कण्ठितः राजा दशरथः उपहारान् गृहीत्वा पुत्रैः पवित्रैः सकलैः कलत्रैः विश्वामित्रस्य वन्दनाय जगाम[293]।

[286] रा.महा., 9.29
[287] रा.महा., 9.33
[288] रा.महा., 9.34
[289] रा.महा., 9.36
[290] रा.महा., 9.39
[291] रा.महा., 9.45
[292] रा.महा., 9.48
[293] रा.महा., 9.49

कुशविष्टरासने उपविष्टं मुनिं विश्वामित्रं रामस्य नाम जपन्तं राजा दशरथः अपश्यत्। राजा दशरथः रथात् अवतीर्य। मित्रवर्गैः तस्मै पवित्रचरणाय विश्वामित्राय प्रणामान् संविदधे[294]। मुनिना विश्वामित्रेण आदिष्टः राजा दशरथः कुशानां पीठे उपाविशन्। मुनिप्रवरः रघुनन्दनस्य प्रशंसां कुर्वाणः आह- अनेन रामेण घोरतराः निशाचराः विनाशिताः। अतः किमपि चित्रं नास्ति। अयं रघुनाथः शेषशयनः साक्षात् विष्णुः वर्तते तथा ज्ञायताम् -

ज्ञायतां नरपतेश्वर! तेन स्वीकृता भगवता तनुरेषा।
यं वदन्ति च बुधा बुधनाथमेष शेषशयनो रघुनाथः ॥[295]

रमन्ते योगिनोऽस्मिन् इति रामः यत् परमं वचनं वर्तते। वस्तुतः राम स एव वर्तते। रामः अखण्डमानन्दविवेकरूपं सच्चिदानन्दं परब्रह्म वर्तते[296]। ईश्वरः एव फलानां दाता वर्तते। स एव विश्वं व्याप्नोति। स एषः रघुराजः वर्तते[297]। रघुनाथपादात् अन्यः कोऽपि पुरुषः संसारसागरात् परित्रातुं समर्थः न भवति। न कोऽपि अन्यः पुरुषः शरीरभाजां सन्तापितानां सन्तापहारी वर्तते[298]। श्रीरामः मम हृदये सदा वसतु। कौशल्या कथयति यत् हे सुमित्रे! तदानीमिदं चित्रमभूत्।

विश्वामित्रः कथयति यत् श्रीरघुनन्दनस्य चिन्तनमहर्निशमहं करोमि। सर्वथा मे हृदयस्य विषयः श्रीराम एव भवतु। दशरथः मुनिविश्वामित्रस्य वाक्यं श्रुत्वा महतां सुखानां निधानमयं रामः इति श्रुत्वा प्रसन्नः अभूत्[299]। राजा दशरथः शिशूनां मध्ये बालक्रीडारतः रामः यत् राक्षसानां नाशं कृतवान् तत्र हे मुने! भवान् एव हेतुः। अग्नेः कणः महावनानां दाहं करोति तत्र तीव्रसमीरस्य बलमप्यावश्यकं भवति। अतः भवादृशानां मुनीनां कृपया एतत् कर्म रामः कृतवान्। रामस्य पिता दशरथः मुनिचरणसरोजे वन्दनानि कृत्वा आज्ञां प्राप्य निजजनसुतदारैः राजगेहम् अयोध्यां प्रत्यागमत्। एवम्प्रकारेण अद्वैतयतिप्रणीते राघवोल्लासे नवमे सर्गे अतीव युक्तियुक्तं रसपूर्णं भावयुक्तं वर्णनं दृश्यते।

## दशमसर्गस्य कथा

294 रा.महा., 9.51
295 रा.महा., 9.56
296 रा.महा., 9.58
297 रा.महा., 9.60
298 रा.महा., 9.64
299 रा.महा., 9.70

राघवोल्लासस्य दशमे सर्गे निमिवंशरत्नः राजा जनकः स्वतनुजायाः विवाहार्थं मन्त्रिवर्गान् ज्योतिःशास्त्रविज्ञान् सर्वानादिदेश। वशिष्ठेन निर्धारिते शुभेमुहूर्ते विवाहाद्रिमण्डपादिकार्यं नृपोऽकारयत्। कौशल्या सुमित्रां कथयति यत् चन्द्रमसः सुतायाः विवाहार्थं ज्यौतिषगणना व्यर्था एव भवति। सीता कथयति यत् मम बलं श्रीरामचन्द्रः वर्तते चन्द्रमसः बलेन किमपि कर्त्तुं न इच्छामि। कविः अद्वैतयतिः लिखति यत् तन्मङ्गलमेव शुभमङ्गलं शशितारकाणां बलं व्यर्थं वर्तते। तद्दिनं तद्लग्नं शुभमेव यदि श्रीरामनाम स्मरणं भवति -

तन्मङ्गलं मङ्गलमङ्गलानामलं बलं तच्छशितारकाणाम्।
लग्नं दिनं चापि शुभं तदेव श्रीरामनामस्मरणं कृतं चेत्॥[300]

पुराणमुनयः वदन्ति यत् येन कदाचिदपि रामः हृदये स्मृतः स नरः सर्वचराणां मध्ये श्रेष्ठः भवति। सीतायाः माता तस्याः वचनं श्रुत्वा पराह्लादभरा अवोचत् यत् सीता समीचीनं वक्ति। लीलातनोः श्रीरघुनन्दनस्य भजने सा अनुकूला वर्तते-

सीतावचस्तच्च निशम्य माता जाता पराह्लादभरा त्ववोचत्।
सद्वक्ति बाला भजनेऽनुकूला लीलातनोः श्रीरघुनन्दनस्य॥[301]

जनकस्य कन्या सीता रामस्य धन्याकृतिं चित्ते निधाय मनसा चिन्तयन्ती निद्रां नाश्रयत् -

रात्रौ च तस्यां जनकस्य कन्या धन्याकृतिं राघवमेव चित्ते।
सञ्चिन्तयन्ती मनसा सुधांशुरम्याननं नाश्रयदेव निद्राम्॥[302]

वैवाहिकेऽवसरे हे सुमित्रे! या शोभा विरचिता सा वक्तुं न शक्यते। तस्य कथने जनेषु शक्तिः नास्ति। कौशल्या कथयति यत् हे सुमित्रे! मम हृदयान्तराले अग्निः प्रदीप्तः वर्तते। दाहं करोति। किन्तु अहं किं करोमि। रघुनाथस्य वदने या श्रीः विराजते सा न कुत्रापि प्राप्तुं शक्यते। रामचन्द्रस्य मौलौ किरीटं, भाले तिलकं, कर्णे मणिकुण्डलम्, कण्ठे रत्नहारः एतत् सर्वं रघुनन्दनस्य श्रियः पारः वर्तते। अभिरामे श्रीरामं सर्वाणि विभूषणानि व्यर्थानि भवन्ति तथापि अयं विमलाङ्गसङ्गः समुचितमेव वर्तते। राज्ञा जनकेन यदा रामस्य जन्मराशिः वशिष्ठेन पृष्टः

[300] रा.महा., 10.7
[301] रा.महा., 10.10
[302] रा.महा., 10.11

तदा ओजोबलानामयं राशिः इति हसन् इत्युत्तरमाह। कुलगुरुः वशिष्ठः साकेतनाथस्य गेहे वरस्य श्रेष्ठस्य देहे विधानमन्त्रैः शिवानि विदधे -

देहे वरस्यापि तदैव गेहे साकेतनाथस्य तथा समस्तम्।
गुरुर्वशिष्ठोऽप्यतिशिष्टदृष्टविधानमन्त्रैर्विदधे शिवानि॥[303]

जनकस्य कन्यकायाः सीतायाः देहे हरिद्राचूर्णेन यदुद्वर्तनं रचितं तत्पूर्णं फलं न वितेने। यदा सीता स्नानावृता अभूत् सद्वस्त्रैः सम्भूषिता रत्नविचित्रहारैः सुशोभिता अभूत् तदा सा चक्रधरस्य विष्णोः रामावतारस्य पत्नीरूपेण शोभिताऽभूत्। कविः लिखति यत् जानक्याः अयं मुखचन्द्रः कथमद्भुतः न भविष्यति। अयं रम्यरोचिषा अरुणेन अधरेणालङ्क्रियते। सीता सखीं कथयत्यधुना किमर्थं विलम्बः भवति। तदा सा स्मेरमुखीं सीतामवोचत् यत् अतिशीघ्रमेव रामः आयाति एवं तव कामः पूर्णो भविष्यति इति -

सखी बहुस्मेरमुखी भुजाभ्यामालिङ्ग्य पूर्णेन्दुमुखीमवोचत्।
आयाति रामस्तव कोऽपि कामः पूर्णो भविष्यत्यधुनैव सीते!॥[304]

यद्यपि गुणधामरामः सर्वदेवैः नमस्कृतः वर्तते तथापि मया लज्जां विहाय कराभ्यामाननाब्जं चुम्बितम्। श्रीरघुनन्दनस्य कण्ठे मेघद्युतेः निबद्धामलमौक्तिका? इन्द्रनीलजालस्य शोभां दधाति। रामः यदा अहसत् तदा तस्य शुभास्यं कान्त्या अतीव अरोचत। कौशल्या सुमित्रां कथयति यत् श्रीरामः सदा मे मानसे अस्तु -

शुचितरगुणपुष्पालङ्कृतालङ्कृतार्थ-
क्षितिविबुधवरिष्ठैः प्रार्थ्यते कर्मसिद्ध्यै।
अमृतकिरणकान्तिस्वच्छकीर्त्तिप्रताना
त्तवनवतनुवल्ली राम! मे मानसेऽस्तु॥[305]

एवम्प्रकारेण विवाहसमये श्रीरामस्य यादृशी शोभा आसीत् सा न केनापि वक्तुं शक्यते।

## एकादशसर्गस्य कथा

[303] रा.महा., 10.26
[304] रा.महा., 10.41
[305] रा.महा., 10.52

राघवोल्लासमहाकाव्यस्य एकादशे सर्गे अद्वैतयतिः सर्वप्रथमं श्रीरघुनाथस्य पदपङ्कजपांसवः जयन्ति यत्कृपावशात् अयं मूकः अपि अद्वैतः वावदूकोऽभूत् इति। इदं मङ्गलाचरणं सर्वेषु सर्गेषु वर्तते-

जयन्ति रघुनाथस्य पदपङ्कजपांसवः।
मूकोऽपि वावदूकोऽयमद्वैतो यदुपाश्रयात्॥[306]

भगवान् महेश्वरः लोकपालैः सह तत्र आगमत् यत्र रामः आसीत्। पृथ्वीपालः जनकः रत्नाभरणैः विचित्रैः वस्त्रैश्च रामस्य पादाम्बुजयोः अर्चनामकार्षीत्[307]। श्रीरामस्य विद्युतप्रभामण्डलयुक्तं सकुण्डलं मुखं वीक्ष्य जनकः महत् सुखमवाप[308]। श्रीरामचन्द्रस्य निजमौलिना पदाब्जं संस्पृशन् राजा प्रेम्णा गद्गदः अश्रुधारां व्यमुञ्चत्। जनानां सम्पूजितः जनकेन समर्चितः श्रीरामः प्रसन्नः आसीत्। सर्वजनेन नमस्कृतः श्रीरामः श्रियं प्राप्य शोभां लेभे[309]। श्रीरघुनन्दनस्य मुखस्य पानं कर्तुं सन्तुष्टाः वनिताजनाः नेत्रैः पानं विदधुः[310]।

कौशल्या कथयति यत् हे सुमित्रे! नयनाभिरामं रामं सर्वे विलोकयन्तु। प्रेमभरार्द्रचित्ताः जनाः अनिमेषभावं प्रापुः[311]। सर्वैः जनैः यदा श्रीरामस्य दर्शनं लब्धं तदा तैः चिन्तितं यत् अस्यां धरायाम् अस्मात् परः नान्यः कोऽपि कुत्रापि वर्तते[312]। यदा श्रीरामः गजेन्द्रस्य मौलौ आरूढ़वान् तदा पादोच्चलानि तस्य शुभानि रजांसि अङ्गेषु दधुः[313]।

अस्य रामचन्द्रस्य चरणः अपारमानन्दं प्रददाति। श्रीरघुनन्दनस्य मनोमोहनं रूपं दृष्ट्वा जनानां चक्षुः अपूर्वम् आनन्दं लेभे[314]। श्रीरामः सीतायाः मन्दिरस्य समीपं प्राप्तः एवं सीतायाः नेत्रातिथिः श्रीरामः अभूत्। नमो नमः श्रीरामचन्द्राय इति सा सीता अधोमुखी यती जगाद[315]। तदानीं मिथिलायाः जनता अवादीत् यत् भाग्येन जनकात्मजायाः पतिरूपेण पूर्णचन्द्रः श्रीरामचन्द्रोऽभूत् इति -

[306] रा.महा., 11.1
[307] रा.महा., 11.3
[308] रा.महा., 11.4
[309] रा.महा., 11.9
[310] रा.महा., 11.10
[311] रा.महा., 11.12
[312] रा.महा., 11.14
[313] रा.महा., 11.16
[314] रा.महा., 11.20
[315] रा.महा., 11.27

देवेन दैवं जनकात्मजायाः सृष्टं वरिष्ठं जगतामिदं यत्।
प्राप्तो मुखश्रीर्जितपूर्णचन्द्रः श्रीरामचन्द्रो जनतेत्यवादीत्॥[316]

सीता अधीरा वर्तते तथा समुत्कण्ठिता वर्तते। अतः सा कथयति यत् शीघ्रमेव मम पाणिं गृह्णातु। अद्य कामदेवशरः मम चेतः कृन्तति[317]। सीता सखीं हसन्तीं प्राह यत् मे मनः रघुनाथरूपं यातम्। अतः अन्यत् स्वरूपं मम न विभाति[318]। काचित् सखी सीतां रहसि नीत्वा उवाच यत् त्वं ध्यानेन रघुनाथभावं प्रयाता असि अतः त्वदीयं हृदयं रामे दृष्ट्वा मम भीतिः भवति यत् किं भविष्यति इति[319]? सीता कथयति यत् दाराः उदारार्पितकण्ठहारा राम रामेति वदन्तः रामस्य नीराजनानि स्वकरैः वितेनुः -

दारा उदारार्पितकण्ठहारा हा! राम! रामेति मुदा वदन्तः।
श्रियं समालोक्य परां तदीयां नीराजनानि स्वकरैर्वितेनुः॥[320]

हे कमलनयने! सीते! त्वया कान्त्या जितकामः श्रीरामः पतिरूपेण प्राप्तः[321]। सीतां काचित् सखी कथयति यत् हे सीते भवत्या स्तुत्यानि कृत्यानि पुराकृतानि तस्यैव पुण्यस्य फलं त्वया लब्धम् एवं जनसमूहस्य वाक्यं श्रुत्वा रामः गजेन्द्रात् अवातरत्। सखीभिः सीता उक्ता अधुना प्राणप्रियं रामचन्द्रं प्रापय। तदा सखी सीतां प्राह यत् अद्य गृहस्य बहिः रामः प्राप्तः अतः तव कामः पूर्णः अस्तु। सीता अतीव तुष्टा आसीत्। सा कथयति यत् अधुना मम करे रामः वर्तते कोऽपि अमुं न मुञ्चेत्[322]।

रामस्य नामानि पापस्य विनाशनानि सुखप्रदानि च सन्ति अतः रामस्य नामानि विलोक्य के के न शोकभवनं त्यजन्ति। कविः अद्वैतयतिः लिखति यत् न

316 रा.महा., 11.29

317 अवोचदेवं स्वसखीमधीरा सीता समुत्कण्ठितमानसाऽस्मिन्।
गृह्णातु पाणिं त्वरयैव रामश्चेतः शरैः कृन्तति हाऽद्य कामः॥ (रा.महा., 11.30)

318 अनन्यचिन्तां प्रसमीक्ष्य सीतां सखीं हसन्तीं जगदे हसन्ती।
जातं मनो मे रघुनाथरूपं नान्यत्स्वरूपं सखि! मे विभाति॥ (रा.महा., 11.34)

319 नीत्वा रहः काचिदुवाच सीतां ध्यानेन यातां रघुनाथभावम्।
प्रयाति चेतोऽतिभयं मदीयं विलोक्य रामे हृदयं त्वदीयम्॥ (रा.महा., 11.36)

320 रा.महा., 11.39

321 नालीकमेतत् प्रवदाम्यलीकं वीतोपमं तारकमम्बुजाक्षि!।
कान्त्या जितो येन च नाम कामः पतिः स रामः सुभगे! त्वयाप्तः॥ (रा.महा., 11.41)

322 प्राप्तं करे पुण्यभरेण रामं मुञ्चेदमुं कोऽपि च नात्र कामम्।
स्वार्थेषु लुब्धेषु कुतो जनेषु चिन्ता भवेत्प्रेयसि! हा मदीया॥ (रा.महा., 11.49)

केवलं मानवानाम् कृते श्रीरामः परमश्रेष्ठः आसीत् अपितु पशुः गजराजोऽपि तदा आचक्रन्दे यदा भगवान् रामचन्द्रः गजेन्द्रशिरःप्रदेशात् उत्तितीर्षुः अभूत्। गजराजोऽपि रामं नमश्चकार[323]। पशुरपि चित्कारदम्भात् प्रखरं रुरोद। भक्तिः कीदृशी भवति तद्विषये कविः लिखति -

राजते भक्तराजस्सः यस्य रामस्मृतेर्भवेत्।
गात्रं रोमाञ्चितं नेत्रं सजलं विकलं वचः ॥[324]
स पुमान् पावनः कामं यस्तु रामं स्मरन् हृदि।
गात्रे रोमोद्गमं नेत्रे वारिधारां च संश्रयेत् ॥[325]

गजेन्द्रः लोचनयोर्जलस्य अपारां धारां मुञ्चन् रामस्य पदं करेण पस्पर्श। हे राघव! मम मौलेः लाघवेन उत्तीर्यतामिति अवदच्च। रामोऽपि तथैव उत्तीर्णवान्। तदानीं जयराघव इति देववनिताभिः अभिनन्दनमभूत्। सर्वे तत्र सीतासमेताय राघवाय नमः इति ऊचुः -

यो युक्तमप्याचरति स्वकीय-दासप्रियापूरणमात्रकामः।
सीता-समेताय च राघवाय तस्मै नमश्चेति च ते समूचुः ॥[326]

तत्र सर्वे देवाः श्रीरामचन्द्रं नमश्चक्रुः। ते ऊचुः हे श्रीरामतात! त्वं ब्रह्माकृतिः असि -

श्रीरामतात! कुरुषे पुरुषेन्द्रचित्रं ब्रह्माकृतिस्त्वमसि ते कृतिरीदृशी यत्।
उक्त्वैवमम्बरतले सकले वरं स्वं कुर्वन्नतं सुरपतिः प्रणतीश्चकार ॥[327]

राजाविदेहः लग्नकालं ज्ञात्वा मङ्गलनाममालां स्मरन् बालां सुशीलां सीतामनयत्[328]। सुवासिनीमण्डलमण्डिता मिथलेशपुत्री सीता गृहं ययौ। तस्याः सुन्दरं मुखं किञ्चित् दृष्ट्वा कटाक्षदृष्टिविक्षेपणदक्षां दृष्टिं प्राप्य रामः मुमोह[329]।

---

[323] रा.महा., 11.51,52,53
[324] रा.महा., 11.55
[325] रा.महा., 11.56
[326] रा.महा., 11.65
[327] रा.महा., 11.66
[328] रा.महा., 11.67
[329] किञ्चत् स्फुटं चारुमुखं तदीयं कटाक्ष-विक्षेपणदक्षदृष्टिः।
आलोक्य लोकोत्तरधैर्यपात्रं जातं विचित्रं स मुमोह रामः ॥ (रा.महा., 11.71)

सीता श्रीरामस्य अङ्गस्य स्पर्शेन अतीव तुष्टा आसीत्। सा रामस्य समीपे उपाविशत्। एकासने सीता द्वौ अपि सूर्यकुलावतंसौ द्वौ अपि एकासने मनोज्ञवेशौ आस्ताम्। तौ तथा आलोक्य लोकाः वितर्कं विदधुः -

एकासने तौ विहितोपवेशौ मनोज्ञवेशौ विततप्रकाशौ।
सीता सहस्रांशुकुलावतंसौ संलोक्य लोका विदधुर्वितर्कम्॥[330]

तदानीं विदेहः जनकः प्राह- प्रभया परीतः सीता साक्षात् माता लक्ष्मीः वर्तते एवं श्रीरामः परिपूर्णकामः नारायणः वर्तते -

इयं नु सीता प्रभया परीता जाताऽत्र लक्ष्मीर्जगतोऽस्य माता।
प्रायेण रामः परिपूर्णकामो नारायणश्चेत्यवदद् विदेहः॥[331]

तदानीं सीतायाः जननी अवदत् यत् इयं पुत्री साक्षात् गौरी वर्तते एवं सर्व-मनोहरः श्रीरामचन्द्रः साक्षात् हरः (शिवः) वर्तते इति[332]। अन्ये केचित् कथयन्ति यत् सीता साक्षात् रतिः वर्तते एवं श्रीरामः साक्षात् कामदेवः -

सीतारतिः सर्वसती-प्रतीत निर्व्याजशीला रमणीयकान्तिः।
रामस्तु कामः प्रथितोऽग्रधाम व्यायामकीर्त्तिक्षयकृत्प्रभावः॥[333]

श्रीरामस्य सीतायाश्च विषये स्त्रियः एवं प्रशशंसुः -

रामो नैव नरो विभाति च पुरो वैश्वानरो विस्फुर-
त्तेजः पुञ्जशरीरदीपितदिशादेशान्तरालान्तरः।
नूनं खञ्जनगञ्जनाक्षियुगला स्वाहा विदेहात्मजा
नैनं मुञ्चति कुञ्चतालकलसद्बालाप्यबाला जगुः॥[334]

अर्थात् अयं रामः नरः न वर्तते अयं साक्षात् वैश्वानरः। अस्य शरीरात् निसृ-ततेजः पुञ्जद्वारा सर्वं दीपितं प्रतिभाति। तथा इयं विदेहात्मजा सीता साक्षात् स्वाहा

---

330 रा.महा., 11.73
331 रा.महा., 11.74
332 इयं नु गौरी जनकस्य पुत्री भासा विचित्रीकृतसर्वदेशा।
अयं हरः सर्वमनोहरश्रीः श्रीरामचन्द्रो जननीत्यवादीत्॥ (रा.महा., 11.75)
333 रा.महा., 11.76
334 रा.महा., 11.79

वर्तते। एवं युवतीनां रामं प्रति कथनमासीत्। इयं रामजाया मायारूपा वर्तते एवं रामः साक्षात् ईश्वरः वर्तते[335]। यदा विवाहसमये रामचन्द्रः उपस्थितः अभूत् अथ च सीताऽपि आनीता तथा शिष्टाचरणार्थं पटविशेषेण सीता समाच्छादिता तदा असौ रामचन्द्रं द्रष्टुं न शक्ता अभूत्। सा क्षणमपि वियोगं सोढुं समर्था नासीत्। किन्तु सख्या पाणियुगेन पटं सम्यक्प्रकारेण आच्छादितम् आसीत् -

शक्ता न सोढुं क्षणतो वियोगं श्रीरामचन्द्राननवीक्षणस्य।
उद्वर्त्तुमेषा पटमुद्यताशा जाता धृता पाणियुगेन सख्या॥[336]

राजा जनकः स्नानं कृत्वा श्रीरामचन्द्रपदपङ्कजं दृष्ट्वा सुतायाः सीतायाः रा-मेण सह विवाहार्थं पत्नीसहितः उपाविशत्[337]। राजा जनकः गुरुभ्याम् सम्प्रेरितस्य रघुनन्दनस्य करे सीतायाः करं प्रादात् -

प्राप्ते क्षणे क्षेमकरे नरेशः संप्रेरितोऽसौ सहसा गुरुभ्याम्।
ददौ करं रामकरे सुताया अग्रे कृताया रघुनन्दनस्य॥[338]

कौशल्या कथयति यत् हे सुमित्रे! रामस्य विवाहसमये आनन्दशब्दसूच-कवाद्यनादः अभवत्। वेदोच्चारणघोषः अभवत्। दैवदुन्दुभीनां ध्वानः सञ्जातः। एकसमये विभिन्नानां ध्वनीनां शब्दघोषः अभूत् -

आनन्दसंसूचकवाद्यनादाः वेदप्रवादाश्च हतावसादाः।
ध्वानाः परे दैवतदुन्दुभीनां जाता अनन्ता युगपत्सुमित्रे॥[339]

सीतारामविवाहसमये सुरसुन्दरीणां सुखसम्पूरितानि गीतानि अभवन् एवं दे-वाः सहर्षं श्रीरामस्य मौलौ पुष्पवृष्टिं चक्रुः -

स्फीतञ्च गीतं सुरसुन्दरीणां वृन्दानि चक्रुः सुखसंप्लुतानि।
किञ्चातिवर्षं कुसुमैः सहर्षं श्रीरामशीर्षे विबुधा वितेनुः॥[340]

[335] इयं हि माया किल रामजाया नायाति यस्याः कृतिरत्र पारम्।
रामोऽपि नामोदित सर्वलोकः स्तोकाकृतिः केवलमीश्वरोऽयम्॥ (रा.महा., 11.80)

[336] रा.महा., 11.86

[337] रा.महा., 11.102

[338] रा.महा., 11.103

[339] रा.महा., 11.104

[340] रा.महा., 11.107

जगद्वरेण रामचन्द्रकरेण पाणौ धृते सति सुखनिमीलितलोचनान्ता सीता कान्ता अभूत् -

पाणौ धृते सति करेण जगद्वरेण
रामेण नाम निहताखिलपातकेन।
जाता क्षणं सुखनिमीलितलोचनान्ता
कान्ता चराचरगुरोः प्रणयेन सीता॥[341]

कविः अद्वैतयतिः कथयति यस्य पादरेणुसङ्गमेन नरः सुखं प्रयाति तस्य पाणियुगेन योगः सुधियां कृते सर्वभोगपदः भवति -

यत्पादरेणोरपि सङ्गमेन सुखं सखि! स्यादतिसङ्ख्यमेव।
तस्यापि चेत्पाणियुगेन योगः को वाऽत्र भोगः सुधियां दुरापः॥[342]

कविवरः अद्वैतयतिः वैदुष्यपूर्णवाक्यैः सीतारामविवाहप्रसङ्गे अतीव युक्तियुक्त्या वर्णमकार्षीत्। कविः लिखति यत् स्वतन्त्राः राजपुत्रा यत्र गच्छन्ति तत्र रम्या मधुरा कन्याः लभ्यन्ते, किन्तु यत्र श्रीरामः वर्तते तत्र सीता वसति इति जनाः वदन्ति -

गच्छन्त्वथैते सुखतः स्वतन्त्राः श्रीराजपुत्राः प्रमिलत्कलत्राः।
यत्रैव रामः किल तत्र सीता लोके प्रणीता जनता वदन्ति॥[343]

जनकात्मजायाः परिहासवाक्यात् तस्याः आस्यं दृष्ट्वा रामः मुदं प्राप[344]। अद्वैतयतिः सीतारामविवाहस्य शृङ्गाररसपूर्णम् अतीव सरसम् आनन्दभरितं वर्णनं कृतवान्। कविः लिखति -

एवं श्रीरघुनायकेन विभुना सीताकरे स्वीकृते
पूर्णानन्दमगाद् विदेहनृपतिः सत्रा च मित्रादिभिः।
दृष्ट्वा राममम‍ुं पयोदपटलं नृत्यत्पताकावलिः
सन्तोषातिशयादभूत् क्षितिसुता गौरी मयूरी समा॥[345]

341 रा.महा., 11.108
342 रा.महा., 11.109
343 रा.महा., 11.120
344 प्राणप्रियाया जनकात्मजाया जातः प्रहासः परिहासवाक्यात्।
विलोकयन् वक्रदृशा तदास्यं हास्य-प्रशस्यं मुदमाप रामः॥ (रा.महा., 11.121)
345 रा.महा., 11.123

सीतायाः पाणिग्रहणसंस्कारः यदा विभुना रामेण सह अभूत् तदा विदेह-राजजनकः पूर्णानन्दमगात्। तदा सीताऽपि रामं दृष्ट्वा सन्तुष्टा मयूरी इव अभूत्। एकादशसर्गस्य अन्ते अद्वैतयतिः पाणिग्रहणसंस्कारविषये लिखति -

कल्याणं कुरुतादयं रघुपतिर्येनाकृतिः स्वीकृता
त्रातुं राक्षसभारतोऽनवरतं खिन्नामलां मेदिनीम्।
विष्णुर्धिष्ण्यमुदञ्चितं धनचिदो भेदो न यत्रोदितः
सीताशक्तिसमाश्रितः स्मितमुखः सञ्जातपाणिग्रहः॥[346]

एवम्प्रकारेण सीता विवाहवर्णनं दृश्यते।

**द्वादशसर्गस्य कथा**

रघुनाथस्य पदपङ्कजपांसवः जयन्ति यत्कृपावशात् मूकोऽपि अयमद्वैतः कविः वावदूकः अभूत्। अधुना सर्वप्रथमं मैथिलः राजा जनकः वशिष्ठं कथयति हे स्वामिन्! वशिष्ठ! त्वत्पादसङ्गमवशात् मया सकलं हृदीष्टं सम्प्राप्तम् अधुना। कृपया किञ्चित् अवशिष्टं प्रवद -

स्वामिन्! वशिष्ठ! शुभदिष्टवता मयाप्तं
त्वत्पाद-सङ्गमवशात्सकलं हृदिष्टम्।
किञ्चावशिष्टमिह कर्मसुधमर्म-
प्रज्ञाश्रय! प्रवद मैथिल इत्युवाच॥[347]

वैदिककर्मानुसारं विवाहकर्म सकलं सम्पन्नमभूत्। अधुना वध्वा वरस्य प्रणामपूर्वं लीला विधेया इति-

जातं समस्तं श्रुतिभिः प्रशस्तं यथा तथेदं हि विवाहकर्म।
बध्वा वरस्याद्य मिथः प्रणाम-पूर्वं विधेया कुतुकाय लीला॥[348]

वशिष्ठस्य वचनं श्रुत्वा राजा विदेहः शुभगोपहारान् दत्वा स्वदारान् आज्ञापयत्। कविः लिखति यत् विवाहसमये कौतुकलीला भवति तत् वक्तुम् अहं न समर्थः तथापि श्रीराघवे मम मनः विशति। कनकस्य सुपात्रे दीपान् कृत्वा सखीभिः

[346] रा.महा., 11.124
[347] रा.महा., 12.2
[348] रा.महा., 12.3

सीता सम्प्रेरिता अभूत् तथापि स नीराजनं न ऐच्छति। प्रियया सीतया दीपावलीभिः श्रीरामः नीराजितः एवं रामः स्वमुखेन सुखं वितेने। तदानीं सीता शोभां विलोक्य विवेकेन शून्या अभूत् -

धृत्वा करेणैव तु दीपमालां व्यक्तान्तरालां वदनस्य शोभाम्।
आलोकयन्ती मिथिलेशकन्या शून्या विवेकेन मुदा तदासीत्॥[349]

नीराजनसमये यानि मङ्गलानि रामं समुद्दिश्य उक्तानि सीताऽपि हसति तत् अवदत्। न कोऽपि विदुष्याः सीताः भावं वेदः -

नीराजतायाः समये वदन्ती रामं समुद्दिश्य च मङ्गलानि।
सीता हसत्तत्पुनरुक्तिभावाद् भावं विदुष्या न हि कोऽपि वेद॥[350]

कौशल्या कथयति यत् हे सुमित्रे! श्रीरामचन्द्रस्य सीतायाश्च विवाहसमये यः महोत्सवः अभूत् तद् विषये कृपया किमपि श्राव्यम् -

क्रीडाविधिर्लोकमनोहरस्य श्रीराचन्द्रस्य च भूसुतायाः।
श्राव्यं सुमित्रे! प्रविधाय चित्ते प्रायः समाधानमिहोत्सवाय॥[351]

तदानीं गृहमध्ये मणिप्रदीपः परितः दीप्त्याः प्रकाशं कुर्वन्ति स्म। तदा दिव्याम्बराकीर्णसुवर्णभित्तिप्रोद्यत्प्रभा व्योमतलं विशन्ति स्म-

मध्ये गृहं यत्र मणिप्रदीपाः कुर्वन्ति दीप्त्या परितः प्रकाशम्।
दिव्याम्बरा कीर्णसुवर्णभि-प्रोद्यत्प्रभा व्योमतलं विशन्ति॥[352]

रामाग्रभागे धूपपात्रं स्थितमासीत् तस्य प्रकोष्ठस्य विधानरन्ध्रात गन्धसमूहा उत्प्रयाता एवं धूमाः विरेजुः परितोऽतिसीतया नाकोष्टदा कुप्रकरा इवाशाः[353]। यस्मिन् गृहे रामः आसीत् तत्र केसरकस्तूरिकाचन्दनकेसराणां गन्धः आसीत्। गन्धः अपि जालमार्गेण गच्छति स्म। श्रीरामसीतयोः चरणयोः विचित्रा शोभा भवति स्म। विवाहकाले विविधाः विचित्राः चित्ताकर्षकाः लीलाः भवन्ति स्म। कौतुकं द्रष्टुं तत्र शक्रः अपि समागतः आसीत्। देवाः दारान् आदाय तत्र प्राप्ताः -

---

[349] रा.महा., 12.10
[350] रा.महा., 12.11
[351] रा.महा., 12.12
[352] रा.महा., 12.13
[353] रा.महा., 12.15

तत्कौतुकं वीक्षितुमन्तराले शक्रो विशालेक्षणया समेतः ।
आदाय दारानपि देववारा आराद्ययुस्तेऽपि मधुप्रियाभिः ॥[354]

श्रीसीतायाः सखीजनः परिशिक्षितः आसीत्। तथापि न कापि सखी रामपदे प्रणामान् अकरोत्। विवाहसमये कौतुकलीलाप्रसङ्गे यदा सीता बहुभावगर्भं वाक्यमुवाच तदा रघुनायकोऽपि गूढार्थं ज्ञात्वा प्रशशंस। तदानीं जगदीश्वराय रामं मिथिलेशपुत्री प्रणामं कृतवती[355]।

सखी जनेनापि यदा कृतार्थना दृष्टा तदा तस्य मुखं स्मृत्योल्लसितः जातः । रामपदे प्रणामं कर्तुं सखीजनाः समुत्थिता किन्तु लज्जया न चक्रुः -

सखीजनेनापि कृतार्थना सा किञ्चत्स्मितोल्लासि मुखं कथिञ्चत्।
समुत्थिता रामपदे प्रणामं कर्त्तुं ह्रया नाचरदेव भूयः ॥[356]

कमललोचनायाः सीताया वयस्याः सखीजनाः यदा रामपदे प्रणामं कर्त्तुं गताः तदा लज्जावशात् पादतले समागतात् स्वेदजलाद् बाला कौतुकात् आकुलिता अभवन् -

मान्याम्भोजविलोचना व्रज वचः संप्रेरणात्क्लेशतः
कर्त्तुं रामपदे प्रणाममुदिता लज्जामिलल्लोचनम्।
तेनाप्याशु निरीक्ष्यपादयुगलं सञ्चालितं कौतुका-
त्खेदस्वेदजलाकुलालिकतला बाला किलावर्त्तत ॥[357]

काचन सखी अवदत् यत् रामस्य पदं शिलां स्त्रीरूपेण अकरोत् इति श्रुत्वा सीता अतिभीता अभूत् तदा सीता धैर्यमवलम्ब्य श्रीरामपादौ शिरसा ननाम -

त्यागं त्रपाया यदि कोऽपि कुर्याद् धैर्यम्बुराशिर्लभते तदैव।
श्रीरामपादौ सुविचार्य सीता धृत्वा दृढं तौ शिरसा नमाम ॥[358]

---

[354] रा.महा., 12.22
[355] वाक्यस्य तस्य श्रवणादतीव सञ्जाततोषा हृदयान्तराले।
कर्त्तुं प्रणामं जगदीश्वराय जातोत्सवाऽभून्मिथिलेशपुत्री ॥ (रा.महा., 12.29)
[356] रा.महा., 12.30
[357] रा.महा., 12.31
[358] रा.महा., 12.39

सीता स्वनेत्रनीरैः रामस्य पादौ प्रक्षाल्य रघुनाथस्य पूजां कृतवती। तदानीं सा चिरकालपर्यन्तं तस्मात् दूरे न अभूत् -

स्वमौलिभूषामणिदीप्तिनीरैः प्रक्षाल्य पादौ हृदयोपचारैः।
सम्पादयन्ती रघुनाथपूजां नासीच्चिरं दूरतरा ततः सा॥[359]

कविः लिखति यत् पादौ सम्प्राप्य कः त्यक्तुमिच्छेत्। तदानीं जनकस्य पुत्र्याः सीतायाः पक्षे याः स्त्रियः आसन् ताः अवदन् अधुना सीतापदे रामः प्रणामं कुर्यात्। हे राम अधुना जानकीपादयुगे प्रणामान् करोतु। मुक्तिदायकस्य तव अद्य भवसागरात् मुक्तिः भविष्यति। तदानीं देवाः ऋषयः यक्षः पवनः देवः लोकपालादयः तत्र समागताः एवं तत्र पुष्पवृष्टिः अभूत्।

इन्द्रः, सुरगणाः, कमलयोनिः ब्रह्मा, भवः शिवः विवाहोत्सवं द्रष्टुं समागताः आसन्। कथं रामः सीतायाः पदे प्रणतिं करिष्यति। हा !हा ! सूर्यवंशतिलकं गौरवं हित्वा अधुना कुत्र गमिष्यति ?-

इन्द्रः सान्द्रमुदान्वितः सुरगणैः साकं विहायोङ्गणे
पश्यत्यम्बुजसम्भवो भवयुतोऽप्येनं विवाहोत्सवम्।
कर्त्तव्या प्रणतिः कथं नतसुराधीशेन योषापदे
हा ! हा ! गौरवसौरवंशतिलकं हित्वाऽधुना यास्यति ? ॥[360]

सुरगुरोः रामस्य शक्त्या सीतया दृष्टं यत् पतिः देवतुल्यः रामः चरणाम्बुजं प्रति आकृष्टः वर्तते तदा सीता प्राह पतिः देवता भवति। तदा रामः अति सौख्यम् अलभत्[361]। रामस्य विवाहे यत् कौतुकं प्रवर्त्तितं तद् वक्तुं सर्वे न समर्थाः भवन्ति। तत् केवलं ब्रह्मा एव जानाति। विवाहस्य विधौ समाप्तिं गते जनेशः जनकः स्वजनान् वस्त्रादिभिः सम्भावयित्वा अशेषतोषमवाप। तदानीं जनकः सीतामुवाच- हे सीते तव प्राणप्रियो वल्लभः सत्यं वर्तते। तत् दृष्टवा सीता नयनेन रामं वीक्ष्य निकामं सुखानि विदधे -

359 रा.महा., 12.40

360 रा.महा., 12.50

361 ज्ञात्वा तत् स्थिरमन्तरे सुरगुरो रामस्य शक्त्या तया लज्जाकारणमुत्स्मिस्मताकुलमुखाम्भोजान्तरालश्रिया।
आकृष्टं चरणाम्बुजं निजमिति प्रोक्ता पतिर्दैवतं लेभे सौख्यमतिप्रसन्नवदनः कुर्याच्छिवं राघवः॥ (रा.महा., 12.51)

उवाच सीतां जनको वदेति यद् वल्लभं पुत्रि! तवास्ति सत्यम्।
सन्दर्शयन्ती नयनेन रामं सीता निकामं विदधे सुखानि॥[362]

राजा जनकः सचिवं प्राह यत् जनकात्मजायाः कृते किं दायप्रदानं भवति इति। तदा सीता हास्यपूर्वकमवोचत्- हे पितः! मया सर्वं लब्धम् इति। मया सर्वे पदार्था लब्धा अहं सम्पूर्णकामा अस्मि। मनोहरेण रामेण अहं परितुष्टा अस्मि[363]। सीतायाः विवाहोत्सवे जनकेन सुवर्णादिविभूषिताङ्ग्यः चेट्यः, गजाः, अश्वाः, बाहाः, रथाः, धनादिकं च प्रदत्तानि -

दत्ता मणीनां जनकेन येऽद्य चेट्यः सुवर्णादिविभूषिताङ्ग्यः।
दन्ताबला भूरिबलाश्च वाहा गत्या प्रवाहा विलसन्ति येषुम्॥[364]

रामस्य तुष्ट्यै सैन्यानि वित्तानि जनकेन प्रदत्तानि। जनकः प्राह हे राम! जगतां त्रयाणां त्वं सम्पालकः अतः तुभ्यमहं किं दद्याम्। रामकरे नृपः पुनः सीतामदात् -

सम्पालकस्त्वं जगतां त्रयाणां त्वामुक्तिरेषा पुनरुक्तिरेव।
नत्वा वदन् स्नेहसगद्गदं तं सीतां पुना रामकरे नृपोऽदात्॥[365]

सीता पितुः समीपमागत्य रुरोद। जनकः प्राह- हे पुत्रि! का शिक्षा तव कृते अनुदेया त्वं सकलासु रचनाकलासु दक्षा असि। एवं रामः सदा पूरितसर्वकामः वर्तते। स त्वया सेव्य इति उक्त्वा हृदये दधार[366]।

जनकस्य आज्ञां प्राप्तुं सीतासमेतः श्रीरामः अगच्छत्। जनकः हृदयेन रामं धृत्वा न अमुञ्चत्। मातापि सीतां हृदयेन धृत्वा अश्रुपूर्णां नेत्रां सीतां प्राह-हे सुभगे! त्वया चिन्ता न कार्या। तव पतिः लोकेशः वर्तते -

मातापि सीतां हृदयेन धृत्वा गाढं कराभ्यां स्रवदस्रनेत्राम्।
काचित् विधेया सुभगे! न चिन्ता कान्ताऽसि लोकेशितुरित्यवोचत्॥[367]

---

[362] रा.महा., 12.54

[363] वदामि सत्यं न ममास्ति कृत्यं ततः परैस्तातवरैः पदार्थैः।
सम्पूर्णकामा त्वियमस्य रामा रामाभिधानेन मनोहरेण॥ (रा.महा., 12.56)

[364] रा.महा., 12.57

[365] रा.महा., 12.59

[366] का वाऽनुदेया तव पुत्रि! शिक्षा दक्षासि नानारचनाकलासु।
रामः सदा पूरितसर्वकामः सेव्यस्त्वयोक्त्वेति हृदा दधार॥ (रा.महा., 12.61)

[367] रा.महा., 12.63

जनकः सीतां प्राह यत् पतिः सर्वदा हृदये एव संस्थाप्य रक्षणीयः। मुनयः अपि तथा वदन्ति योषाजने परमा भूषा पतिः भवति -

मान्येषु मानः सदये! प्रदेयो रामो विधेयो हृदयान्न दूरे।
एषैव भूषा परमा हि योषा-जने जनेशा मुनयो वदन्ति॥[368]

सीता जननीं कथयति-हे मातः स्वामिनः प्रसादात् मम कृते किमपि दुस्प्रापं नास्ति। किन्तु युवयोः पित्रोः मुखदर्शनं दुर्लभं भविष्यति इति रुदती प्राह -

मातर्न मे स्वामिप्रदप्रसादाद् दुःप्राप्यमत्रास्ति हि वस्तु किञ्चत्।
दुःप्राप्यमास्यं युवयोर्मयेति सीता रुदन्ती विदधेऽतिखेदम्॥[369]

सीता पितरं प्राह-मम अन्या नास्ति काचित् इच्छा। सा तातं जनकमालिङ्ग्य उच्चैः रुदन्ती तापं विदधे -

नैवास्तु कस्यापि कदापि कन्या नान्या महेशास्ति मदर्थना त्वाम्।
आलिङ्ग्य तातं क्षितिजा वदन्ती प्रोच्चैः रुदन्ती विदधेऽस्य तापम्॥[370]

राजा जनकः कथयति यत्-हे सीते! स्वसुरस्य गृहे वसन्ती त्वं किं करिष्यसि? यदि कदाचित् कश्चित् पुरुषः अयोध्यापुरम् प्रयास्यति तदा अहं गवेषणां करिष्यामि। त्वया सह राघवमानयिष्यामि। जनकः अग्रे वदति यत् पुराणे मुनिना उक्तं यत् येन रामचन्द्रः समाश्रितः स किमपि अन्यत् न वाञ्छति -

शृण्वेकमेतद् वचनं मदुक्तं यत्साधुनोक्तं मुनिना पुराणे।
समाश्रितो येन स रामचन्द्रो नासौ सुभद्रो परमीहतेऽत्र॥[371]

जनन्याः आज्ञां समासाद्य पितुः सुहृज्जनानां च आज्ञानुसारं माया रूपा रामस्य जाया रुरोद -

आज्ञां समासाद्य बलाज्जनन्यास्तथैव तातस्य सुहृज्जनानाम्।
सञ्जातस्वेदेव रुरोद माया रामस्य जाया नरनेययानम्॥[372]

[368] रा.महा., 12.65
[369] रा.महा., 12.67
[370] रा.महा., 12.68
[371] रा.महा., 12.73
[372] रा.महा., 12.74

कविः अद्वैतयतिः लिखति -

राजा पुण्यरथस्तदा दशरथः प्रारुह्य रौप्यं रथं
सेनासागरसम्वृतोऽप्यधिगतश्रीभिः समेतः सुतैः ।
साकं दारजनैश्च सुन्दरधनैः सीतादितातार्पितै-
स्सानन्दं चलितः श्रियातिकलितो दैवैरपीक्ष्योऽभवत् ॥[373]

अर्थात् राजा दशरथः रौप्यं रथं प्रारुह्य सेनासागरसम्वृतश्रीभि सुतैः सहितः, सीतादिस्त्रीसहितः सुन्दरधनैः साकं यदा अयोध्यां प्रति चलितः तदा देवाः अपि तं द्रष्टुं मनश्चक्रुः । यदा राजा रामः मार्गे आसीत् तदा अद्भुतं दृश्यमभूत्। क्रोधान्धः परशुरामः रामस्य समीपमजगाम। परशुरामः कथयति -

बारम्बारमियं कृता बलवता भूमिर्मयाऽक्षत्रिया
दत्ता साऽप्यधुना द्विजाय विधिना तेजोमहाम्भोधिना।
एतद्बीजमतोऽमिता समुदिता या कीर्त्तिरूपा लता
तद्वृद्ध्यै विदधामि राममतिद् बालं तृणं दूरतः ॥[374]

अर्थात् मया परशुरामेण वारं-वारं भूमिः क्षत्रियरहिता कृता एवं मया भूमिः ब्राह्मणाय प्रदत्ता। अतः मया सह अयं बालः अपलापं मा करोतु। पुनः अग्रे परशुरामः कथयति यत् मया महारिपुवनं क्षणेन दग्धम्। मम बलं त्रैलोक्ये विदितं वर्तते। मम परशुरामस्य कृते जलधेः शुष्काकृते पत्रस्य भस्मीकरणे को वा विलम्बो भवेत् -

दग्धं येन घनं महारिपुवनं भीमं क्षणेनाखिलम्
त्रैलोक्ये विदितामितोद्यतबलेनालं महाबाहुना।
यस्याग्नेर्मम रामधामजलधेः पत्रस्य शुष्काकृते-
स्त्वद्रूपस्य नितान्तभस्मकरणे किं स्याद् विलम्बोऽधुना ॥[375]

परशुरामः उच्चैः स्वरेण उद्घोषयति यत् हे दाशरथे! अधुना त्वं पाणितले शस्त्रं धारय। गर्वोक्तिवाक्यं श्रुत्वा दाशरथिः रामः परशुरामं कथयति -

[373] रा.महा., 12.75
[374] रा.महा., 12.78
[375] रा.महा., 12.83

यस्यायं प्रथितः पिता दशरथो माता प्रजाताग्रणीः
कौशल्या यमजीजनद् घनयशः कोशो विशेषोदयम्।
तस्य द्वेषिगजव्रजप्रदलनप्रख्यातसारस्य मे
रामस्यास्य हरेर्गतोऽसि पुरतो नैव स्वतो मुक्तिभाक्॥[376]

अयं दाशरथिः रामः विष्णोः एव अंशावताररूपो वर्तते इति ज्ञात्वा परशुरामः शान्तोऽभूत् -

श्रुत्वैतद् वचनं प्रगल्भरचनां श्रीरामचन्द्रोदितं
शस्त्राण्यस्य पुरस्त्यजन् स सकलान्युत्सन्नलज्जाभरः।
ब्रह्माकारविचारसारहृदयो दृग्वारिधाराभया-
न्मुञ्चन् श्रीचरणाब्जयोरतिनतः पाहीत्यमुं चावदत्॥[377]

परशुरामः शस्त्राणि त्यक्त्वा दिग्वारिधाराभयान् मुञ्चन् श्रीचरणाब्जयोः अतिनतः पाहि इति अवदत्। रामः अपि अतीव नम्ररूपेण तदानीम् आसीत्। परशुरामः तूष्णीं बभूव। दशरथः स्वपुण्यवशात् रघुपतेः महत्तरं पौरुषं दृष्ट्वा मुदम् अगात्। सर्वसुराधिराजा अयं हरिः वर्तते इति प्रेमजलाकुलाक्षः अवदत्[378]।

रघुनन्दनस्य वियोगात् राजा विदेहः विस्मृतदेहगेहः क्षणमतिलब्धमोहाभूत्। एकत्र सीता वर्तते तथा रघुवंशकेतुः रामः वर्तते एतादृशमन्योन्यशोभारचनाप्रचारं विलोकयन्तौ आस्ताम्। यदा श्रीरामः सीतया सह अयोध्यापुरीम् अगच्छत् तदा अनन्तसेनापरिजुष्टपृष्ठः वशिष्ठः उवाच- रघुनाथस्य माता कौशल्या रघुनाथमेव चिन्तयन्ती आसीत्। सम्पूर्णं जगत् रघुनाथरूपमपश्यत्।

अनन्तरमद्वैतयतिः स्वाश्रयदातुः प्रतापसाहस्य प्रशंसा करोति। मुरारिणा मया एतत् समस्तं काश्यां लिखतिम्। असौ कथयति -

प्रतापशाहार्पितगौरवेण येनाप्यमानि त्रिदिवस्तृणाभः।
मुरारिनानेन समस्तमेतत् संन्यस्य काश्यामितमात्मरूपम्॥[379]

अर्थात् अयं अद्वैतनामा यतिः श्रीप्रतापनृपतेः आदेशतः काशीनगरे राघवोल्लासमहाकाव्यं व्यरचयत्। कथासागरः ग्रन्थः अथ च भक्तिचन्द्रिका ग्रन्थः अपि काश्याम् एव प्रतापनृपतेः आदेशात् अनेन विलिखितौ-

[376] रा.महा., 12.92
[377] रा.महा., 12.95
[378] रा.महा., 12.99
[379] रा.महा., 12.108

अयुतद्वयमानोऽपि कथासागरसंज्ञकः ।
कृतो ग्रन्थस्तथानेन रचिता भक्तिचन्द्रिका ॥[380]

करुणामयेन गुरुणा श्रीरामकृष्णाश्रमेण एव कृपावशात् मम नाम अद्वैतयतिः इति कृतम्-

अद्वैत एवं गुरुणास्य नाम कृतं कृपातः करुणामयेन ।
यत्पादकासारजनिप्रसाद-सञ्जातशक्तिः कुरुतेऽस्म काव्यम् ॥[381]

अर्थात् गुरोः कृपावशात् राघवोल्लासमहाकाव्यं मया विलिखितम् इति कविः लिखति। गुरोः चरणकमलप्रसादात् एव एतत् सर्वं मया कृतम्[382]। काश्यां दुर्गाकुण्डे स्नानं कृत्वा मया द्वैतधीः दूरी कृता। तत्रैव श्रीरामसेवाधनं मया लब्धम् -

काश्यां दैवतदीर्घिकामलजलस्नानप्रतानार्जितै-
र्निःसीमैः सुकृतैः कृतार्थजननः श्रीरामसेवाधनः ।
ब्रह्मानन्दसमुद्रसान्द्रलहरी दूरीकृतद्वैतधी-
राश्चर्यं जनतासु तासु रचयन्नायुर्नयाम्युत्तरम् ॥[383]

कविः लिखति यत् मनस्तु चञ्चलं भवति तथापि मया सीतापतिपदांघ्रिमग्नेन सदा अखण्डे परब्रह्मणि कृतम्। मम कृते न पुत्रः सुखाय वर्तते न मित्राणि, न कलत्राणि, न गृहाणि अन्यत्र किमपि मह्यं न रोचते। सुमित्रातनयस्य लक्ष्मणस्य अग्रजात् रामात् परम किमपि न रोचते[384]।

अस्मिन् संसारे बहवः देवाः, बहवः यतयः वर्तन्ते। किन्तु अस्य भवसागरस्य पारं प्राप्तुं केवलं रामनामस्मृतिरेव वर्तते-

केचित् सन्तु दिगम्बरा यतिवराः केचिद् धराशायिनः
केचिन्मौनपराः श्रितान्तकुहरास्तद्ध्यानधाराधराः ।

---

[380] रा.महा., 12.110
[381] रा.महा., 12.111
[382] रा.महा., 12.112
[383] रा.महा., 12.113
[384] कुत्रापि पुत्रा न सुखाय मित्राण्यन्तःकलत्राणि च पुत्रपुत्राः ।
गेहानि चित्राण्युचितानि पत्राण्यन्यत्सुमित्रातनयातिमित्रात् ॥ (रा.महा., 12.117)

जानेऽहं तु निरस्तमन्तुनिचया एकं निदानं परं
पारं गन्तुममुष्य संसृतिसरिन्नाथस्य रामस्मृतिम् ॥[385]

कविः भगवतः श्रीरामस्य महात्म्यं वर्णयति -

येनोद्धृता दुःखपयोधिमध्यात् पत्नी मुनेर्धूलिवरैरहल्या ।
नाहं विना तं रघुनाथपादं चित्तेऽस्तखेदं कलये कदापि ॥[386]

अर्थात् गौतममुनेः पत्नी अहल्या यस्य रामस्य चरणकमलरजोवृन्दं प्राप्य पापात् शापात् दुःखाच्च विमुक्ता अभूत् । तं रघुनाथपादम् अहं वन्दे ।

भक्तानां कृते दृढा भक्तिरेव मुख्या भवति । कविः कथयति यत् हे रघुनाथ ! अहं त्वां पुनः पुनः प्रार्थये । मम तव पादयुगले दृढा भक्तिरस्ति अन्यः अभिलाषः मम न अस्ति -

संप्रार्थये त्वां रघुनाथनाथमनेकवारं पुरतो निपत्य ।
भक्तिर्दृढा पादयुगेऽनुगस्य देयाऽभिलाषो न परो स्पृहस्य ॥[387]

अद्वैतयतिः लिखति यत् मया अखिलं प्रपञ्चं तृणवत् त्यक्तम् । योगीश्वरेणापि तथा कर्तुं सुलभं न भवति । चिन्ताजालपराङ्मुखः सुखयुतः काश्यां तिष्ठन् दशाननरिपोः रघुनन्दनस्य नाम जल्पन् प्रकृष्टनियतिः अद्वैतयतिः कालं नयति[388] ।

अन्तकस्य यमराजस्य करे दण्डाः प्रचण्डाः वर्तन्ते शस्त्राणि अपि सन्ति किन्तु अद्वैतयतिः कथयति यत् एतत् सर्वं त्यक्त्वा श्रीरामनाम स्फुटं वदन्तु । यमराजस्य कृते त्वां द्रष्टुं शक्तिर्नास्ति । स्प्रष्टुं शक्तिः कुतः स्यात्[389] । हे राम ! अहं तव दासानुदासः अस्मि । मया सर्वं लब्धम् । अधुना किमपि अवशिष्टं नास्ति । केवलं मरणकाले भवतः स्मरणं स्यात् -

---

[385] रा.महा., 12.119

[386] रा.महा., 12.120

[387] रा.महा., 12.121

[388] त्यक्त्वा कतृणवत्प्रपञ्चमखिलं योगीश्वरैर्दुस्त्यजं
चिन्ताजालपराङ्मुखः सुखयुतस्तिष्ठन् पुरे शाङ्करे ।
जल्पन् दाशरथेर्दशाननरिपोः सीतेश ! रामेत्यलं
कालं यो नयति प्रकृष्टनियतिः कोऽद्वैतभिक्षोः परः ॥ (रा.महा., 12.122)

[389] रा.महा., 12.124

दासानुदासे मयि राघवेदं कृतं त्वया सर्वमपूर्वमेव।
नातोऽवशिष्टं किमपि प्रकृष्टं प्रेष्ठं किलैकं मरणे स्मृतिस्ते॥[390]

कविः कथयति हे राम यदा मम प्राणाः प्रयाणोन्मुखाः भविष्यन्ति तदा अहं श्यामसरोजसुन्दररुचिं करे चापं दधानं रामं सीतालक्ष्मणसंयुक्तं हनुमता संसेवितं पादं चिन्तयतो मम प्राणान्तः भवतु -

रामं श्यामसरोजसुन्दररुचिं हास्यं प्रशस्याननं
विद्युद्वाससमिञ्ज-तेजसमिषुं चापं दधानं करे।
सीतालक्ष्मणसंयुतं हनुमता संसेवितं पादयो-
श्चित्ते चिन्तयतो भवन्तु हि मम प्राणाः प्रयाणोन्मुखाः॥[391]

कविः अद्वैतयतिः रामं प्रार्थयते यत् हे राम! यदा मम बलं क्षीणं भविष्यति तदा अमले गङ्गाजले शयितः त्वामेव संचिन्तयन् तव प्रसन्नवदनं दृष्ट्वा शिव-शिव इति वदन् रामाक्षरमन्त्रं चिन्तयन् अहं स्याम् -

राम! क्षीण बलेऽखिलेन्द्रियकुले गाङ्गेऽमलेऽस्मिन् जले
काले प्राणविनिर्गमस्य शयितस्त्वामेव संचिन्तयन्।
हासोल्लासि मुखः प्रवर्द्धितसुखः श्रीकण्ठकण्ठोदित-
श्रीरामाक्षरमन्त्रचिन्तनचितोल्लासः कदा स्यामहम्॥[392]

मरणसमये यमराजस्य दण्डधराः दूताः आगच्छन्ति किन्तु त्वां रामं संचिन्तयन् प्राणविनिर्गमस्य काले रामनामावलिं जल्पन्तं मां दृष्ट्वा ते यमदूताः आतुरतराः गच्छन्ति -

आयाता प्रथमं ससम्भ्रमममुं दण्डैः प्रचण्डैर्युता
दूता ये यमिता यमेन यमिना भीमेन भीमाननाः।
पश्चात् सुप्तमुदीक्ष्य गाङ्गसलिले श्रीरामनामावलिं
जल्पन्तं च शनैः कदातुरतरा यास्यन्त्यधः कन्धराः ?॥[393]

[390] रा.महा., 12.125
[391] रा.महा., 12.126
[392] रा.महा., 12.127
[393] रा.महा., 12.128

श्रीरामचिन्तारतः प्राणप्रयाणसमये मम अक्षियुगलः अचलः तिष्ठति[394]। हे रघुपते! मया नित्यं जनानां मरणोत्सवः दृश्यते। अस्मिन् शाङ्करे पुरे अर्थात् काश्यां जनाः प्राणाः त्यजन्ति। हे रघुपते! मम प्राणवियोगः कदा भविष्यति? -

लोकानां मरणोत्सवो रघुपते! नित्यं मयालोक्यते
प्रीत्युत्फुल्लविलोचनाम्बुजयुगे नालं पुरे शाङ्करे।
एवं देवदयोदयेन पदयोः सन्तोऽप्यनन्तोत्सवं-
यास्यन्त्यत्र पवित्रगात्रविलयं दृष्ट्वा मदीयं कदा॥[395]

कविः लिखति यत् येन पुरुषेण सीतापतिः पते पादरविन्दे आराधिते तस्य कृते भुवनत्रयेऽपि अतिरम्यम्, अगम्यं किमपि नास्ति -

आराधिते येन पदारविन्दे सर्वप्रदे मैथिलजाधिपस्य।
तस्यात्र किं भाग्यवतोऽस्त्यगम्यं यच्चातिरम्यं भुवनत्रयेऽपि॥[396]

मम मानसं न पुत्रे वर्तते न मित्रे न कलत्रे वर्तते। सीताकलत्रे जगतां पवित्रे नीरजपत्रनेत्रे श्रीरामे वर्तते -

नैवास्ति पुत्रे न कदापि मित्रे नो वै कलत्रे न विचित्र-पत्रे।
मन्मानसं नीरजपत्रनेत्रे सीताकलत्रे जगतां पवित्रे॥[397]

हे राम! ग्राहमुखात् गजेन्द्रः रामेण सम्मोचितः। अहमपि सदैव रामं रामं वदामि। अतः ममापि उद्धारं कुरु[398]। काश्यां मणिकर्णिकायां प्राणान् त्यजतः धन्यान् जनान् विलोक्य रे मूर्खमनः! किमर्थं पृथिव्यां स्थातुमिच्छसि? रामनाम स्मर [399]। ममायुः क्षये रामचन्द्र एव सर्वं करिष्यति किन्तु एतद् विषये धैर्यं नास्ति। कदा भागीरथीनिर्मलजले एवं स्वाकृतेन सुप्तः हृदयेन रामपदं ध्यायन् कदा अस्य शरीरस्य त्यागं करिष्यामि इति चिन्ता वर्तते[400]। पूर्वं मित्रैः सः अहं गङ्गायाः तटे स्नानं कृतवान् किन्तु पुनः कदा हरेः स्मरणं कुर्वन् राघव-राघवेति जपन् अहं शरीरं त्यक्षामि इति चिन्ता वर्तते[401]।

394 रा.महा., 12.129
395 रा.महा., 12.130
396 रा.महा., 12.131
397 रा.महा., 12.132
398 रा.महा., 12.134
399 रा.महा., 12.135
400 रा.महा., 12.138
401 रा.महा., 12.139

कविः कामयते यद् अन्तकाले पूर्वार्जितकर्मयोगात् हे श्रीराम! यदि मम शरीरस्य सन्निपातः भविष्यति तदा मम मुखात् श्रीरामरामेति वचनमुदेतु -

अन्ते यदि स्यान्मम सन्निपातः श्रीराम! पूर्वार्जितकर्मयोगात्।
श्रमातुरस्यापि मुखादुदेतु श्रीराम-रामेति वचः प्रचारः॥[402]

कविः लिखति यत् -

जले गाङ्गे स्नानं तदनु हरपूजाविरचनम्
ततो देवस्थाने क्षणमपि तदाख्यानकथनम्।
पुनः साकं सद्भिर्विकसितमुखाब्जं च हसनम्
यदि स्यान्मे नित्यं मधुमथन! लोके किमधिकम्॥[403]

लज्जां विहाय परमोल्लासेन राघवराघवेति वदन् काश्यां सुरसिन्धुतीरे यदि अहं क्रीडामि तदा तादृशः पूर्णपुरुषभाग्येन कोऽपि भवति -

विहाय लज्जां परमोत्सवेन प्रोच्चैर्वदन् राघव-राघवेति।
क्रीडामि काश्यां सुरसिन्धुनीरे तीरे वसन् कोऽपि च पुण्यपाकः॥[404]

अद्वैतयतिः केवलं श्रीराममेव स्मरति। असौ लिखति -

तातस्तु रामो जननी च रामो भ्रातापि रामो भगिनी च रामः।
मित्रञ्च रामः सकलञ्च रामो रामात् परं नो मम किञ्चदस्ति॥[405]

वस्तुतः भक्तः सर्वत्र इष्टदेवं पश्यति। कविः कथयति यत् मनुष्याः देवाः पशवः पतङ्गाः तुरङ्गाः सर्वं चराचरं राम एव वर्तते। रामं विना मे किञ्चत् न विभाति-

देवा मनुष्याः पशवः पतङ्गा नागाः नगाः कुण्डलिनस्तुरङ्गाः।
सर्वं चरं चाचरमेव रामो रामं विना न विभाति किञ्चत्॥[406]

---

[402] रा.महा., 12.140
[403] रा.महा., 12.141
[404] रा.महा., 12.142
[405] रा.महा., 12.143
[406] रा.महा., 12.144

गीतायाम् उक्तं यत्- 'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति'इति तथैव अद्वैतयतिः लिखति यत् भूतले पाताले सर्वत्र मेघश्यामं मनोरमं रामं पश्यामि[407]। अहं नराणां किन्नराणां सर्वं रूपं रघुनाथरूपं पश्यामि। सीतासमानं रघुनाथरूपं सर्वत्र पश्यामि।

कविः इच्छति यत् हे राम! मम मनः त्वदीयचरणं विहाय अन्यत्र कुत्रापि न गच्छतु-

कदापि नो यातु मनो मदीयं राम! त्वदीयं चरणं विहाय।
जाता यतस्तोषसमुद्रमग्ना ये केऽपि लग्ना हृदयेन किञ्चित्॥[408]

हे राम! अहं विमूढबुद्धिः अस्मि। स्वहिते किमपि कर्तुम् अशक्तः अस्मि। स्वजनस्योपरि अहं कोपं करोमि। तथापि त्वया अहं कथं भक्तिविधौ नियुक्तः[409]। ममोपरि राघवस्य कृपा भवतु इति वारम्वारं कविः प्रार्थयते। हे राम मम त्राणं कथं भविष्यति। रामः दीनवचनं श्रुत्वा भक्तस्य सम्मुखं प्रादुर्भवति[410]।

कविः बारम्बारं कथयति यत् राम-नामोच्चारणं वारम्वारं यदि जिह्वा करिष्यति तदा सर्वं श्रेयः भविष्यति। मदीया भक्तिः रघुनाथपादे भवतु यस्मात् संसारखेदात् अहं मुक्तो भविष्यामि -

भक्तिर्यदीया रघुनाथपादे संसारखेदेन स मुक्त एव।
किञ्चाखिलं पूर्वकुलं स्वकीयं तेनोद्धृतं कालकरालवक्त्रात्॥[411]

भगवान् रामः करुणासिन्धुः वर्तते। दीनबन्धुः वर्तते अतः भक्तस्य सम्मुखम् आविर्भवति[412]। मया अधुना जानकीनायकस्य चरणकमले चेतो निधाय समाधिः क्रियते -

मुक्त्यङ्गनालिङ्गनलालसेन प्रायोऽलसेनाखिलकर्मजालैः।
श्रीजानकीनायकपादपे चेतो निधाय क्रियते समाधिः॥[413]

[407] रा.महा., 12.145
[408] रा.महा., 12.150
[409] रा.महा., 12.151
[410] रा.महा., 12.161
[411] रा.महा., 12.174
[412] रा.महा., 12.177
[413] रा.महा., 12.180

अद्वैतयतिः लिखति यत् मम मुक्तिः अधुना दूरे नास्ति। अहं गङ्गायाः उत्सङ्गे क्रीडां करोमि। रामस्मृतौ अहं धीरोऽस्मि -

न मुक्तिरधुना दूरे धीरे रामस्मृतौ पुनः।
क्रीडां गाङ्गे सदोत्सङ्गे चित्तरङ्गेण कुर्वति॥[414]

मम कविता प्रसूनैः रामः प्रीतिं प्रयातु इति कवेः कथनम् -

प्रेम्णा विशुद्धहृदयेन मयाल्पकेन सङ्कल्पितैः पदसरोरुहयोरनल्पैः।
हीनैरपि प्रियगुणैः कविता-प्रसूनैः प्रीतिं प्रयातु करुणानिधिरेष रामः॥[415]

अद्वैतकविः कथयति यत् अहं कामान् विहाय काश्यामहर्निशं निवसामि। मम वाक्यपीयूषरसेन सिक्ता जनता श्रमैः विमुक्ता भवति। रा.महा., 12.184 कविः अन्ते धरापुत्रीं सीतां भजते -

क्रोधो यास्यति चेत् प्रयातु जननि! स्यात्तेन किं मेऽधुना
नाहं राममुमं श्रयामि विषमं दीनातिहीनेऽपि च।
एतद्वाक्यसुधास्मृतिरसस्वान्तं स्वकान्ताननं
पश्यन्ती सहसा पुनस्तमुरसा दध्रे धरानन्दिनी॥[416]

वाराणस्यां मानससरोवरे अद्वैतयतिना इदं राघवोल्लासं काव्यं कृतम् -

वाराणस्यां शिवस्थाने मानसाख्ये सरोवरे।
अद्वैतेन कृतं काव्यं सीताकान्तनियोगतः॥[417]

तथा च वदति- यस्य सीता स्थिता वामे दक्षिणे लक्ष्मणः सदा। पुरतस्तनयो वायोः प्रायोऽयं जीवनं मम -

सीता स्थिता यस्य च वामभागे नागेश्वरो दक्षिणतस्सदैव।
पुरः प्रदेशे पवनस्य सूनुर्नूनं मनो मे रघुनन्दनेऽस्मिन्॥[418]

[414] रा.महा., 12.181
[415] रा.महा., 12.182
[416] रा.महा., 12.186
[417] रा.महा., 12.189
[418] रा.महा., 12.190

ग्रन्थान्ते कविः लिखति यत् रघुवंशदीपः भगवान् श्रीरामः मम पद्यवृष्टिभिः तुष्टिं प्रयातु -

तुष्टिं प्रयातु भगवान् यत एव सृष्टिः
किञ्चानुकृष्टिरपि पुष्टिरमोघदृष्टिः ।
व्यष्टिः समष्टिरतिदुष्टजनान् पिनष्टि
श्रीपष्वृष्टिभिरसौ रघुवंशदीपः ॥[419]

इति श्रीराघवोल्लासे महाकाव्ये परमहंसपरिव्राजकाचार्यवर्यदिगम्बरश्रीराम-कृष्णाश्रमभगवत्पूज्यपादशिष्याद्वैतविरचिते रघुनाथायोध्याप्रवेशो नाम द्वादशः सर्गः ॥

एवम्प्रकारेण राघवोल्लासमहाकाव्ये अद्वैतयतिः सम्यक् प्रकारेण भक्तिरसं पुष्णाति ।

**शब्दसंकेत**

1. रा. महा. - राघवोल्लासमहाकाव्यम्
2. रघु. - रघुवंशम्

**सन्दर्भग्रन्थसूची**

1. कालिदास, रघुवंशमहाकाव्यम्, मोतिलाल बनारसीदास, दिल्ली, 1985.
2. राघवोल्लासमहाकाव्यम्, अद्वैतयतिः, सम्पा. डॉ. रामकिशोर झा, गङ्गानाथझा परिसर, इलाहाबाद, 2011.
3. रामायण, महाकविवाल्मीकि, गीताप्रेस गोरखपुर, सं. 2070.
4. संस्कृत वाङ्मय का बृहद् इतिहास (सभी खण्ड), उपाध्याय बलदेव, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ, सं.2056.
5. संस्कृत साहित्य का इतिहास, उमाशङ्कर 'ऋषि', चौखम्बा सुरभारती अकादमी, वाराणसी, 2014.
6. संस्कृत वाङ्मय में राम, त्रिपाठी मिथिला प्रसाद, जे.पी. पब्लिशिंग हाउस, दिल्ली, 2012.

[419] रा.महा., 12.192

# Contributors


1. **Kishornath Jha**
   Former HoD, Dept. of Philosophy,
   Rashtriya Sanskrit Sansthan,
   Ganganatha Jha Campus, Allahabad

2. **Lalit Kumar Tripathi**
   Professor, Dept. of Vyakarana,
   Rashtriya Sanskrit Sansthan,
   Ganganatha Jha Campus, Allahabad

3. **Bhagvat Sharan Shukla**
   Professor, Dept. of Vyakarana,
   Faculty of Sanskrit Vidya Dharma Vigyan,
   Banaras Hindu University, Varanasi

4. **Vinod Jha**
   Professor, Dept. of Vyakarana,
   Sri Somnath Sanskrit University, Veraval

5. **Aprajita Mishra**
   Assistant Professor, Dept. of Sahitya,
   Rashtriya Sanskrit Sansthan,
   Ganganatha Jha Campus, Allahabad

6. **Pankaj Kumar Sharma**
   Research Scholar,
   Rashtriya Sanskrit Sansthan,
   Ganganatha Jha Campus, Allahabad

7. **Manish Kumar Tripathi**
   Research Scholar,
   Rashtriya Sanskrit Sansthan,
   Ganganatha Jha Campus, Allahabad




राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

गङ्गानाथझापरिसरः

चन्द्रशेखर-आजादोद्यानम्

इलाहाबाद 211002